June 1929.

THE

CHOWKHAMBĀ SANSKRIT SERIES,

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORK

NO. 378.

याज्ञवल्क्यस्मृतिः।

श्रीमित्रमिश्रकृत‘वीरमित्रोदय’टीकया श्रीविज्ञानेश्वरकृत-
‘मिताक्षरा’टीकया च सहिता।

साहित्याचार्य-खिस्ते नारायणशास्त्रिणा
साहित्योपाध्याय-होशिङ्ग जगन्नाथशास्त्रिणा च संशोधिता।

YĀJÑAVALKYA SMṚTI

With the Commentary of Mitra Mis'ra's
Vīramitrodaya and Vijnānes'vara's Mitākṣarā.

Edited By
Pt. Nārāyaṇa S'āstrī Khiste Sāhityāchārya, Assistant Librarian, and
Pt. Jagannātha S'āstrī Hos'iṅga Sāhityopādhyāya, Sādholāl Scholar,
Sarasvatī Bhavana, Benares.

FASCICULUS VIII-८

PUBLISHED & SOLD BY THE SECRETARY,
CHOWKHAMBA SANSKRIT SERIES OFFICE,
Vidya Vilas Press, North of Gopal Mandir, Benares.

1928

श्रीः

आनन्दवनविद्योतिसुमनोभिः सुसंस्कृता ।
सुवर्णाऽङ्कितभव्याभशतपत्रपरिष्कृता ॥ १ ॥
चौखम्बा-संस्कृतग्रन्थमाला मञ्जुलदर्शना ।
रसिकालिकुलं कुर्यादमन्दाऽऽमोदमोहितम् ॥ २ ॥

स्तवकः—३७८

Printed by Jai Krishna Das Gupta
at the Vidya Vilas Press, Benares.

Agents:

1 Luzac & Co., Booksellers,
LONDON

2 Otto Harrassowitz, Leipzig
GERMANY.

3 The Oriental Book-supplying Agency
POONA

प्ररोहिशाखिनस्तेषां शाखाच्छेदने । यतो मूलशाखा निर्गच्छन्ति स स्कन्धस्तस्य छेदने समूलवृक्षच्छेदने च यथाक्रमं विंशति(१)पण-दण्डादारभ्य पूर्वस्मात्पूर्वस्मादुत्तरोत्तरो दण्डो द्विगुणः । एतदुक्तं भवति—विंशतिपणश्चत्वारिंशत्पणोऽशीतिपण इत्येवं त्रयो दण्डा यथाक्रमं शाखाच्छेदनादिष्वपराधेषु भवन्तीति । अप्ररोहिशाखिना-मप्युपजीव्यवृक्षाणामाम्रादीनां पूर्वोक्तेषु स्थानेषु पूर्वोक्ता एव दण्डाः । अनुपजीव्याप्ररोहिशाखिषु पुनर्वृक्षेषु कल्प्याः ॥ २२७ ॥

(मिता०) वृक्षविशेषं प्रत्याह—

चैत्येति । चैत्यादिषु जातानां वृक्षाणां शाखाच्छेदनादिषु पूर्वो-क्ताद्दण्डाद् द्विगुणः । विश्रुते च पिप्पलपलाशादिके द्विगुणो दण्डः ॥ २२८ ॥

(मिता०) गुल्मादीन्प्रत्याह—

गुल्मेति । गुल्मा अनतिदीर्घनिबिडलता मालत्यादयः । गुच्छा अवल्लीरूपाः असरलप्रायाः कुरण्टकादयः । क्षुपाः करवीरादयः सरलप्रायाः । लता दीर्घयायिन्यो द्राक्षातिमुक्ताप्रभृतयः । प्रतानाः काण्डप्ररोहरहिताः (२)सरलयायिन्यः सारिवाप्रभृतयः । ओषध्यः फलपाकावसानाः शालिप्रभृतयः । वीरुधः छिन्ना अपि या विविधं प्ररोहन्ति ताः गुडूचीप्रभृतयः । एतेषां पूर्वोक्तेषु स्थानेषु विकर्तने छेदने पूर्वोक्ताद्दण्डादर्धदण्डो वेदितव्यः ॥ २२९ ॥

इति दण्डपारुष्यप्रकरणम् ।

(वी० मि०) सहसा क्रियते कर्म यत्किञ्चिद्बलदर्पितैः ।
तत्साहसमिति प्रोक्तं सहो बलमिहोच्यते ॥
तस्यैव भेदः स्तेयं स्यात् विशेषस्तत्र कीर्त्यते ।
आधिः साहसमाक्रम्य स्तेयमाधिश्छलेन तु ॥

इति नारदोक्तं रक्षितुर्ज्ञानं सत्येव बलेन पीडनं स्तेयव्यावृत्तं साहसं विवादपदमुपक्रमते—

सामान्यद्रव्यप्रसभहरणात् साहसं स्मृतम् ॥
तन्मूल्याद्द्विगुणो दण्डो निन्हवे तु चतुर्गुणः ॥ २३० ॥

---

(१) पणादण्डादारभ्य घ. । (२) शिखायायिन्य इति ख.पु. पाठः ।

सामान्यसाधारणस्वत्वास्पदं परस्वमिति यावत् । तादृशं यद्द्रव्यं हिरण्यादि शरीरं च तस्य स्वामिसमक्षं प्रसभहरणाद्बलात्कारेण स्कन्दनात् तादृशहरणं योगार्थमाश्रित्य साहसं साहसपदवाच्यं यत्स्मृतं स्मृतावुक्तं तत्तत्र क्रियमाणद्रव्यमूल्याद्विगुणोऽभ्युपगमे, निन्हवे सङ्गोपने तु चतुर्गुणो दण्डः ॥ २३० ॥

(मिता०) संप्रति साहसं नाम विवादपदं व्याचिख्यासुस्तल्लक्षणं तावदाह—

सामान्येति । सामान्यस्य साधारणस्य (१)यथेष्टं विनियोगानर्हत्वा(२)विशेषेण परकीयस्य वा द्रव्यस्यापहरणं साहसम् । कुतः प्रसभहरणात् प्रसह्य हरणात् बलावष्टम्भेन हरणादिति यावत् । एतदुक्तं भवति—राजदण्डं जनाक्रोशं चोल्लङ्घ्य राजपुरुषेतरजनसमक्षं यत्किञ्चिन्मारणहरणपरदारप्रधर्षणादिकं क्रियते तत्सर्वं साहसमिति साहसलक्षणम् । अतः साधारणधनपरधनयोर्हरणस्यापि बलावष्टम्भेन क्रियमाणत्वात्साहसत्वमिति । नारदेनापि साहसस्य स्वरूपं विवृतम्—'सहसा क्रियते कर्म यत्किञ्चिद्बलदर्पितैः । तत्साहसमिति प्रोक्तं सहो बलमिहोच्यते' ॥ इति । तदिदं साहसं चौर्यवाग्दण्डपारुष्यस्त्रीसङ्ग्रहणेषु व्यासक्तमपि बलदर्पावष्टम्भोपा(३)धितो भिद्यते इति दण्डातिरेकार्थं पृथगभिधानम् । तस्य च दण्डवैचित्र्यप्रतिपादनार्थं प्रथमादिभेदेन त्रैविध्यमभिधाय तल्लक्षणं तेनैव विवृतम्—'तत्पुनस्त्रिविधं ज्ञेयं प्रथमं मध्यमं तथा । उत्तमं चेति शास्त्रेषु तस्योक्तं लक्षणं पृथक् ॥ फलमूलोदकादीनां क्षेत्रोपकरणस्य च । भङ्गाक्षेपोपमर्दाद्यैः प्रथमं साहसं स्मृतम् ॥ वासःपश्वन्नपानानां गृहोपकरणस्य च । एतेनैव प्रकारेण मध्यमं साहसं स्मृतम् ॥ व्यापादो विषशस्त्राद्यैः परदाराभिमर्शनम् । प्राणोपरोधि यच्चान्यदुक्तमुत्तमसाहसम् ॥ तस्य दण्डः क्रियापेक्षः प्रथमस्य शतावरः । मध्यमस्य तु शास्त्रज्ञैर्दृष्टः पञ्चशतावरः ॥ उत्तमे साहसे दण्डः सहस्रावर इष्यते । वधः सर्वस्वहरणं पुरान्निर्वासनाङ्कने । तदङ्गच्छेद इत्युक्तो दण्ड उत्तमसाहसे' ॥ इति । वधादयश्चापराधतारतम्यादुत्तमसाहसे समस्ता व्यस्ता वा योज्याः ॥

(१) यथेष्टविनियोगा ग. घ. । (२) त्वाद्विशेषेण ग. । (३) पाधिना भिद्यते घ. ।

(मिता०) तत्र परद्रव्यापहरणरूपे साहसे दण्डमाह—

तन्मूल्यादिति । तस्यापहृतद्रव्यस्य मूल्यात् द्विगुणो दण्डः । यः पुनः साहसं कृत्वा नाहमकार्षमिति निह्नुते तस्य मूल्याच्चतुर्गुणो दण्डो भवति । एतस्मादेव विशेषदण्डविधानात्प्रथमसाहसादिसामान्यदण्डविधानमपहारव्यतिरिक्तविषयं गम्यते ॥ २३० ॥

(वी० मि०) साहसकर्तुरिव तत्कारयितुरपि दण्ड इत्याह—

यः साहसं कारयति स दाप्यो द्विगुणं दमम् ॥
यश्चैवमुक्त्वाऽहं दाता कारयेत् स चतुर्गुणम् ॥ २३१ ॥

साहसं कुर्वित्युपदेशेन यः कारयति स साहसकर्तुर्द्विगुणं दमं दाप्यः । तव दण्डसम्भवे अहं तद्धनं दास्यामीत्येवमुक्त्वा यः साहसं कारयेत् स साहसकर्तुश्चतुर्गुणं दाप्यः ॥ २३१ ॥

(मिता०) साहसस्य प्रयोजयितारं प्रत्याह—

य इति । यस्तु साहसं (१)कुर्वित्येवमुक्त्वा कारयत्यसौ साहसिकाद्दण्डाद् द्विगुणं दण्डं दाप्यः । यः पुनरहं तुभ्यं धनं दास्यामि त्वं कुर्वित्येवमुक्त्वा साहसं कारयति स चतुर्गुणं दण्डं दाप्योऽनुबन्धातिशयात् ॥ २३१ ॥

(वी० मि०) साहसविशेषे दण्डविशेषमाह—

अर्घ्याक्रोशातिक्रमकृद् भ्रातृभार्याप्रहारदः (२) ॥
सन्दिष्टस्याऽप्रदाता च समुद्रगृहभेदकृत् ॥ २३२ ॥
सामन्तकुलिकादीनामपकारस्य कारकः ॥
पञ्चाशत्पणिको दण्ड एषामिति विनिश्चयः ॥ २३३ ॥

अर्घ्यस्याऽऽचार्यादेराक्रोशमाक्षेपमाज्ञातिक्रमं च यः करोति, भ्रातृभार्यायां प्रहारं यश्च ददाति, सन्दिष्टस्य परप्रेषितस्य हिरण्यादेः प्रतिधातुं गृहीतस्याऽप्रदाता, मुद्राचिन्हितगृहस्य भेदकृदुद्धाटकः, स्वग्रामसमीपग्रामस्थाः, कुलिकाः स्वकुलोद्भवाः, आदिपदात् श्रेण्यादयः तेषामन्यतमस्याऽपकारकर्त्ता । एषां पूर्वोक्तानां पञ्चाशत्पणमितो दण्ड इति धर्मशास्त्रे विनिश्चयः । चकाराद्वाचिकस्याऽप्रवक्तुः समुच्चयः ॥ २३२—२३३ ॥

---

(१) कुर्वित्येव वाचैव कारयति घ. । (२) प्रहारकः—इति मु० पु० पाठः ।

(मिता०) साहसिकविशेषं प्रत्याह—

अर्घ्येत्यादि । अर्घ्यस्यार्घार्हस्याचार्यादेराक्षेपमाज्ञातिक्रमं च यः करोति यश्च भ्रातृभार्यां ताडयति तथा संदिष्टस्य प्रतिश्रुतस्यार्थस्याप्रदाता यश्च मुद्रितं गृहमुद्घाटयति तथा स्वगृहे क्षेत्रादिसंलग्नगृहक्षेत्रादिस्वामिनां कुलिकानां स्वकुलोद्भवानाम्, आदिग्रहणात्स्वग्राम्यस्वदेशीयानां च योऽपकर्ता ते सर्वे पञ्चाशत्पणपरिमितेन दण्डनीयाः ॥ २३२–२३३ ॥

(वी० मि०) स्त्रीसङ्ग्रहणस्य साहसभेदतया कयाचिद्विवक्षया साहसभिन्नत्वेऽपि तत्तुल्यतया तत्र दण्डमभिदधान एव ग्रन्थलाघवादन्यत्राऽपि तद्दण्डमाह—

स्वच्छन्दं विधवागामी विक्रुष्टे नाऽभिधावकः ॥
अकारणे च विक्रोष्टा चण्डालश्चोत्तमान् स्पृ(१)शन् ॥२३४॥
शूद्रप्रव्रजितानां च दैवे पित्र्ये च भोजकः ॥
अयुक्तं शपथं कुर्वन्नयोग्यो योग्यकर्मकृत् ॥ २३५ ॥
वृषक्षुद्रपशूनां च पुंस्त्वस्य प्रतिघातकृत् ॥
साधारणस्याऽपलापी दासीगर्भविनाशकृत् ॥ २३६ ॥
पितापुत्रस्वसृभ्रातृदम्पत्याचार्यशिष्यकाः ॥
एषामपतितान्योन्यत्यागी च शतदण्डभाक् ॥ २३७ ॥

स्वच्छन्देन स्वेच्छया विधवागमनकर्ता, चौरादितो भीतैर्विक्रुष्टे सति शक्तोऽपि सन् प्रतीकारार्थमधावनकर्ता, निर्निमित्तं विक्रोशनकर्ता, चण्डालः सन् ब्राह्मणादीन् स्पृशन्, शूद्राणां प्रव्राजितानां दिगम्बरादीनां वा दैवपित्र्यकर्मणि भोजयिता, अयुक्तं शपथं 'भ्रातरं ग्रहीष्यामि यदीदमसत्य'मित्यादिकं कुर्वन्, तथाऽयोग्यः शूद्रादिर्योग्यस्य ब्राह्मणादेः कर्म वेदाध्ययनादिकं कुर्वाणः, वृषाणां क्षुद्रपशूनां वा पुंस्त्वस्य प्रजननशक्तेर्विनाशकः, साधारणस्याऽविभक्तद्रव्यस्याऽपह्नवकर्त्ता, दासीगर्भस्य विनाशकारी, पितापुत्रौ, स्वसृभ्रातरौ, दम्पती जायापती, आचार्यशिष्यौ, एषामपतितम-

(१) स्पृशेत—इति मु० पु० पाठः ।

न्योन्यं परस्परं त्यजति यः स शतपणात्मकदण्डभाक् भवति। आद्येन चकारेण कारणेऽपि विक्रोशाकर्तुः, द्वितीयेन पतितस्य, तृतीयेन पाखण्डिनां, चतुर्थेन मनुष्ययज्ञस्य, पञ्चमेन वृषस्य, षष्ठेन मातापुत्रयोरन्योन्यं त्यागिनः समुच्चयः । पितापुत्राद्योरेकतरेणैव । अपरस्य त्यागे तु शङ्खः—'यस्त्यजेत्कामादपतितान् स हि शतं दण्डं प्राप्नुयात्' । इदं तु अविदुषा त्यागे कृते । विदुषा कृते त्यागे त्वाह मनुः—

न माता न पिता न स्त्री न पुत्रस्त्यागमर्हति ।
त्यजन्नपतितानेतान् राज्ञा दण्ड्यः शतानि षट् ॥

विदुषाऽन्योन्यत्यागे शतत्रयं दण्ड ऊहनीयः ॥२३४—२३७॥

(मिता०) किञ्च—

स्वच्छन्दमित्यादि । नियोगं विना यः स्वेच्छया विधवां गच्छति । चौरादिभयाकुलैर्विक्रुष्टे च यः शक्तोऽपि नाभिधावति । यश्च वृथाक्रोशं करोति । यश्च चण्डालो ब्राह्मणादीन्स्पृशति । यश्च शू(१)द्रः प्रव्रजितान्दिगम्बरादीन्दैवे पित्र्ये च कर्मणि भोजयति । यश्चायुक्तं मातरं (२)ग्रहीष्यामीत्येवं शपथं करोति । वृषो वलीवर्दः क्षुद्रपशवोऽजादयस्तेषां पुंस्त्वस्य प्रजननशक्तेर्विनाशकः । वृक्षक्षुद्रपशूनामिति पाठे हिंग्वाद्यौषधप्रयोगेण वृक्षादेः फलप्रसूनानां पातयिता । साधारणमपलपति साधारणद्रव्यस्य च वञ्चकः । दासीगर्भस्य च पातयिता । ये च पित्रादयोऽपतिता एवं सन्तोऽन्योन्यं त्यजन्ति ते सर्वे प्रत्येकं पणशतं दण्डार्हा भवन्ति ॥ २३४-२३७ ॥

(वी० मि०) अथ साहसप्रसङ्गात्तत्सदृशापराधेषु दण्डानाह त्रयोदशभिः श्लोकैः—

वसानस्त्रीन् पणान् दाप्यो नेजकस्तु परांशुकम् ॥
विक्रयावक्रयाधानयाचितेषु पणान् दश ॥ २३८ ॥

नेजको वस्त्रस्य प्रक्षालकः । रजक इति पाठेऽप्ययमेवाऽर्थः । परस्यांशुकं निर्णेजनार्थमर्पितं वसानः परिदधानस्त्रीन् पणान् दण्डं

---

(१) शूद्रप्रव्राजितानां ख. । (२) गमिष्यामीत्येवं ।

दाप्यः । यस्तु निर्णेजनार्थमर्पितस्य वस्त्रस्य विक्रयमवक्रयं भाटकपूर्वकमुपभोगार्थं कियत्कालमाधानमाधीकरणं मण्डनार्थं बन्धुभ्यो याचनानन्तरमर्पणं वा करोति स दश पणान् दाप्यः ॥ २३८ ॥

(मिता०) साहसप्रसङ्गात्तत्सदृशापराधेषु निर्णेजकादीनां दण्डमाह—

वसान इति । नेजको वस्त्रस्य धावकः स यदि निर्णेजनार्थं समर्पितानि वासांसि स्वयमाच्छादयति तदासौ पणत्रयं दण्ड्यः । यः पुनस्तानि विक्रीणीते अवक्रयं वा एतावत्कालमुपभोगार्थं वस्त्रं दीयते मह्यमेतावद्धनं देयमित्येव भाटकेन यो ददाति आधित्वं वा नयति स्वसुहृद्भ्यो याचितं वा ददात्यसौ प्रत्यपराधं दश पणान् दण्डनीयः । तानि च वस्त्राणि श्लक्ष्णशाल्म(१)लीफलके क्षालनीयानि न पाषाणे, न च व्यत्यसनीयानि, न च स्वगृहे वासयितव्यानि, इतरथा दण्ड्यः । (८।३९६)–'शाल्मलीफलके श्लक्ष्णे निज्याद्वासांसि नेजकः । न च वासांसि वासोभिर्निर्हरेन्न च वासयेत्' ॥ इति मनुस्मरणात् । यदा पुनः प्रमादात्तानि नाशयति तदा नारदेनोक्तं द्रष्टव्यम्—'मूल्याष्टभागो हीयेत सकृद्धौतस्य वाससः । द्विःपादस्त्रिस्तृतीयांशश्चतुर्धौतेऽर्धमेव च ॥ अर्धक्षयात्तु परतः पादांशापचयः क्रमात् । यावत्क्षीणदशं जीर्णं जीर्णस्यानियमः क्षयः' ॥ इति । अष्टपणक्रीतस्य सकृद्धौतस्य वस्त्रस्य नाशितस्या(२)ष्टमभागोनं पणन्यूनं मूल्यं देयम् । द्विर्धौतस्य तु पादोनं पणद्वयोनं त्रिर्धौतस्य पुनस्तृतीयांशन्यूनम् । चतुर्धौतस्यार्धं पणचतुष्टयं देयम् । ततः परं प्रतिनिर्णेजनमवशिष्टं मूल्यं (३)पादापचयेन देयम् । यावज्जीर्णं जीर्णस्य पुनर्नाशितस्येच्छातो मूल्यदानकल्पनम् ॥ २३८ ॥

पितापुत्रवि(४)वादे तु साक्षिणां त्रिपणो दमः ॥
अन्तरे तु(५) तयोर्यः स्यात्तस्याऽप्यष्ट(६)पणो दमः ॥२३९॥

(वी० मि०) पितापुत्रयोः कलहे यः साक्ष्यमङ्गीकरोति न तु

(१) शाल्मले फलके ख । (२) अष्टमभागोनं पणं मूल्यं ख–घ. । (३) पादापचयेन ख. ।
(४) विरोधे—इति मु० पु० पाठः । (५) च—इति मु० पु० पाठः ।
(६) तस्याप्यष्टगुणो—इति मु० पु० पाठः ।

कलहं वारयति तस्य पणत्रयमितो दण्डः । यस्तु तयोर्विवादेऽन्तरे मध्ये प्रवेश्य कलहवर्धकः स्यात्तस्य अपिशब्दात्तत्र विवादे प्रतिभुवोऽष्टपणमितो दमः कार्यः ॥ २३९ ॥

(मिता०) पितेति । पितापुत्रयोः कलहे यः साक्ष्यमङ्गीकरोति न पुनः कलहं निवारयति असौ पणत्रयं दण्ड्यः । यश्च तयोः सपणे विवादे पणदाने प्रतिभूर्भवत्यसौ चकारात्तयोर्यः कलहं वर्धयति सोऽपि त्रिपणादष्टगुणं चतुर्विंशतिपणान्दण्डनीयः । दम्पत्यादिष्वयमेव दण्डोऽनुसरणीयः ॥ २३९ ॥

तुलाशासनमानानां कूटकृन्नाणकस्य च ॥

एभिश्च व्यवहर्ता यः स दाप्यो दममुत्तमम् ॥ २४० ॥

(वी० मि०) तुला तोलनदण्डः, शासनं प्रागुक्तं, मानं प्रस्थद्रोणादि, नाणकं मुद्राचिन्हितं निष्कद्रमादि, एषां यः कूटकृत् कपटेनाऽपरभ्रमजनकनिर्माणकृदेभिः कूटैर्जानन्नपि यो वा व्यवहारं करोति स उत्तमसाहसं दमं दाप्यः । आद्यचकारेण कूटकारयितुर्द्वितीयचकारेण कूटव्यवहारयितुः सङ्ग्रहः ॥ २४० ॥

(मिता०) तुलेति । तुला तोलनदण्डः । शासनं पूर्वोक्तम् । मानं प्रस्थद्रोणादि । नाणकं मुद्रादिचिह्नितं द्रम्मनिष्कादि । एतेषां यः कूटकृत् देशप्रसिद्धपरिमाणादन्यथा न्यूनत्वमाधिक्यं वा द्रम्मादेरव्यव(१)हारिकमुद्रात्वं ताम्रादिगर्भत्वं वा करोति यश्च तैः कूटैर्जानन्नपि व्यवहरति तावुभौ प्रत्येकमुत्तमसाहसं दण्डनीयौ ॥ २४० ॥

अकूटं कूटकं ब्रूते कूटं यश्चाप्यकूटकृत् ॥

स नाणकपरीक्षी तु दाप्य उत्तमसाहसम् ॥ २४१ ॥

(वी० मि०) यो नाणकपरीक्षी कपटहीनं कपटकृतत्वेन कपटकृतं चाऽकपटत्वेनाऽभिधत्ते स उत्तमसाहसं दाप्यः । चकारेण कूटं जानन्नपि न जानामीति ब्रूते इति समुच्चीयते ॥ २४१ ॥

(मिता०) नाणकपरीक्षिणं प्रत्याह—

अकूटमिति । यः पुनर्नाणकपरीक्षी ताम्रादिगर्भमेव द्रम्मादिकं सम्यगिति ब्रूते सम्यक् वा कूटकमिति असावुत्तमसाहसं दण्ड्यः ॥ २४१ ॥

---

(१) व्यावहारिकमुद्रितत्वं घ. ।

तमिति । बिल्वकाष्ठे चन्दनामोदसंचारेण चन्दनमिति । कङ्कोले त्वगाख्यं लवङ्गमिति । कार्पासिके वाससि गुणोत्कर्षाधानेन कौशेयमिति । विक्रेयस्यापादितसादृश्यस्य मृच्चर्मादेः पण्यस्याष्टगुणो दण्डो वेदितव्यः ॥ २४६ ॥

समुद्गपरिवर्तं च सारभाण्डं च कृत्रिमम् ॥
आधानं विक्रयं वापि नयतो दण्डकल्पना ॥ ४७ ॥
भिन्ने पणे तु पञ्चाशत्पणे तु शतमुच्यते ॥
द्विगुणो द्विशतो दण्डो मूल्यवृद्धौ च वृद्धिमान् ॥ ४८ ॥

(वी० मि०) मुद्गं पिधानं तेन सहितं समुद्गं सम्पुटं मुक्तादिपूर्णं तस्य विक्रयाद्यर्थं दर्शितस्य विक्रयादिकाले परिवर्तं हस्तलाघवेन स्फटिकादिपूर्णसम्पुटदानं यथास्यात्तथा विक्रयमाधानं वा समुद्गादीनां* ॥ २४७—२४८ ॥

(मिता०) समुद्गेत्यादि । मुद्गं पिधानं मुद्गेन सह वर्तत इति (१)समुद्गं करण्डकं परिवर्तनं व्यत्यासः । योऽन्यदेव मुक्तानां पूर्णं करण्डकं दर्शयित्वा हस्तलाघवेनान्यदेव स्फटिकानां पूर्णं करण्डकं समर्पयति, यश्च सारभाण्डं कस्तूरिकादिकं कृत्रिमं कृत्वा विक्रयमाधिं वा नयति तस्य दण्डकल्पना वक्ष्यमाणा वेदितव्या । कृत्रिमकस्तूरिकादेर्मूल्यभूते पणे भिन्ने न्यूने । न्यूनपणमूल्य इति यावत् । तस्मिन् कृत्रिमे विक्रीते पञ्चाशत्पणो दण्डः । पणमूल्ये पुनः शतम् । द्विपणमूल्ये द्विशतो दण्ड इत्येवं मूल्यवृद्धौ दण्डवृद्धिरुन्नेया ॥२४७-२४८॥

सम्भूय कुर्वतामर्घं सबाधं कारुशिल्पिनाम् ॥
अर्घस्य ह्रासं वृद्धिं वा जानतां दम उत्तमः ॥ २४९ ॥
सम्भूय वणिजां पण्यमनर्घेणोपरुन्धताम् ॥
विक्रीणतां वा विहितो दण्ड उत्तमसाहसः ॥ २५० ॥

(वी०मी०) पीडाकरमर्घं धान्यादिमूल्यं सम्भूय कुर्वतां राजस्थापितस्याऽर्घस्य हानिं वृद्धिं वा कुर्वतां वणिजां पणसहस्रमितो दण्डो मुनिभिरुच्यते । अल्पमूल्ये बहुमूल्यं पण्यमुपरुन्धतां छद्मादीनां

* एतदनन्तरं स्वल्पोंऽशो व्याख्यायास्त्रुटित इत्यर्थानुसन्धानेन स्पष्टं प्रतीयते ।

(१) समुद्गशब्दः ख. पुस्तके सर्वत्र. ।

क्रीणतां बहुमूल्येनाऽल्पमूल्यं पण्यं विक्रीणतां चोत्तमसाहसो दण्डो विहितः ॥ २४९—२५०

(मिता०) वणिजः प्रत्याह —

संभूयेति । राजनिरूपितार्घस्य ह्रासं वृद्धिं वा जानन्तोऽपि वणिजः सम्भूय मिलित्वा कारूणां रजकादीनां शिल्पादीनां सबाधं पीडाकरमर्घान्तरं लाभलोभात्कुर्वन्तः पणसहस्रं दण्डनीयाः ॥२४९॥

(मिता०) किञ्च—

सम्भूयेति । ये पुनर्वणिजो मिलित्वा देशान्तरादागतं पण्यमनर्घेण हीनमूल्येन प्रार्थयमाना उपरुन्धन्ति महार्घेण वा विक्रीणते तेषामुत्तमसाहसो दण्डो विहितो मन्वादिभिः ॥ २५० ॥

(वी० मि०) अथैवं दण्डवर्जनं वृत्तिश्च तेषां कथं स्यादत आह राजनीत्यादिना—

राजनि स्थाप्यते योऽर्घः प्रत्यहं तेन विक्रयः ॥
क्रयो वा निःस्रवस्तस्माद्वणिजां लाभकृत् स्मृतः ॥ २५१ ॥

राजसन्निधौ तदनुमत्या वणिग्भिर्योऽर्घो व्यवस्थाप्यते, प्रत्यहं तेनार्घेण विक्रयः क्रयश्च वणिजां कार्यः । तस्मात्क्रेयविक्रेयाद्यो निर्गतः स्रवोऽवशेषः वृद्धिभाग इति यावत् स एव लाभकृद्वणिजां वृत्तेर्हेतुरित्यर्थः । अत्र विशेषमाह मनुः—

पञ्चरात्रे पञ्चरात्रे पक्षे मासे तथा गते ।
कुर्वीत चैषां प्रत्यक्षमर्घसंस्थापनं नृपः॥—॥ २५१ ॥

(वी० मि०) कीदृशः कुत्र पण्ये निःस्रव इत्यत्राह स्वदेशेति—

स्वदेशपण्ये तु शतं वणिग्गृह्णीत पञ्चकम् ॥
दशकं पारदेश्ये तु यः सद्यः क्रयविक्रयी ॥ २५२ ॥
पण्यस्योपरि संस्थाप्य व्ययं पण्यसमुद्भवम् ॥
अर्घोऽनुग्रहकृत्कार्यः क्रेतुर्विक्रेतुरेव च ॥ २५३ ॥

स्वदेश एव क्रीत्वा यदि विक्रीयते तत्र पण्ये शतपणमूल्यके पञ्चपणमितं, परदेशात् क्रीत्वानीय स्वदेशे विक्रीयमाणे तु तत्र दशपणमितं निःस्रवं वणिक् गृह्णीत यदि क्रयानन्तरमाचिरेणैव पण्यं विक्रीणीते । दूरदेशस्थत्वादिना चिरविक्रयविलम्बे तु दत्तपण्य-

मूल्योपरि पण्यानयनरक्षणादिसमुद्भवं व्ययं व्ययितं धनं संस्थाप्य मेलयित्वा मूल्यव्यययोर्मिलितयोः शतपणमूल्यकयोस्तु देशविदृशभेदेन पञ्चदशपणो यो निःस्रवो भवति तथा क्रेतुर्विक्रेतुश्चाऽनुग्रहकृदुपकारी अर्घो राज्ञा कार्यः । चकारात्पौरजनस्य समुच्चयः । एवकारेण राज्ञाऽर्घकरणे उपेक्षा व्यवच्छिद्यते । अत्र विषयान्तरेषु दण्डान्तराणि ग्रन्थगौरवभयान्न लिख्यन्ते ॥ २५२-२५३ ॥

इति श्रीमत्० याज्ञवल्क्यव्याख्याने साहसप्रकरणम् ॥

(मिता०) केन पुनरर्घेण पणितव्यमित्यत आह—

राजनीति । राजनि संनिहिते सति यस्तेनार्घः स्थाप्यते निरूप्यते तेनार्घेण प्रतिदिनं क्रयो विक्रयो वा कार्यः । निर्गतः स्रवो निःस्रवो विशे(१)षस्तस्माद्राजनिरूपितार्घाद्यो निस्रवः स एव वणिजां लाभकारी न पुनः स्वच्छन्दपरिकल्पितात् । मनुना चार्घकरणे विशेषो दर्शितः (८।४०२)—'पञ्चरात्रे पञ्चरात्रे पक्षे मासे तथा गते । कुर्वीत चैषां प्रत्यक्षमर्घसंस्थापनं नृपः' ॥ इति ॥ २५१ ॥

(मिता०) किञ्च—

स्वदेशपण्य इति । स्वदेशप्राप्तं पण्यं गृहीत्वा यो विक्रीणीते असौ पञ्चकं शतं पणशते पणपञ्चकं लाभं गृह्णीयात् । परदेशात्प्राप्ते पुनः पण्ये शतपणमूल्ये दशपणान्लाभं गृह्णीयात् । यस्य पण्यस्य ग्रहणदिवस एव विक्रयः सम्पद्यते । यः पुनः कालान्तरे विक्रीणीते तस्य कालोत्कर्षवशाल्ला(२)भोत्कर्षः कल्प्यः । एवं च यथार्घे निरूपिते पणशते पञ्चपणो लाभो भवति तथैवार्घो राज्ञा स्वदेशपण्यविषये स्थापनीयः ॥ २५२ ॥

(मिता०) पारदेश्यपण्येऽर्घनिरूपणप्रकारमाह—

पण्यस्येति । देशान्तरादागते पण्ये देशान्तरगमनप्रत्यागमनभाण्डग्रहणशुल्कादिस्थानेषु यावानुपयुक्तोऽर्थस्तावन्तमर्थं परिगणय्य पण्यमूल्येन सह मेलयित्वा यथा पणशते दशपणो लाभः सम्पद्यते तथा क्रेतृविक्रेत्रोरनुग्रहकार्यर्घो राज्ञा स्थापनीयः ॥ २५३ ॥

इति साहसप्रकरणम् ।

---

(१) अवशेषः घ. । (२) वशाल्लाभः कल्प्य. ग. ।

(वी० मि०) अथ—

विक्रीय पण्यं मूल्येन क्रेतुर्यन्न प्रदीयते ।
विक्रीयासम्प्रदानं तद्विवादपदमुच्यते ॥

इति नारदोक्तं विक्रीयासम्प्रदानं नाम विवादपदरूपं निरूपयति—

गृहीतमूल्यं यः पण्यं क्रेतुर्नैव प्रयच्छति ॥
सोदयं तस्य दाप्योऽसौ दिग्लाभं वा दिगागते ॥ २५४ ॥
विक्रीतमपि विक्रेयं पूर्वक्रेतर्यगृह्णति ॥
हानिश्चेत्क्रेतृदोषेण क्रेतुरेव हि सा भवेत् ॥ २५५ ॥
राजदैवोपघातेन पण्ये दो(१)ष उपागते ॥
हानिर्विक्रेतुरेवासौ याचितस्याऽप्रयच्छतः ॥ २५६ ॥
अन्यहस्ते च विक्रीतं दुष्टं वाऽदुष्टवद्यदि ॥
विक्रीयते दमस्तत्र मूल्यात्तु द्विगुणो भवेत् ॥ २५७ ॥

क्रेतृसकाशात्स्वयं गृहीतं मूल्यं यस्य तस्य तत्पण्यं विक्रेता चेत्क्रेतुर्न प्रयच्छति तदा सोदयं पण्यं तस्य क्रेतुरसौ दाप्यः । उदयश्चोक्तो नारदेन—

विक्रीय पण्यं मूल्येन यः क्रेतुर्न प्रयच्छति ।
स्थावरस्य क्षयं दाप्यो जङ्गमस्य क्रियाफलम् ॥

इति । क्षयमुपभोगः, क्रियाफलं शुश्रूषादिकम् । एवकारेण क्रेतुरनुशयाभावे सतीति विवक्षितम् । तस्याऽनुशये तु—

क्रीत्वा विक्रीय वा किंचिद्यस्येहाऽनुशयो भवेत् ।
सोऽन्तर्दशाहे तद् द्रव्यं दद्याच्चैवाददीत वा ॥

इति मनुवचनाद्व्यवस्था । नारदः—

अर्घाच्चेदेव हीयेत सोदयं पण्यमावहेत् ।
स्थायिनामेष नियमो दिग्लाभो दिग्विचारिणाम् ॥

विष्णुः-'गृहीतमूल्यं यः पण्यं क्रेतुर्वै दद्यात्तस्याऽसौ सोदयं दाप्यो राज्ञा च पणशतं दण्ड्यः' । विक्रीतमपि पण्यं पूर्वक्रेतरि परीक्षणकालोत्तरकालीनानुशयादिनाऽगृहीते सत्यन्यत्र विक्रीयमाणस्य तस्य यदा यस्य क्रेतृदोषेणाऽनवेक्षणादिना राजदैवकृतेनोपघातेन पण्य-

(१) दोषमुपागते—इति मु. पु. पाठः ।

दोषे जाते मूल्यहानिश्चेद्भवति तदा सा हानिः क्रेतुरेव । क्रेत्रा याचितस्य विक्रेतुः पण्यमप्रयच्छतः ततस्तु हानिर्विक्रेतुरेवेत्यर्थः । अपिर्विरोधे । एवकाराभ्यां विक्रेतुः क्रेतुश्च व्यवच्छेदः । हिशब्देन दोषस्य हेतुत्वमभिप्रैति । अनुशयं विनैव कार्यं व्यासङ्गादिना पूर्वक्रेतर्यगृह्णति मूल्यं गृहीत्वा यद्यन्यहस्ते पण्यं विक्रीतं सदोषं वा पण्यं प्रयच्छन्नदोषं यदि विक्रीतं तत्रोभयपण्यमूल्याद्द्विगुणो दमो भवेत् । चकारेण क्रेत्रेऽपि मूल्यात् द्विगुणं दातव्यमिति समुच्चीयते । तदाह नारदः—

> अन्यहस्ते तु विक्रीय योऽन्यस्मै तत्प्रयच्छति ।
> द्रव्यं तद्द्विगुणं दाप्यो विनयं तावदेव तु ॥
> दत्तमूल्यस्य पण्यस्य विधिरेष प्रकीर्तितः ।
> अदत्तेऽन्यत्र समयान्न विक्रेतुरविक्रयः ॥

तुशब्देन मूल्यमगृहीत्वा वाङ्मात्रविक्रीतं व्यवच्छिद्यते ॥२५४-२५७॥

(मिता०) प्रासङ्गिकं परिसमाप्याऽधुना विक्रीयासम्प्रदानं नाम प्रक्रमते । तत्स्वरूपं च नारदेनाभिहितम्—'विक्रीय पण्यं मूल्येन क्रेतुर्यन्न प्रदीयते । विक्रीयासम्प्रदानं तद्विवादपदमुच्यते' ॥ इति । तत्र विक्रेयद्रव्यस्य चराचरभेदेन द्वैविध्यमभिधाय पुनः षड्विधत्वं तेनैव प्रत्यपादि—'लोकेऽस्मिन्द्विविधं पण्यं जङ्गमं स्थावरं तथा । षड्विधस्तस्य तु बुधैर्दानादानविधिः स्मृतः ॥(१)गणितं तुलितं मेयं क्रियया रूपतः श्रिया'॥ इति । गणितं क्रमुकफलादि । तुलितं कनककस्तूरीकुङ्कुमादि । मेयं शाल्यादि । क्रियया वाहदोहादिरूपयोपलक्षितमश्वमहिष्यादि । रूपतः पण्याङ्गनादि । श्रिया दीप्त्या मरकतपद्मरागादीति ।

एतत्षट्प्रकारकमपि पण्यं विक्रीयासम्प्रयच्छतो दण्डमाह—

गृहीतमूल्यमिति । गृहीतं मूल्यं यस्य पण्यस्य विक्रेत्रा तद् गृतमूल्यं तद्यदि विक्रेता प्रार्थयमानाय स्वदेशवणिजे क्रेत्रे न समर्पयति तच्च पण्यं यदि क्रयकाले बहुमूल्यं सत्कालान्तरेऽल्पमूल्येनैव लभ्यते तदार्घह्रासकृतो य उदयो वृद्धिः पण्यस्य स्थावरजङ्गमात्मकस्य तेन सहितं पण्यं विक्रेता क्रेत्रे दापनीयः । यदा मूल्यह्रासकृतः पण्यस्योदयो नास्ति किन्तु क्रयकाले यावद्देवे(२)यतो मूल्यस्येयत्पण्यमिति

---

(१) गणितं क्रमुकफलादि, तुलितं कर्पूरादि ग. घ. । (२) यावद्देव यत इति बहुत्र पाठः ।

प्रतिपन्नं तावदेव तदा तत्पण्यमादाय तस्मिन्देशे विक्रीणानस्य यो लाभस्तेनोदयेन सहितं द्विकं त्रिकमित्यादिप्रतिपादितवृद्धिरूपोदयेन वा सहितं क्रेतृवाञ्छावशाद्दापनीयः। यथाह नारदः—'अर्घश्चे(१)द-वहीयेत सोदयं पण्यमावहेत्। स्थानिनामेष नियमो दिग्लाभं दिग्वि-चारिणाम्' ॥ इति । यदा त्वर्घमहत्त्वेन पण्यस्य न्यूनभावस्तदा तस्मि-न्पण्ये वस्त्रगृहादिके य उपभोगस्तदाच्छादनसुखनिवासादिरूपो विक्रेतुस्तत्सहितं पण्यमसौ दाप्यः। यथाह नारदः–'विक्रीय पण्यं मूल्येन यः क्रेतुर्न प्रयच्छति। स्थावरस्य क्षयं दाप्यो जङ्गमस्य क्रिया-फलम्' ॥ इति। विक्रेतुरुपभोगः क्षय उच्यते। क्रेतृसम्बन्धित्वेन क्षीय-माणत्वात्। न पुनः कुड्य(२)पातसस्यघातादिरूपः। तस्य तु–'उप-हन्येत वा पण्यं दह्येतापह्रियेत वा। विक्रेतुरेव सोऽनर्थो विक्रीयास-म्प्रयच्छतः' ॥ इत्यत्रोक्तत्वात्। यदा त्वसौ क्रेता देशान्तरात्पण्यग्र-हणार्थमागतस्तदा तत्पण्यमादाय देशान्तरे विक्रीणानस्य यो लाभस्तेन सहितं पण्यं विक्रेता क्रेत्रे दापयितव्यः। अयं च क्रीतपण्यसमर्पणनि-यमोऽनुशयाभावे द्रष्टव्यः। सति त्वनुशये 'क्रीत्वा विक्रीय वा कि-ञ्चिदि'त्यादि मनूक्तं वेदितव्यम् ॥ २५४ ॥

(मिता०) किञ्च—

विक्रीतमिति। यदा तु पुनर्जातानुशयः क्रेता पण्यं न जिघृक्षति तदा विक्रीतमपि पण्यमन्यत्र विक्रेयम्। यदा पुनर्विक्रेत्रा दीयमानं क्रेता न गृह्णाति तच्च पण्यं राजदैविकेनोपहतं तदा क्रेतुरेवासौ हानि-र्भवेत्। पण्याग्रहणरूपेण क्रेतृदोषेण नाशितत्वात् ॥ २५५ ॥

(मिता०) अपि च—

राजदैवेति। यदा पुनः क्रेत्रा प्रार्थ्यमानमपि पण्यं विक्रेता न सम-र्पयत्यजातानुशयोऽपि तच्च राजदैविकेनोपहतं भवति तदासौ हानि-र्विक्रेतुरेव। अतोऽन्यददुष्टं पण्यं विनष्ट(३)सदृशं क्रेत्रे देयम् ॥२५६॥

(मिता०) किञ्च—

अन्यहस्त इति। यः पुनर्विनैवानुशयमेकस्य हस्ते विक्रीतं पुनर-न्यस्य हस्ते विक्रीणीते सदोषं वा पण्यं प्रच्छादितदोषं विक्रीणीते तदा तत्पण्यमूल्याद्विगुणो दमो वेदितव्यः। नारदेनाप्यत्र विशेषो दर्शितः–'अन्यहस्ते च विक्रीय योऽन्यस्मै तत्प्रयच्छति। द्रव्यं तद्वि-

(१) श्चेदव. ख.। (२) कुड्यपास्यघातादि ख.। (३) सदृशं घ.।

गुणं दाप्यो विनयं तावदेव तु' ॥ इति । सर्वश्चायं विधिर्दत्तमूल्ये पण्ये द्रष्टव्यः । अदत्तमूल्ये पुनः पण्ये वाङ्मात्रक्रये क्रेतृविक्रेत्रोर्नियमकारिणः समयादृते प्रवृत्तौ निवृत्तौ वा न कश्चिद्दोषः । यथाह नारदः—'दत्तमूल्यस्य पण्यस्य विधिरेष प्रकीर्तितः । अदत्तेऽन्यत्र समयान्न विक्रेतुरविक्रयः' ॥ इति ॥ २५७ ॥

(वी० मि०) अथ क्रीतानुशयस्य प्रागुक्तस्य साधारणं प्रकृतं विक्रीयासंप्रदानधर्ममाह—

क्षयं वृद्धिं च वणिजा पण्यानामविजानता ॥
क्रीत्वा नानुशयः कार्यः कुर्वन् षड्भागदण्डभाक् ॥ २५८ ॥

वणिजा क्षयं पण्यस्य मूल्यापचयमजानता क्रीत्वा नानुशयः कार्यः । पण्यस्य मूल्यवृद्धिमजानता च विक्रीय नानुशयः कार्यः । एवमविजानन्नेवाऽनुशयं कुर्वन् पण्यमूल्यषष्ठांशदण्डभाक् भवति । चकारेण क्षयवृद्धिज्ञानेऽनुशयः कार्यो न तत्र विक्रीयेति वा समुच्चीयते । बृहस्पतिः—

मत्तोन्मत्तेन विक्रीतं हीनमूल्यं भवेन्न वा ।
अस्वतन्त्रेण मूल्येन त्याज्यं तस्य पुनर्हरेत् ॥

तस्य क्रेतुस्त्याज्यं पुनर्विक्रेता हरेदिति सम्बन्धः ॥ २५८ ॥

इति श्रीमित्र० याज्ञवल्क्यव्याख्याने विक्रीयासंप्रदानप्रकरणम् ॥

(मिता०) विक्रयानुशयोऽभिहितः क्रीतानुशयस्वरूपं तु प्राक् प्रपञ्चितम् । अधुना तदुभयसाधारणं धर्ममाह—

क्षयमिति । परीक्षितक्रीतपण्यानां क्रयोत्तरकालं क्रयकालपरिमाणतोऽर्धकृतां वृद्धिमपश्यता क्रेत्रा अनुशयो न कार्यः, विक्रेत्रा च महार्घनिबन्धनं पण्यक्षयमपश्यता नानुशयितव्यम् । वृद्धिक्षयपरिज्ञाने पुनः क्रेतृविक्रेत्रोरनुशयो भवतीति व्यतिरेकादुक्तं भवति । अनुशयकालावधिस्तु नारदेनोक्तः—'क्रीत्वा मूल्येन यत्पण्यं दुष्क्रीतं मन्यते क्रयी । विक्रेतुः प्रतिदेयं तत्तस्मिन्नेवाह्न्यविक्षतम् ॥ द्वितीयेऽह्नि ददत्क्रेता मूल्यात्त्रिंशांशमावहेत् । द्विगुणं तु तृतीयेऽह्नि परतः क्रेतुरेव तत्' ॥ इति । अपरीक्षितक्रयविक्रये पुनः पण्यवैगुण्यनिबन्धनानुशयावधिर्दशैकपञ्चसप्ताहेत्यादिना दर्शित एव । तदनया वाचोयुक्त्या वृद्धिक्षयपरिज्ञानस्यानुशयकारणत्वमवगम्यते । यथा

गण्यपरीक्षाविधिवलात्पण्यदोषाणामनुशयकारणत्वम् ।

अतः पण्यदोषतद्वृद्धिक्षयकारणत्रितयाभावेऽनुशयकालाभ्यन्तरेऽपि यद्यनुशयं करोति तदा पण्यषड्भागं दण्डनीयः । अनुशयकारणसद्भावेऽप्यनुशयकालातिक्रमेणानुशयं कुर्वतोऽप्ययमेव दण्डः । उपभोगेनाविनश्वरेषु स्थिरार्घेष्वनुशयकालातिक्रमेणानुशयं कुर्वतो मनूक्तो दण्डो द्रष्टव्यः (८।२२३)—'परेण तु दशाहस्य न दद्यान्नापि दापयेत् । आददानो ददच्चैव राज्ञा दण्ड्यः शतानि षट्' ॥इति २५८॥

इति विक्रीयासंप्रदानं नाम प्रकरणम् ।

(वी० मि०) अथ सम्भूयसमुत्थानं नाम विवादपदमुपक्रमते—

समवायेन वणिजां लाभार्थं कर्म कुर्वताम् ॥
लाभालाभौ यथाद्रव्यं यथा वा संविदा कृतौ ॥ २५९ ॥

लाभार्थं मिलित्वा कर्म कुर्वतां वणिजां मूल्यद्रव्यसंख्यानुसारेण लाभापचयौ भवतः । यथा वा संविदा व्यवस्थया विषयीकृतौ लाभालाभौ तथा वणिङ्नटादीनां तौ भवतः ॥ २५९ ॥

(मिता०) संभूयसमुत्थानं नाम विवा(१)दपदमिदानीमभिधीयते—

समवायेनेति । सर्वे वयमिदं कर्म मिलिताः कुर्म इत्येवंरूपा संप्रतिपत्तिः समवायः तेन ये वणिङ्नटनर्तकप्रभृतयो लाभलिप्सवः प्रातिस्विकं कर्म कुर्वते तेषां लाभालाभावुपचयापचयौ यथाद्रव्यं येन यावद्धनं पण्यग्रहणार्थं दत्तं तदनुसारेणावसेयौ । यद्वा—प्रधानगुणभावपर्यालोचनयास्य भागद्वयमस्यैको भाग इत्येवंरूपया संविदा समयेन यथा संप्रतिपन्नस्तथा वेदितव्यः ॥ २५९ ॥

(वी० मि०) समुदायमध्ये एकेन द्रव्यस्य विनाशे रक्षणे वा व्यवस्थामाह—

प्रतिषिद्धमनादिष्टं प्रमादाद्यच्च नाशितम् ॥
स तद्दद्याद्विप्लवाच्च रक्षितादृशमांशभाक् ॥ २६० ॥

सम्भूय कर्म कुर्वतां पण्ये पण्यमिदमित्थं न व्यवहर्तव्यमित्यादे-

---

(१) पदमधुना समभिधाति घ ।

शाविषयीभूतं च यत्पण्यमिदमित्थं न व्यवहर्तव्यमिति प्रतिषिद्धमित्थं व्यवहर्तव्यमित्यादेशभूतं च यत्पण्यमेकेनाऽज्ञत्वान्नाशितं तत्स एको दद्यात्, यश्च समुदायान्तर्गतः। चौरादिकृतविप्लवादेको रक्षति स पण्यस्य दशमांशं लभत इत्यर्थः। आद्यचकारेण यदि सर्वेषामेव प्रमादेन नाशितं तदांऽशक्रमेणैव क्षयः कल्पनीयो यथांशत इति । द्वितीयचकारेण रक्षितुर्मरणे तत्पुत्रो दशमांशं लभत इति समुच्चीयते ।

एकस्य चेत्स्याद्व्यसनं दायादोऽस्य तदाप्नुयात् ।

इति नारदवचनात् ॥ २६० ॥

(मिता०) किञ्च—

प्रतिषिद्धमिति । तेषां सम्भूय प्रचरतां मध्ये पण्यमिदमित्थं न व्यवहर्तव्यमिति प्रतिषिद्धमाचरता यन्नाशितमनादिष्टमननुज्ञातं वा कुर्वाणेन तथा प्रमादात्प्रज्ञाहीनतया वा येन यन्नाशितं स तत्पण्यं वणिग्भ्यो दद्यात् । यः पुनस्तेषां मध्ये चौरराजादिजनिताद्व्यसनात्पण्यं पालयति स तस्माद्रक्षितात्पण्याद्दशममंशं लभते ॥ २६० ॥

(वी० मि०) अंशभागित्वप्रसङ्गेन राज्ञोऽशभागित्वमाह—

अर्घप्रक्षेपणाद्विंशं भागं शुल्कं नृपो हरेत् ॥

व्यासिद्धं राजयोग्यं च विक्रीतं राजगामि तत् ॥ २६१ ॥

अर्घप्रक्षेपणाद्विंशं भागं नृपो हरेत् । मूल्यस्य नृपो गृह्णीयादित्यर्थः। केचित्तु राज्ञा भागो न ग्राह्यः, किन्तु पण्यमेव तन्मूल्यं वा सम्पूर्णं राज्ञा ग्राह्यमित्याहुः। व्यासिद्धमिदमत्र न विक्रेयमिति प्रतिषिद्धं राज्ञा यत्पण्यं तत्र विक्रीतं राजयोग्यं च मत्तगजादिकमप्रतिषिद्धमपि राजानुमत्या विना विक्रीतमन्यत्र तद्राजगामि राज्ञा ग्राह्यं भवति मूल्यदानमन्तरेणैवेत्यर्थः ॥ २६१ ॥

(मिता०) अर्घेति । इयतः पण्यस्येयन्मूल्यमित्यर्घस्तस्य प्रक्षेपणात् राजतो निरूपणाद्धेतोरसौ मूल्याद्विंशतितममंशं शुल्कार्थं गृह्णीयात् । यत्पुनर्व्यासिद्धमन्यत्र न विक्रेयमिति राज्ञा प्रतिषिद्धं य(१)च्च राजयोग्यं मणिमाणिक्याद्यप्रतिषिद्धमपि तद्राज्ञेऽनिवेद्य लाभलोभेन विक्रीतं चेद्राजगामि मूल्यदाननिरपेक्षं तत्सर्वं पण्यं राजापहरेदित्यर्थः ॥ २६१ ॥

---

(१) यद्राजयोग्यं ख ।

(वी० मि०) राज्ञोऽप्रदाने प्रतिकूलस्य दण्डमाह—

मिथ्या वदन् परीमाणं शुल्कस्थानादपासरन् ॥
दाप्य(१)श्चाष्टगुणं यश्च स व्याजक्रयविक्रयी ॥ २६२ ॥

शुल्कवञ्चनार्थं पण्यस्य वस्त्रमुक्तादेः परीमाणं मिथ्या वदन् शुल्कस्थानादपासरन् वा इदं मयाऽत्र स्थाप्यते न तु क्रीयते विक्रीयत इति वञ्चयित्वा क्रयविक्रयकारी च वणिक् पण्यादष्टगुणं दण्डं दाप्यः । चकाराभ्यां शत्रन्तप्रतिपाद्यस्य व्याजक्रयविक्रयिणश्च प्रत्येकं दण्डनिमित्तत्वं द्योतयति ॥ २६२ ॥

(मिता०) मिथ्येति । यः पुनर्वणिक् शुल्कवञ्चनार्थं पण्यपरिमाणं निन्हुते शुल्कग्रहणस्थानाद्वापसरति यश्चास्येदमस्येदं वेत्येवं विवादास्पदीभूतं पण्यं क्रीणाति विक्रीणीते वा ते सर्वे पण्यादष्टगुणं दण्डनीयाः ॥ २६२ ॥

(वी० मि०) शुल्कमप्रयच्छतो वणिज इवाऽसमुचितं शुल्कं गृह्णतोऽपि राजाधिकृतस्य दण्ड इत्यभिदधानस्तत्तुल्यापराधेऽपि दण्डमाह—

तरिकः स्थलजं शुल्कं गृह्णन् दाप्यः पणान् दश ॥
ब्राह्मणप्रातिवेश्यानामेतदेवाऽनिमन्त्रणे ॥ २६३ ॥

तरिको जलशुल्काधिकृतः अर्धप्रक्षेपणाद्विंशमिति प्रागुक्तं स्थलजं शुल्कं गृह्णाति यः स दशपणान्दण्डं दाप्यः। प्रतिवेशः स्ववेश्मसन्निहितं वेश्म तत्रस्था ये ब्राह्मणास्ताननिमन्त्रणकार्येऽपि निमन्त्रयन् दशपणमितमेव दण्डं दाप्यः । चकारेण तदीयनिमन्त्रणं स्वीकुर्वन्निति समुच्चीयते । जलशुल्कमाह मनुः—

पणं यानं तरे दाप्यः पौरुषेऽर्धपणं तरे ।
पादं पशुश्च योषिच्च पादार्धं रिक्तकः पुमान् ॥
भाण्डपूर्णानि यानानि तार्यं दाप्यानि सारतः ।
रिक्तभाण्डानि यत्किञ्चित्पुमांसश्चाऽपरिच्छदाः ॥

पुरुषो भारवाहः । अत्र शुल्कद्वयेऽपि विशेषः—

न भिन्नकार्षापणमस्ति शुल्कं न शिल्पवृत्तौ न शिशौ न दूते ।

---

(१) दाप्यस्त्वष्ट० इति मु. पु. पाठः ।

न भैक्षलब्धे न हृतावशेषे न श्रोत्रिये प्रव्राजिते न यज्ञे ॥
इति ॥ २६३ ॥

(मिता०) अपि च—

तरिक इति। शुल्कं हि द्विविधं-स्थलजं जलजं च। तत्र स्थलजमर्घप्रक्षेपणाद्विंशं भागं शुल्कं नृपो हरेदित्यत्रोक्तम्। जलजं तु मानवेऽभिहितम् (८।४०४।५।७।)-'पणं यानं तरे दाप्यः पौरुषेऽर्धपणं तरे। पादं पशुश्च योषिच्च पादार्धं रिक्तकः पुमान्॥ भाण्डपूर्णानि यानानि तार्यं दाप्यानि सारतः। रिक्तभाण्डानि यत्किंचित्पुमांसश्चापरिच्छदाः' ॥ (१)'गर्भिणी तु द्विमासादिस्तथा प्रव्रजितो मुनिः। ब्राह्मणा लिङ्गिनश्चैव न दाप्यास्तारिकं तरे' ॥ इति। शुल्कद्वयेऽप्ययमपरो विशेषः—'न भिन्नकार्षापणमस्ति शुल्कं न शिल्पवृत्तौ न शिशौ न दूते। न भैक्षलब्धे न हृतावशेषे न श्रोत्रिये प्रव्रजिते न यज्ञे' ॥ इति। तीर्यतेऽनेनेति (२)तरिः नावादिः तज्जन्यशुल्केऽधिकृतस्तरिकः स यदा स्थलोद्भवं शुल्कं गृह्णाति तदा दशपणान्दण्डनीयः। वेशो वेश्म, प्रतिवेश इति स्ववेश्माभिमुखं स्ववेश्मपार्श्वस्थं चोच्यते। तत्र भवाः प्रातिवेश्याः ब्राह्मणाश्च ते प्रातिवेश्याश्च ब्राह्मणप्रातिवेश्याः तेषां श्रुतवृत्तसंपन्नानां श्राद्धादिषु विभवे सत्यनिमन्त्रणे एतदेव दशपणात्मकं दण्डनं वेदितव्यम् ॥ २६३ ॥

(वी० मि०) सम्भूय कर्म कुर्वतां मध्ये यद्येको म्रियते तदीयोंऽशस्तदा केन ग्राह्य इत्यत आह—

देशान्तरगते प्रेते द्रव्यं दायादबान्धवाः ॥
ज्ञातयो वा हरेयुस्तदागतास्तैर्विना नृपः ॥ २६४ ॥

देशान्तरस्थे सम्भूय कारिणि मृते तदीयमंशं तत्पुत्राद्यास्तन्मातृस्वस्रेयादयस्तत्सपिण्डा वा यथाधिकारं तत्रागता द्रव्यं गृह्णीयुः। वाशब्देन विकल्पः पौर्वापर्यं च समुच्चीयते। अन्यथा सर्वं राज्ञो भवति ॥ २६४ ॥

(मिता०) देशान्तरमृतवणिग्रिक्थं प्रत्याह—

देशान्तरगत इति। यदा सम्भूयकारिणां मध्ये यः कश्चिद्देशान्तरगतो मृतस्तदा तदीयमंशं दायादाः पुत्राद्यपत्यवर्गो बान्धवाः

---

(१) 'गर्भिणी'त्यादि पद्यं क्वचिन्नास्ति। (२) तरो नावादि· घ।

मातृपक्षा मातुलाद्याः ज्ञातयोऽपत्यवर्गव्यतिरिक्ताः सपिण्डा वा आगताः सम्भूयव्यवहारिणो ये देशान्तरादागतास्ते वा गृह्णीयुः । तैर्विना दायादाद्यभावे राजा गृह्णीयात् । वाशब्देन च दायादानां वैकल्पिकमधिकारं दर्शयति । पौर्वापर्यनियमश्च 'पत्नी दुहितर' इत्यादिना प्रतिपादित एवात्रापि वेदित(१)व्यः । शिष्यसब्रह्मचारिब्राह्मणनिषेधो वणिक्प्राप्तिश्च वचनप्रयोजनम् । वणिजामपि मध्ये यः पिण्डदानर्णदानादिसमर्थः स गृह्णीयात् । सामर्थ्याविशेषे पुनः सर्वे वणिजः संसृष्टिना विभज्य गृह्णीयुः । तेषामप्यभावे दशवर्षं दायादाद्यागमनं प्रतीक्ष्यानागतेषु स्वयमेव राजा गृह्णीयात् । तदिदं नारदेन स्पष्टीकृतम्—'एकस्य चेत्स्यान्मरणं दायादोऽस्य तदाप्नुयात् । अन्यो वाऽसति दायादे शक्ताश्चेत्सर्व एव ते ॥ तदभावे तु गुप्तं त(२)त्कारयेद्दश वत्सरान् । अस्वामिकमदायादं दशवर्षस्थितं ततः । राजा तदात्मसात्कुर्यादेवं धर्मो न हीयते' ॥ इति ॥ २६४ ॥

(वी०मि०) को नाम स्वमंशं न लभत इत्यत आह—

जिह्मं त्यजेयुर्निर्लाभमशक्तोऽन्येन कारयेत् ॥

जिह्मो वञ्चकः वञ्चनया समुदायकार्यानिष्पादकः तं लाभशून्यं त्यजेयुर्बहिःकुर्युः । यदि त्वेकोऽसमर्थस्तदा स्वकर्तव्यमन्यद्वारा कारयेन्न तु वञ्चनां कुर्यादित्यर्थः ॥

(मिता०) जिह्ममिति । जिह्मो वञ्चकः तं निर्गतलाभं लाभमाच्छिद्य त्यजेयुर्बहिः कुर्युः । यश्च सम्भूयकारिणां मध्ये भाण्डप्रत्यवेक्षणादिकं कर्तुमसमर्थोऽसावन्येन स्वं कर्म भाण्डभारवाहनं तदायव्ययपरीक्षणादिकं कारयेत् ॥

(वी०मि०) लाभालाभावित्यादिकमुक्तं वणिग्धर्ममृत्विगादिष्वतिदिशति—

अनेन विधिराख्यात ऋत्विक्कर्षककर्मणाम् ॥ २६५ ॥

अनेन प्रागुक्तप्रकारकथनेन ऋत्विजां होत्रादीनां, कर्षकाणां कृषिकारिणां, कर्मिणां शिल्पनृत्यादिकर्मकारिणां विधिः प्रकार आख्यातः। ऋत्विजां धनविभागे विशेषमाह मनुः—

सर्वेषामर्धिनो मुख्या द्वितीयास्तु तदर्द्धिनः ।

(१) विज्ञेयः घ । (२) तद्धारयेत् घ. ।

तृतीयिनस्तृतीयास्तु चतुर्थांश्चैकपादिनः ॥

'ज्योतिष्टोमेतं शतेन दीक्षयन्ती'ति श्रूयते । तेन शतं गावो दक्षिणा विहिताः । तत्र षोडशर्त्विजां मध्ये ये मुख्याश्चत्वारो होत्राध्वर्युब्रह्मोद्गातारस्ते न्यूनार्द्धभागिनः, अग्रभागानुरोधात्तेन तेभ्यश्चतुर्भ्योऽष्टचत्वारिंशतं गावः । द्वितीयाश्चत्वारो मैत्रावरुणप्रतिप्रस्थातृब्राह्मणाच्छंसिप्रस्तोतारस्तदर्द्धिनश्चतुर्विंशतिगोभागिनः । तृतीया अच्छावाकनेष्ट्राग्नीध्रप्रतिहर्तारश्चत्वारस्तृतीयिनः अष्टचत्वारिंशतृतीयांशभागिनः, तेन तेषां षोडश गावः । चतुर्थाश्च ग्रावस्तुदुन्नेतृपोतृसुब्रह्मण्यास्ते मुख्यभागचतुर्थांशभागिनः । तेन तेभ्यो द्वादश गावो देयाः । तथा—

यस्य कर्मणि यास्तु स्युरुक्ताः प्रसङ्गदक्षिणः ।
स एव ता आददीत भजेरन् सर्व एव वा ॥

'हिरण्मयौ प्रकाशावध्वर्यवे ददाती'त्यादिना या अभिषेचनीयादिदक्षिणा यत्सम्बन्धित्वेनोक्तास्तेनैव ग्राह्या न तु तत्र विभाग इत्यर्थः । शङ्खलिखितौ—'अथ ऋत्विजि वृते पश्चादन्यं वृणुयात्, पूर्ववृतस्यैव दक्षिणा, पश्चाद्वृतः किञ्चिल्लभेत प्रवसेच्चेत्तत्कालं, निमित्तं चाऽपक्षेमाणस्तत्कालमुदीक्षेत, नान्तरायं यजेत्तस्मादत्ययिका वा तं क्रतुं समापयेत्, प्रोष्य प्रत्यागतश्च किंचिल्लभेताऽथ चेत्प्रसिद्धः प्रवसेत्कामादनुप्राप्ते स धनं ऋत्विक् शतं दण्ड्यः' । मनुः—

दक्षिणासु च दत्तासु स्वकर्म परिहारयन् ।
कृत्स्नमेवं लभेतांशमन्येनैव तु कारयेत् ॥

अन्येन पुत्रादिना । बृहस्पतिः—

समवेतैस्तु यद्दत्तं प्रार्थनीयं तथैव तत् ।
न याचतेऽत्र यः कश्चिल्लाभात्स परिहीयते ॥

तथा—

बाह्यबीजात्पराद्यस्य क्षेत्रहानिः प्रजायते ।
तेनैव सा प्रदातव्या सर्वेषां क्षेत्रकारिणाम् ॥

यस्य सामग्र्या क्षेत्रहानिस्तेनैव सा देयेत्यर्थः । तथा—

हेमकारादयो यत्र शिल्पं सम्भूय कुर्वते ।
कर्मानुरूपं निर्वेशं लभेयुस्ते यथांशतः ॥

निर्वेशो भृतिः । कात्यायनः—

शिक्षकाभिज्ञकुशला आचार्यश्चेति शिल्पिनः ।
एकद्वित्रिचतुर्थांशान् हरेयुस्ते यथोत्तरम् ॥

बृहस्पतिः—

नर्तकानामेष धर्मो धर्मविद्भिरुदाहृतः ।
तालज्ञो लभतेऽध्यर्धं गायनास्तु समांशिनः ॥

अध्यर्द्धं सार्द्धम् ॥ २६५ ॥

इति श्रीमत्० याज्ञवल्क्यव्याख्याने सम्भूयसमुत्थानप्रकरणम् ॥

(मिता०) प्रागुपदिष्टं वणिग्धर्ममृत्विगादिष्वतिदिशति—

अनेनेति । अनेन लाभालाभौ यथाद्रव्यमित्यादिवणिग्धर्मकथनेन ऋत्विजां होत्रादीनां कृषिवलानां नटनर्तकतक्षादीनां च शिल्पकर्मोपजीविनां विधिर्वर्तनप्रकार आख्यातः । तत्र च ऋत्विजां धनविभागे विशेषो मनुना दर्शितः (८।२१०) 'सर्वेषामर्धिनो मुख्यास्तदर्धेनार्धिनोऽपरे । तृतीयिनस्तृतीयांशाश्चतुर्थांशाश्च पादिनः' ॥ इति । अस्यायमर्थः-'ज्योतिष्टोमे तं शतेन दीक्षयन्ती'ति (१)वचनेन गवां शतमृत्विगानतिरूपे दक्षिणाकार्ये विनियुक्तम् । ऋत्विजश्च होत्रादयः षोडश । तत्र कस्य कियानंश इत्यपेक्षायामिदमुच्यते । सर्वेषां होत्रादीनां षोडशर्त्विजां मध्ये ये मुख्याश्चत्वारो होत्रध्वर्युब्रह्मोद्गातारः ते गोशतस्यार्धिनः सर्वेषां भागपूरणोपपत्तिवशादष्टाचत्वारिंशद्रूपार्धेनार्धभाजः । अपरे मैत्रावरुणप्रतिप्रस्थातृब्राह्मणाच्छंसिप्रस्तोतारस्तदर्धेन तस्य मुख्यांशस्यार्धेन चतुर्विंशतिरूपेणार्धभाजः । ये पुनस्तृतीयिनः अच्छावाकनेष्ट्राग्नीध्रप्रतिहर्तारस्ते तृतीयिनो मुख्यस्यांशस्य षोडशगोरूपेण तृतीयांशेन तृतीयांशभाजः । ये तु पादिनः ग्रावस्तुदुन्नेतृपोतृसुब्रह्मण्यास्ते मुख्यभागस्य यश्चतुर्थांशो द्वादशगोरूपस्तद्भाजः । ननु कथमयमंशनियमो घटते, न तावदत्र (२)समयो नापि द्रव्यसमवायो नापि वचनं यद्वशादीदृग्भागनियमः स्यात् । अतः 'समं स्यादश्रुतत्वा'दिति न्यायेन सर्वेषां समांशभाक्त्वं कर्मानुरूपेण चांशभाक्त्वमिति युक्तम् । अत्रोच्यते-ज्योतिष्टोमप्रकृतिक-

---

(१) वचने गवा. घ । (२) नियमो घ ।

द्वादशाहेऽर्धिनस्तृतीयिनः पादिन इति सिद्धवदनुवादो न घटते, यदि तत्प्रकृतिभूते ज्योतिष्टोमे अर्धतृतीयचतुर्थांशभाक्त्वं मैत्रावरुणादीनां न स्यात्। अतो वैदिकर्द्धिप्रभृतिसमाख्यावलात्प्रागुक्तोंऽशनियमोऽवकल्प्यत इति निरवद्यम् ॥ २६५ ॥

इति सम्भूयसमुत्थानप्रकरणम् ।

(वी०मि०) स्तेयविवादपदं निरूपयति प्रकरणेन । तत्रादौ चौरज्ञानोपायमाह—

ग्राहकैर्गृह्यते चौरो लोप्त्रेणाऽथ पदेन वा ॥
पूर्वकर्मापराधी च तथैवा(१)ऽशुद्धवासकः ॥ २६६ ॥
अन्येऽपि शङ्कया ग्राह्या नामजात्यादि(२)निन्हवैः ॥
द्यूतस्त्रीपानसक्ताश्च शुष्कभिन्नमुखस्वराः ॥ २६७ ॥
परद्रव्यगृहाणां च पृच्छका गूढचारिणः ॥
निराया व्ययवन्तश्च विनष्टद्रव्यविक्रयाः ॥ २६८ ॥
गृहीतः शङ्कया चौर(३) आत्मानं चेन्न शोधयेत् ॥
दापयित्वा हृतं द्रव्यं चौरदण्डेन दण्डयेत् ॥ २६९ ॥

ग्राहकैश्चौरग्रहणाधिकृतैः राजपुरुषैरन्येन धनस्वाम्यादिना वा लोप्त्रेणाऽपहृतभाण्डादिना चौर्यचिन्हेन अपहरणदेशे चौरत्वाभिमतचरणदर्शनचिन्हेन वा चौरो गृह्यते चौरत्वेन निश्चीयते । यश्च पूर्वकर्मणा चौर्यरूपेण कृतापराध आसीत्, यश्चाऽनिश्चितवासस्थलः सोऽपि गृह्यते चौर्यकारित्वेन शङ्क्यते । न केवलमेतावदेव द्वौ शङ्कया ग्राह्याः । द्यूतादिसक्ताः कस्त्वमिति प्रश्ने शुष्कमुखा घर्घरस्वराः परकीयाणां द्रव्याणां गृहाणां वा प्रश्नकर्तारः आत्मानं गूहयित्वा सञ्चरन्त आयव्यतिरेकेऽपि बहुव्ययकर्तारोऽविज्ञानस्वामिकजीर्णवस्त्रभाजनादीनां विक्रयकर्तारश्च चौर्यशङ्कया विपयीकर्तव्याः । शङ्कया विपयीकृतश्च यदि साक्षिदिव्यादिना नात्मानमचौरत्वेन निश्चीययति तदा हृतं द्रव्यं स्वामिने दापयित्वा चौरदण्डेन उत्तमसाहस-

---

(१) तथा-चाशुद्ध-इति मु० पु० पाठः । (२) जातिनामादि-इति मु०पु०पाठः ।
(३) चौर्ये नात्मानं चेद्विशोधयेत्-इति मु०पु०पाठः ।

दिना वक्ष्यमाणेन तं दण्डयेत्। अथशब्देन लोप्त्रलाभानन्तर्यार्थकेन तदसत्त्व एव पदचिन्हाद्यनुसरणमिति सूचयति । चकाराच्चौरप्रीतं तथाशब्देन निश्चितकुलादिकं च समुच्चिनोति । एवकारः पूर्वार्द्धेऽन्वितोऽन्यकोटिव्यवच्छेदार्थकतया निश्चयबोधनार्थः । अपिकारेण चकारैश्च चौरभक्ताश्रयदानादिकारिणो नानास्मृत्युक्तान् बहून् समुच्चिनोति ॥ २६६—२६९ ॥

(मिता०) इदानीं स्तेयं प्रस्तूयते । तल्लक्षणं च मनुनाभिहितम् (८-३३२)—'स्यात्साहसं त्वन्वयवत्प्रसभं कर्म यत्कृतम् । निरन्वयं भवेत्स्तेयं कृत्वा(१)पह्नुवते च यत्' ॥ इति । अन्वयवत् द्रव्यरक्षिराजाध्यक्षादिसमक्षम् । प्रसभं बलावष्टम्भेन यत्परधनहरणादिकं क्रियते तत्साहसम् । स्तेयं तु तद्विलक्षणं निरन्वयं द्रव्यस्वाम्याद्यसमक्षं वञ्चयित्वा यत्परधन(२)हरणं तदुच्यते । यच्च सान्वयमपि कृत्वा न मयेदं कृतमिति भयान्निह्नुते तदपि स्तेयम् । नारदेनाप्युक्तम्—'उपायैर्विविधैरेषां छलयित्वापकर्षणम् । सुप्तमत्तप्रमत्तेभ्यः स्तेयमाहुर्मनीषिणः' ॥ इति ।

तत्र तस्करग्रहणपूर्वकत्वाद्दण्डस्य, ग्रहणस्य ज्ञानपूर्वकत्वात् ज्ञानोपायं तावदाह—

ग्राहकैरिति । यश्चौरोऽयमिति जनैर्विख्याप्यते असौ ग्राहकै राजपुरुषैः स्थानपालप्रभृतिभिर्ग्रहीतव्यः । लोप्त्रेणापहृतभाजनादिना वा चौर्यचिह्नेन नाशदिवसादारभ्य चौर्यपदानुसारेण वा ग्राह्यः । यश्च पूर्वकर्मापराधी प्राक् प्रख्यातचौर्यः । अशुद्धोऽप्रज्ञातो वासः स्थानं यस्यासावशुद्धवासकः सोऽपि ग्राह्यः ॥ २६६ ॥

(मिता०) किञ्च—

अन्येऽपीत्यादि । न केवलं पूर्वोक्ता ग्राह्याः किन्त्वन्येऽपि वक्ष्यमाणैर्लिङ्गैः शङ्कया ग्राह्याः । जातिनिह्नवेन नाहं शूद्र इत्येवंरूपेण, नामनिह्नवेन नाहं ल(३)पित्थ इत्येवंरूपेण, आदिग्रहणात्स्वदेशग्रामकलापेन च लक्षिता ग्राह्याः । द्यूतपण्याङ्गनामद्यपानादिव्यसनेष्वतिप्रसक्तास्तथा कुतस्त्योऽसि त्वमिति चौरग्राहिभिः पृष्टो यदि शुष्कमुखो भिन्नस्वरो वा भवति तर्ह्यसावपि ग्राह्यः । बहुवचनात्स्विन्नललाटादीनां ग्रहणम् । तथा ये निष्कारणं कियदस्य धनं किं वास्य

(१) पन्हूयते च यत् घ । (२) ग्रहणं घ। (३) डित्थ इत्येव घ ।

(१)गूहमिति पृच्छन्ति ये च वेषान्तरधारणेनात्मानं गूहयित्वा चरन्ति ये चाऽऽयाभावेऽपि बहुव्ययकारिणः ये वा विनष्टद्रव्याणां जीर्णवस्त्रभिन्नभाजनादीनामविज्ञातस्वामिकानां विक्रायकास्ते सर्वे चौरसंभावनया ग्राह्याः। एवं नानाविधचौर्यलिङ्गान् पुरुषान् गृहीत्वा एते चौराः किं वा साधव इति सम्यक्परीक्षेत न पुनर्लिङ्गदर्शनमात्रेण चौर्यनिर्णयं कुर्यात्। अचौरस्यापि लोप्त्रादिचौर्यलिङ्गसम्बन्धसम्भवात्। यथाह नारदः—'अन्यहस्तात्परिभ्रष्टमकामादुत्थितं भुवि। चोरेण वा प(५)रिक्षिप्तं लोप्त्रं यत्नात्परीक्षयेत्' ॥ तथा—'असत्याः सत्यसङ्काशाः सत्याश्चासत्यसंनिभाः। दृश्यन्ते विविधा भावास्तस्माद्युक्तं परीक्षणम्' ॥ इति ॥ २६७—२६८ ॥

(मिता०) एवं चौर्यशङ्कया गृहीतेनात्मा संशोधनीय इत्याह—

गृहीत इति। यदि चौर्यशङ्कया गृहीतस्तन्निस्तरणार्थमात्मानं न शोधयति तर्हि वक्ष्यमाणधनदापनवधादिदण्डभाग् भवेत्। अतो मानुषेण तदभावे दिव्येन वा आत्मा शोधनीयः। ननु नाहं चौर इति मिथ्योत्तरे कथं प्रमाणं सम्भवति, तस्याभावरूपत्वात्। उच्यते—दिव्यस्य तावद्भावाभावगोचरत्वं 'रुच्याऽवान्यतरः कुर्या'दित्यत्र प्रतिपादितम्। मानुषं पुनर्यद्यपि साक्षाच्छुद्धमिथ्योत्तरे न सम्भवति तथापि कारणसंसृष्टे भावरूपमिथ्याकारणसाधनमुखेनाऽभावमपि गोचरयत्येव। यथा नाशापहारकाले अहं देशान्तरस्थ इत्यभियुक्तैर्भाविते चौर्याभावस्याप्यर्थात्सिद्धेः शुद्धिर्भवत्येव ॥ २६९ ॥

(वी०मि०) न केवलं शङ्कया गृहीत एव दण्डनीयः किन्तु निश्चितचौर्योऽपि न वोत्तमसाहसादिर्धनरूप एव दण्डः किन्तु वधप्रवासनादिरपि चौरस्येत्याह—

चौरं प्रदाप्याऽपहृतं घातयेद्विविधैर्वधैः ॥
सचिह्नं ब्राह्मणं कृत्वा स्वराष्ट्राद्विप्रवासयेत् ॥ २७० ॥

विविधैर्वधैः शूलारोपणकरच्छेदादिभिर्वक्ष्यमाणैर्वधोपायैर्यादृशेश्चौर्ये वधोऽन्येषां, तादृशे ब्राह्मणान् ललाटे स्वपदेनाङ्कयित्वा स्वराष्ट्रान्निष्कासयेत् ॥ २७० ॥

(मिता०) चौरे दण्डमाह—

चौरमिति। यस्तु प्रागुक्तपरीक्षया तन्निरपेक्षं वा निश्चितचौर्य-

(१) गूहमित्येवंविधं पृच्छन्ति घ।

स्वं स्वामिने अपहृतं धनं स्वरूपेण मूल्यकल्पनया वा दापयित्वा विविधैर्वधैर्घातैर्घातयेत् । एतच्चोत्तमसाहसदण्डप्राप्तियोग्योत्तमद्रव्यविषयम् । न पुनः पुष्पवस्त्रादिक्षुद्रमध्यमद्रव्यापहारविषयम् । 'साहसेषु य एवोक्तस्त्रिषु दण्डो मनीषिभिः । स एव दण्डः स्तेयेऽपि द्रव्येषु त्रिष्वनुक्रमात्' ॥ इति नारदवचनेन वधरूपस्योत्तमसाहसस्योत्तमद्रव्यविषये व्यवस्थापितत्वात् । यत्पुनर्वृद्धमनुवचनम्—'अन्यायोपात्तवित्तत्वाद्धनमेषां मलात्मकम् । अतस्ता(१)न्घातयेद्राजा नार्थदण्डेन दण्डयेत्' ॥ इति, तदपि महापराधविषयम् ॥

(मिता०) चौरविशेषेऽपवादमाह—

साचिन्हमिति । ब्राह्मणं पुनश्चौरं महत्यप्यपराधे न घातयेदपि तु ललाटेऽङ्कयित्वा स्वदेशान्निष्कासयेत् । अङ्कनं च श्वपदाकारं कार्यम् । तथा च मनुः (९ । २३७)—'गुरुतल्पे भगः कार्यः सुरापाने सुराध्वजः । स्तेये च श्वपदं कार्यं ब्रह्महण्यशिराः पुमान्' ॥ इति । एतच्च दण्डोत्तरकालं प्रायश्चित्तमचिकीर्षतो द्रष्टव्यम् । यथाह मनुः (९ । २४०)—'प्रायश्चित्तं तु कुर्वाणाः सर्वे वर्णा यथोदितम् । नाङ्क्या राज्ञा ललाटे तु दाप्यास्तूत्तमसाहसम्' ॥ इति २७० ॥

घातितेऽपहृते दोषो ग्रामभर्तुरनिर्गते ॥
विवीतभर्तुस्तु पथि चौरोद्धर्तुरवीतके ॥ २७१ ॥
स्वसीम्नि दद्यात् ग्रामस्तु पदं वा यत्र गच्छति ॥
पञ्चग्रामी वहिः क्रोशाद्दशग्राम्यथवा पुनः ॥ २७२ ॥

मनुष्यादिमारणे धनाद्यपहरणे वा ग्रामपतेश्चौरोपेक्षादोषो भवति । अतो ग्रामस्तत्पतिः स्वसीम्नि नष्टधनं पुनर्दद्यात् । यदि चौरपदानि ग्रामान्न निर्गच्छन्ति । यदि तु निर्गछन्ति तदा यत्र पदानि प्रविशन्ति तद्विषयाधिपतिर्दद्यात् । विवीतगवादिचरणस्थानं तद्भर्तुस्तत्र पथि घातनापहारयोर्दोषोऽवीतके वीतभिन्ने पथि घातनापहारयोश्चौरोद्धरणादिकृतस्य मार्गपालस्य दोषः । स्वसीम्नीत्याद्यर्द्धश्लोकार्धस्याऽत्राप्यन्वयः । यदि तु बहूनां ग्रामाणामन्तरालदेशे घातापहारौ भवतः, पदानि च जनसम्मर्दादिना भग्नानि तदा पञ्चग्रामी दशानां ग्रामाणां समाहारो दशग्रामी वा दद्यात् । अथवाशब्दोऽनास्था-

(१) तान्वर्तयेत् घ. ।

यां, तेन क्रोशात्मकप्रत्यासत्तिमन्तस्तावन्तो दद्युरिति फलमिति । क्रोशादित्यत्र कृष्टादिति क्वचित्पाठः कर्षणदेशादिति तदर्थः । आद्यतुशब्देन सीमान्ते वहिर्दोषो व्यवच्छिन्नः । यदा त्वपहृतं धनमन्यतो दापयितुं न शक्नोति तदा स्वयमेव राजा चौरहृतं दद्यात् । 'चौरहृतमवजित्य यथास्थानं गमयेत् स्वकोशाद्वा दद्यात्' इति गौतमस्मरणात् ॥ २७१–२७२ ॥

(मिता०) चौरादर्शने अपहृतद्रव्यप्राप्त्युपायमाह—

घातित इति । यदि ग्राममध्ये मनुष्यादिप्राणिवधो धनापहरणं वा जायते तदा ग्रामपतेरेव चौरोपेक्षादोषस्तत्परिहारार्थं स एव चौरं गृहीत्वा राज्ञेऽर्पयेत् । तदशक्तौ हृतं धनं धनिने दद्याद्यदि चौ(१)रस्य पदं स्वग्रामान्निर्गतं न दर्शयति । दर्शिते पुनस्तत्पदं यत्र प्रविशति तद्विषयाधिपतिरेव चौरं धनं वार्पयेत् । तथा च नारदः—'गोचरे यस्य (२)लुप्येत तेन चौरः प्रयत्नतः । ग्राह्यो दाप्योऽथवा शेषं पदं यदि न निर्गतम् ॥ निर्गते पुनरेतस्मान्न चेदन्यत्र पातितम् । सामन्तान्मार्गपालांश्च दिक्पालांश्चैव दापयेत्' ॥ इति । विवीते त्वपहारे विवीतस्वामिन एव दोषः । यदा त्वध्वन्येव तद्भूतं भवत्यवीतके वा विवीतादन्यत्र क्षेत्रे तदा चौरोद्धर्तुर्मार्गपालस्य दिक्पालस्य (३)वा दोषः ॥ २७१ ॥

(मिता०) किञ्च—

स्वसीम्नीति । यदा पुनर्ग्रामाद्बहिः सीमापर्यन्ते क्षेत्रे मोषादिकं भवति तदा तद्ग्रामवासिन एव दद्युः, यदि सीम्नो बहिश्चौरपदं न निर्गतम् । निर्गते पुनर्यत्र ग्रामादिके चौरपदं प्रविशति स एव चौरा(४)र्पणादिकं कुर्यात् । यदा त्वनेकग्राममध्ये क्रोशमात्राद्बहिःप्रदेशे घातितो मुषितो वा चौरपदं च जनसंमर्दादिना भग्नं तदा पञ्चानां ग्रामाणां समाहारः पञ्चग्रामी दशग्रामसहाहा(५)रो वा दद्यात् । विकल्पवचनं तु यथा—प्रत्यासत्त्यपहृतधनप्रत्यर्पणादिकं कुर्यादित्येवमर्थम् । यदा त्वन्यतोऽपहृतं द्रव्यं दापयितुं न शक्नोति तदा स्वकोशादेव राजा दद्यात् । 'चौरहृतमवजित्य यथा

---

(१) चौरपदं घ. । (२) मुष्येत ख. मुच्येत ग. । (३) वापराध. घ.
(४) चौर्यार्पणादिकं घ. (५) समाहारा दशग्रामी वा घ.

स्थानं गमयेत्स्वकोशाद्वा दद्यात्' इति गौतमस्मरणात्। मुषितामुषितसन्देहे मानुषेण दिव्येन वा निर्णयः कार्यः। 'यदि तस्मिन्दाप्यमाने भवन्मोषे तु संशयः। मुषितः शपथं दाप्यो बन्धुभिर्वापि साधयेत्' ॥ इति वृद्धमनुस्मरणात् ॥ २७२ ॥

(वी० मि०) चौर्यविशेषे प्रसङ्गात् तत्तुल्यापराधे च दण्डानाह—

बन्दिग्राहांस्तथा वाजिकुञ्जराणां च हारिणः ॥
प्रसह्य घातिनश्चैव शूल(१)मारोपयेन्नरान् ॥ २७३ ॥
उत्क्षेप(२)कग्रन्थिभेदौ करसन्दंशहीनकौ ॥
कार्यौ द्वितीयापराधे करपादैकहीनकौ ॥ २७४ ॥
क्षुद्रमध्यमहाद्रव्यहरणे सारतो दमः ॥
देशकालवयःशक्ति सञ्चिन्त्यं दण्डकर्मणि ॥ २७५ ॥
भक्तावकाशाग्न्युदकमन्त्रोपकरणव्ययान् ॥
दत्त्वा चौरस्य हन्तुर्वा जानतो दण्ड उत्तमः ॥ २७६ ॥
शस्त्रावपाते गर्भस्य पातने चोत्तमो दमः ॥
उत्तमो वाऽधमो वापि पुरुषस्त्रीप्रमापणे ॥ २७७ ॥
विप्रदुष्टां स्त्रियं चैव पुरुषघ्नीमगर्भिणीम् ॥
सेतुभेदकरीं चाप्सु शिलां बद्ध्वा प्रवेशयेत् ॥ २७८ ॥
विषाग्निदां पतिगुरुनिजापत्यप्रमापणीम् ॥
विच्छिन्न(३)कर्णनासौष्ठीं कृत्वा गोभिः प्रमापयेत् ॥२७९॥

बन्दीकृत्य धनवतः पुरुषान् गृह्णन्ति तान् बन्दिग्राहान् अश्वगजान्यतरहारिणो बलान्मनुष्यघातिनश्च चौरान्नरान् शूले वधार्थमारोपयेत्। वस्त्राद्युत्क्षिप्य हरन्तं वस्त्रबद्धसुवर्णादिकमुन्मोच्याऽपहरन्तं तर्जन्यङ्गुष्ठहीनं द्वितीये च उल्लेपणग्रन्थिभेदनरूपेऽपराधे करपादसमाहारस्यैकेन हीनं कुर्यात्। क्षुद्राणां मध्यानां महतां च द्रव्याणां हरणे कृते द्रव्यमूल्यानुसारेण तन्मूल्यसूल्यो दमः कार्यः।

---

(१) शूलान्–इति मु० पु० पाठः। (२) उल्लेपक–इति क०ख० पुस्तकयोः पाठः।
(३) विकर्णकरनासौष्ठीं–इति मु० पु० पाठः।

दण्डकर्मणि देशादिकमपि वृद्धिहानिप्रयोजकं चिन्तनीयं राज्ञा । तत्र नारदः—

मृद्भाण्डासनखट्वास्थिदारुचर्मतृणादि यत् ।
शमीधान्यं कृतान्नं च क्षुद्रं द्रव्यमुदाहृतम् ॥
वासः कौशेयवर्जं च गोवर्ज्यं पशवस्तथा ।
हिरण्यवर्जं लोहं च मध्यं व्रीहियवा अपि ॥
हिरण्यरत्नकौशेयस्त्रीपुंगोगजवाजिनः ।
देवब्राह्मणराज्ञां च द्रव्यं विज्ञेयमुत्तमम् ॥

तथाशब्देन राजवृद्धिसमुच्चयः । अग्रे महाद्रव्यपदं गजवाजिराजद्रव्यपदभिन्नपरम् । आद्यचकारेण रथहन्तृसमुच्चयः । द्वितीयचकारेणाऽग्न्यागारादिभेदकसमुच्चयः ।

अग्न्यागारायुधागारदेवतागारभेदकान् ।
हस्त्यश्वरथहन्तॄंश्च हन्यादेवाऽविचारयन् ॥

इति मनुवचनात् । एवकारेणार्थदण्डव्यवच्छेदः ।

अन्यायोपात्तवित्तत्वाद्धनमेषां मलात्मकम् ।
अतस्तान् घातयेद्राजा नार्थदण्डेन दण्डयेत् ॥

इति मनुस्मरणात् । भक्तेति । हिरण्यादिचौरस्य मनुष्यादिहन्तुर्वा भक्ताऽवस्थानस्थलशीताद्यपनोदकाग्निजलमन्त्रणाचौर्यहननोपाकरणखनित्रखड्गादिदूरदेशगमनार्थमार्गव्ययानामन्यतमं दत्त्वा सम्प्रदानं चौरत्वेन न जानतोऽचौरस्यापि उत्तमः चौरसदृश एव दण्डः ।

आह्वायकादेशकारास्तथा चान्तरदायकाः ।
समदण्डाः स्मृताः सर्वे ये च प्रच्छादयन्ति तान् ॥
भक्ताऽवकाशदातारः स्तेनानां ये प्रसर्पताम् ।
शक्ताश्च य उपेक्षन्ते तेऽपि तद्दोषभागिनः ॥

इति नारदवचनसंवादात् । राज्ञश्चौरनिवारणाक्षमत्वे स्वरक्षणार्थं चौराय भक्तादिदानेऽप्यदोषः । 'अन्यत्र राजाशक्ते'रिति विष्णुवचनात् । परगात्रे शस्त्रस्याऽवपातने दासीब्रह्मगर्भव्यतिरिक्तस्य गर्भस्य पातने विनाशने चोत्तमसाहसो दण्डः । ब्राह्मणत्वादिविशिष्टपुरुषस्त्रियोः प्रमापणे मारणे उत्तमसाहसः प्रथमसाहसो वा दण्डः । वृत्तशीलापेक्षया वा विकल्पः । अपिशब्दाद्वृत्तशीलान्यतरसत्त्वे मध्यम·

साहसो दण्डः। चकारेण 'रत्नाभहार्युत्तमसाहस'मिति विष्णूक्तस्याऽप्रकृष्टरत्नहरणस्य सङ्ग्रहः। विप्रदुष्टामिति। विशेषेण प्रदुष्टां भ्रूणघ्नीं स्वगर्भपातिनीं च स्त्रियं तथा पुरुषहन्त्रीं सेतुभेदनकर्त्रीं च शिलां कण्ठे बद्ध्वाऽप्सु प्रवेशयेद्यदि नैता गर्भवत्यो भवन्ति। आद्यचकारेण विषाग्निदपुरुषसमुच्चयः। द्वितीयचकारेण वापीकूपतडागोदपानभेदमार्गरसद्रव्यदूषणेऽदासीदाससम्प्रदानकरणे चेति शङ्खोक्तसमुच्चयः। विषदामग्निदां च स्त्रियं पत्युः पित्रादेरपत्यस्य वा मारणकर्त्रीं कर्णनासौष्ठविहीनां कृत्वा गोद्वारा मारयेत् ॥२७३—२७९॥

(मिता०) अपराधविशेषेण दण्डविशेषमाह—

बन्दिग्राहानिति। बन्दिग्राहादीन्बलावष्टम्भेन घातकांश्च नरान् शूलानारोपयेत्। अयं च वधप्रकारविशेषोपदेशः। (९।२८०)—'(१)कोष्ठागारायुधागारदेवतागारभेदकान्। हस्त्यश्वरथहर्तॄंश्च हन्यादेवाविचारयन्' ॥ इति मनुस्मरणात् ॥ २७३ ॥

(मिता०) किञ्च—

उत्क्षेपकेति। वस्त्राद्युत्क्षिपत्यपहरतीत्युत्क्षेपकः। वस्त्रादिबद्धं स्वर्णादिकं विस्रस्योत्कृत्य वा योऽपहरत्यसौ ग्रन्थिभेदः। तौ यथाक्रमं करेण सन्दंशसदृशेन तर्जन्यङ्गुष्ठेन च हीनौ कार्यौ। द्वितीयापराधे पुनः करश्च पादश्च करपादं तच्च तदेकं च करपादैकं तद्धीनं ययोस्तौ करपादैकहीनकौ कार्यौ। उत्क्षेपकग्रन्थिभेदकयोरेकमेकं करं पादं च छिन्द्यादित्यर्थः। एतदप्युत्तमसाहसप्राप्तियोग्यद्रव्यविषयम्। 'तदङ्गच्छेद इत्युक्तो दण्ड उत्तमसाहसः' इति नारदवचनात्। तृतीयापराधे तु वध एव। तथा च मनुः (९।२७७)—'अङ्गुलीग्रन्थिभेदस्य छेदयेत्प्रथमे ग्रहे। द्वितीये ह(२)स्तचरणौ तृतीये वधमर्हति' ॥ इति। जातिद्रव्यपरिमाणतो मूल्याद्यनुसारतो दण्डः कल्पनीय इति ॥ २७४ ॥

(मिता०) जातिद्रव्यपरिमाणपरिग्रहविनियोगवयःशक्तिगुणदेशकालादीनां दण्डगुरुलघुभावकारणानामानन्त्यात्प्रतिद्रव्यं वक्तुमशक्तेः सामान्येन दण्डकल्पनोपायमाह—

क्षुद्रेति। क्षुद्राणां मध्यमानामुत्तमानां च द्रव्याणां हरणे सारतो मूल्याद्यनुसारतो दण्डः कल्पनीयः। क्षुद्रादिद्रव्यस्वरूपं च नार-

(१) अग्न्यागारा ग.। (२) हस्तपादौ तु घ०।

(मिता०) किञ्च—

शस्त्रेति । परगात्रेषु शस्त्रस्यावपातने दासीब्राह्मणगर्भव्यतिरेकेण गर्भस्य पातने चोत्तमो दमः दण्डः । दासीगर्भनिपातने तु दासीगर्भविनाशकृदित्यादिना शतदण्डोऽभिहितः । ब्राह्मणगर्भविनाशे तु 'हत्वा गर्भमविज्ञातम्' इत्यत्र ब्रह्महत्यातिदेशं (१)वक्ष्यते । पुरुषस्य स्त्रियाश्च प्रमापणे शीलवृत्ताद्यपेक्षयोत्तमो वाधमो वा दण्डो व्यवस्थितो वेदितव्यः ॥ २७७ ॥

(मिता०) अपि च—

विप्रदुष्टामिति । विशेषेण प्रदुष्टा विप्रदुष्टा भ्रूणघ्नी स्वगर्भपातिनी च या च पुरुषस्य हन्त्री सेतूनां भेत्त्री च एता गर्भरहिताः स्त्रीगले शिलां बद्ध्वा अप्सु प्रवेशयेत् यथा न प्लवन्ति ॥ २७८ ॥

(मिता०) किञ्च—

विषाग्निदामिति । अगर्भिणीमित्यनुवर्तते । या च परवधार्थमन्नपानादिषु विषं ददाति क्षिपति । या च दाहार्थं ग्रामादिष्वग्निं ददाति । तथा या च निजपतिगुर्वपत्यानि मारयति तां विच्छिन्नकर्णकरनासौष्ठीं कृत्वा अदान्तैर्दुष्टबलीवर्दैः प्रवाह्य मारयेत् । स्तेयप्रकरणे यदेतत्साहिकस्य दण्डविधानं तत्प्रासङ्गिकमिति मन्तव्यम् ॥ २७९ ॥

(वी० मि०) 'घातितेऽपहृत' इत्यत्र दृष्टान्ततया घातनं प्रागभिहितं, तत्र कथं घातकोऽयमिति निर्णयमिति प्रसङ्गादाकांक्षितमुत्तरयति—

अविज्ञातहतस्याशु कलहं सुतबान्धवाः ॥
प्रष्टव्या योषितश्चाऽस्य परपुंसि रताः पृथक् ॥ २८० ॥
स्त्रीद्रव्यवृत्तिकामो वा केन वाऽयं गतः सह ।
तत्प्रदेश(२)समासन्नं पृच्छेद्वापि जनं शनैः ॥ २८१ ॥

अनेनाऽयं हत इत्येवं न ज्ञातो यो हतस्तस्य सुतबान्धवाः केन सममस्य कलहो जात इति चौरापसरणशङ्कया आशु शीघ्रमेव प्रष्टव्याः । अस्य योषितः पत्नीभगिन्यादयः कस्मिन् परपुंसि रता इति परस्परसङ्कोचेनाऽनभिधाननिरासार्थं पृथक् प्रत्येकं प्रष्टव्याः । स्त्री-

---

(१) वक्ष्यति ख-घ. । (२) मृत्युदेशसमासन्नं—इति मु० पु० पाठः ।

कामो द्रव्यकामो वृत्तिकामो वा केन सहाऽयं गत इति वा सुतबान्धवाः प्रष्टव्याः । सुतबन्धवादीनामभावे मरणदेशनिकट-वर्तिनं गोपाऽऽटविकादिकं जनं शनैर्विश्वासजननपूर्वकं पृच्छेत् । चकारेणाऽयं कस्य भार्यायां रत इति प्रष्टव्यं समुच्चिनोति । अपिकारेण प्रश्नं विनापि विरोधचिन्हमनुसन्दध्यादिति समुच्ची-यते ॥ २८०—२८१ ॥

(मिता०) अविज्ञातकर्तृके हनने हन्तृज्ञानोपायमाह—

अविज्ञातेति । (१)अविज्ञातहतस्याविज्ञातपुरुषेण घातितस्य सम्बन्धिनः सुताः प्रत्यासन्नबान्धवाश्च केनास्य कलहो जात इति कलहमाशु प्रष्टव्याः । तथा मृतस्य सम्बन्धिन्यो योषितो याश्च परपुंसि रता व्यभिचारिण्यस्ता अपि प्रष्टव्याः ॥ २८० ॥

(मिता०) कथं प्रष्टव्या इत्यत आह—

स्त्रीद्रव्येति । किमयं स्त्रीकामो द्रव्यकामो वृत्तिकामो वा तथा कस्यां किंसम्बन्धिन्यां वा स्त्रियामस्य रतिरासीत्, कस्मिन् वा द्रव्ये प्रीतिः, कुतो वा वृत्तिकामः, केन वा सह देशान्तरं गत इति नानाप्रकारं व्यभिचारिण्यो योषितः पृथक्पृथक् विश्वास्य प्रष्टव्याः । तथा मरणदेशनिकटवर्तिनो गोपाऽटविकाद्या ये जनास्तेऽपि विश्वा-सपूर्वकं प्रष्टव्याः । एवं नानाप्रकारैः प्रश्नैर्हन्तारं निश्चित्य तदुचितो दण्डो विधातव्यः ॥ २८१ ॥

(वी० मि०) अथ स्तेयमरणदण्डप्रसङ्गेन तत्तुल्यापराधेऽन्य-त्रापि दण्डमाह—

क्षेत्रवेश्मवनग्रामविवीतखलदाहकाः ॥
राजपत्न्यभिगामी च दग्धव्यास्तु कटाग्निना ॥ २८२ ॥

क्षेत्रादीनां षण्णामन्यतमस्य दाहकर्तारो राजपत्नीसम्भोगक-र्तारश्च वीरणैश्च वेष्टयित्वा तत्सम्बन्ध्यग्निना दग्धव्याः । चकारेण—

प्राकारस्य च भेत्तारं परिखाणां च पूरकम् ।
द्वाराणां चैव भेत्तारं क्षिप्रमेव प्रमापयेत् ॥

इति मनूक्तसमुच्चयः । तुशब्देन प्रकारान्तरेण तद्धननं व्यवच्छि-

---

(१) अविज्ञातपुरुषेण ख. ।

न्ति । कात्यायनः—

मित्रप्राप्त्यर्थलोभैर्वा राजलोकहितैषिणा ।
न मोक्तव्याः साहसिका सर्वभूतभयावहाः ॥
लोभन्द्रयाद्वा यो राजा न हन्यात्पापकारिणः ।
तस्य प्रोज्झ्यते राष्ट्रं राज्याच्च परिहीयते ॥

नारदः—

अविशेषेण सर्वेषामेष दण्डविधिः स्मृतः ।
वध्या XX ब्राह्मणस्य न वधं ब्राह्मणोऽर्हति ॥
शिरसो मुण्डनं तत्र दण्डो निर्वासनं पुरात् ।
ललाटे चाऽभिशस्ताङ्कः प्रयाणं गर्दभेन च ॥

यमः—

न शारीरो ब्राह्मणस्य दण्डो भवति कर्हिचित् ।
गुप्ते तु बन्धने बद्ध्वा राजा भक्तं प्रदापयेत् ॥
अथवा बन्धनं रज्वा कर्म वा कारयेन्नृपः ।
मासार्धमासं कुर्वीत कार्यं विज्ञाय तत्त्वतः ॥
यथापराधं विप्रं तु विकर्माण्यपि कारयेत् ।

दण्डान्तराणि विस्तरभयादुपेक्ष्यन्ते ॥ २८२ ॥

इति श्रीमत्० याज्ञवल्क्यव्याख्याने स्तेयप्रकरणम् ।

(मिता०) किञ्च—

क्षेत्रेति । क्षेत्रं पक्वफलसस्योपेतम् । वेश्म गृहम् । वनमटवीं क्रीडावनं वा । ग्रामम् । विवीतमुक्तलक्षणम् । खलं वा ये दहन्ति ये च राजपत्नीमभिगच्छन्ति तान् सर्वान् कटैर्वीरणमयैर्वेष्टयित्वा दहेत् । क्षेत्रादेर्दाहकानां मारणदण्डप्रसङ्गाद्दण्डविधानम् ॥ २८२ ॥

इति स्तेयप्रकरणम् ।

(वी० मि०) अथ राजपत्न्यभिगमप्रसङ्गेन—

त्रिविधं तत्समाख्यातं प्रथमं मध्यमोत्तमम् ।
अदेशकाले सम्भाषा निर्जने च परस्त्रिया ॥
प्रलोभनं चान्नपानैर्मध्यमं समुदाहृतम् ।
सहासनं विविक्ते तु परस्परमुपाश्रयः ॥

केशाकेशिग्रहश्चैव सम्यक् सङ्ग्रहणं स्मृतम् ।

इति व्यासेन त्रिधा विभक्तं स्त्रीसङ्ग्रहणाख्यं विवादपदमुपक्रमते । तत्रादौ सङ्ग्रहणस्य मिथुनीभावस्वरूपज्ञापकमाह—

पुमान् सङ्ग्रहणे ग्राह्यः केशाकेशि परस्त्रिया ॥
सद्यो वा कामजैश्चिन्हैः प्रतिपत्तौ द्वयोस्तथा ॥ २८३ ॥
नीवीस्तनप्रावरणसक्थिकेशावमर्शनम् ॥
अदेशकालसम्भाषं सहैकस्थानमेव च ॥ २८४ ॥

केशाकेशि परस्परकेशग्रथननीव्याद्याकर्षणम्, अदेशकाले निर्जननिशीथादौ सम्भाषा सहावस्थानं च यथास्यात्तथा परस्त्रिया सङ्ग्रहणे मिथुनीभावो पुरुषो ग्राह्यः, तन्मैथुनकर्तृत्वेन निश्चेयः । सद्य एव कामाज्जातैर्नखक्षतादिभिश्चिन्हैश्च ग्राह्यः । द्वयोः स्त्रीपुंसयोस्तथाप्रतिपत्तौ परस्परमैथुनभावयोरित्येवं सम्प्रतिपत्तौ च ग्राह्यः । नीवी परिधानग्रन्थिः, स्तनप्रावरणं बन्धनांशुकं, सक्थिनिरूढाः केशाश्च, एषामवमर्शनं यथा स्यात् । चकारेण गन्धमाल्यप्रेषणादिसमुच्चयः । एवकारेणाऽन्यथासिद्धिशङ्कया उक्तस्थलेषु व्यवच्छेदः ॥ २८३-२८४ ॥

(मिता०) स्त्रीसंग्रहणाख्यं विवादपदं व्याख्यायते । प्रथमसाहसादिदण्डप्राप्त्यर्थं त्रेधा तत्स्वरूपं व्यासेन विवृतम्—'त्रिविधं तत्समाख्यातं प्रथमं मध्यमोत्तमम् । अदेश(१)कालसम्भाषा निर्जने च परस्त्रियाः ॥ कटाक्षावेक्षणं हास्यं प्रथमं साहसं स्मृतम् । प्रेषणं गन्धमाल्यानां धूपभूषणवाससाम् ॥ प्रलोभनं चान्नपानैर्मध्यमं (२)साहसं स्मृतम् । सहासनं विविक्तेषु परस्प(३)रमुपाश्रयः ॥ केशाकेशिग्रहश्चैव सम्यक् सङ्ग्रहणं स्मृतम्' ॥ स्त्रीपुंसयोर्मिथुनीभावः संग्रहणम् ॥

संग्रहणज्ञानपूर्वकत्वात्तत्कर्तुर्दण्डविधानस्य तज्ज्ञानोपायं तावदाह—

पुमानिति । सङ्ग्रहणे प्रवृत्तः पुमान् केशाकेश्यादिभिर्लिङ्गैर्ज्ञात्वा ग्रहीतव्यः । परस्परं केशग्रहणपूर्विका क्रीडा केशाकेशि । 'तत्र तेनेदमिति सरूपे' इति बहुव्रीहौ सति 'इच् कर्मव्यतिहारे' इति समासान्त इच्प्रत्ययः । अव्ययत्वाच्च लुप्ततृतीया विभक्तिः । तत-

---

(१) भाषाभिर्निर्जने घ. । (२) समुदाहृतम् घ. । (३) मपाश्रयः घ. ।

श्रायमर्थः । परभार्यया सह केशाकेशिक्रीडनेनाभिनवैः कररुहदशनादिकृतव्रणैः रागकृतैर्लिङ्गैर्द्वयोः सम्प्रतिपत्त्या वा ज्ञात्वा सङ्ग्रहणे प्रवृत्तो ग्रहीतव्यः । परस्त्रीग्रहणं नियुक्तावरुद्धादिव्युदासार्थम् ॥२८३॥

(मिता०) किञ्च—

नीवीति । यः पुनः परदारपरिधानग्रन्थिप्रदेशकुचप्रावरणजवनमूर्धरुहादिस्पर्शनं साभिलाप इवाचरति । तथा अदेशे निर्जने जनताकीर्णे वाऽन्धकाराकुले अकाले संलापनं करोति । परभार्यया वा सहैकमञ्चकादौ रिरंसयेवावतिष्ठते यः सोऽपि सङ्ग्रहणे प्रवृत्तो ग्राह्यः । एतच्चाशङ्क्यमानदोषपुरुषविषयम् । इतरस्य तु न दोषः । यथाह मनुः (८।३५५)—"यस्त्वनाक्षारितः पूर्वमभिभाषेत कारणात् । न दोषं प्राप्नुयात्किञ्चिन्न हि तस्य व्यतिक्रमः' ॥ इति । यः परस्त्रिया स्पृष्टः क्षमतेऽसावपि ग्राह्य इति तेनैवोक्तम् (८।३५८)—'स्त्रियं स्पृशेददेशे यः स्पृष्टो वा मर्षयेत्तथा । परस्परस्यानुमते सर्वं सङ्ग्रहणं स्मृतम्' ॥ इति । यश्च मयेयं विदग्धाऽसकृद्रमितेति श्लाघया भुजङ्गजनसमक्षं ख्यापयत्यसावपि ग्राह्य इति तेनैवोक्तम् । 'दर्पाद्वा यदि वा मोहाच्छ्लाघया वा स्वयं वदेत् । पूर्वं मयेयं भुक्तेति तच्च सङ्ग्रहणं स्मृतम्' ॥ इति ॥ २८४ ॥

(वी० मि०) निवारितयोः स्त्रीपुंसयोः संलापादिकरणे दण्डमाह—

स्त्री निषेधे शतं दद्याद्विशतं तु दमं पुमान् ॥
निषिद्धयो(१)स्तयोर्दण्डो यथा सङ्ग्रहणे तथा ॥ २८५ ॥

आलापादौ पित्रादिभिः प्रतिषिद्धा स्त्र्येव चेत्पुरुषेणाऽऽलापादिकं करोति तदा पणानां शतं, प्रतिषिद्धः पुरुष एव चेत्तदा पणानां द्विशतं दमं दद्यात् । स्त्रीपुरुषौ द्वावपि चेत्प्रतिषिद्धौ परस्परमालापादिकं कुरुतस्तदा सङ्ग्रहणे यथा उत्तमसाहसो दण्डस्तथा तयोर्दण्ड इत्यर्थः । तुशब्देन द्वितीयस्य निषेधो व्यवच्छिद्यते । इदं च चारणादिभार्याव्यतिरिक्तपरम् ।

नैष चारणदारेषु विधिर्नात्मोपजीविषु ।
सज्जयन्ति हि ते नारीर्निगूढाश्चारयन्ति च ॥

इति मनुवचनात् ॥ २८५ ॥

---

(१) प्रतिषेधे तयो-इति मु० पु० पाठः ।

(मिता०) प्रतिषिद्धयोर्द्वयोः स्त्रीपुंसयोः पुनः संल्लापादिकरणे दण्डमाह—

स्त्रीति । प्रतिषिध्यते इति प्रतिषेधः पतिपित्रादिभिर्येन सह सम्भाषणादिकं निषिद्धं तत्र प्रवर्तमाना स्त्री शतपणं दण्डं दद्यात् । पुरुषः पुनरेव निषिद्धं प्रवर्तमानो द्विशतं दद्यात् । द्वयोस्तु स्त्रीपुंसयोः प्रतिषिद्धे प्रवर्तमानयोः संग्रहणे सम्भोगे वर्णानुसारेण यो दण्डो वक्ष्यते स एव विज्ञेयः । एतच्च चारणादिभार्याव्यतिरेकेण । (८।३६२)—'नैष चारणदारेषु विधिर्नात्मोपजीविषु । सज्जयन्ति हि ते नारीर्निगूढाश्चारयन्ति च' ॥ इति मनुस्मरणात् ॥ २८५ ॥

(वी० मि०) यथायथं सङ्ग्रहणे दण्डानाह—

सजातावुत्तमो दण्ड आनुलोम्ये तु मध्यमः ॥
प्रातिलोम्ये वधः पुंसो नार्याः कर्णादिकर्तनम् ॥ २८६ ॥
अलङ्कृतां हरन्कन्यामुत्तमं ह्यन्यथाऽधमम् ॥
दण्डं दद्यात्सवर्णासु प्रातिलोम्ये वधः स्मृतः ॥ २८७ ॥
सकामास्वनुलोमासु न दोषस्त्वन्यथा दमः ॥
दूषणे तु करच्छेद उत्तमायां वधस्तथा ॥ २८८ ॥
शतं स्त्रीदूषणे दद्यात् द्वे तु मिथ्याभिशंसने ॥
पशून् गच्छन् शतं दाप्यो हीनां स्त्रीं गां च मध्यमम् २८९॥
अवरुद्धासु दासीषु भुजिष्यासु तथैव च ॥
गम्यास्वपि पुमान् दाप्यः पञ्चाशत्पणिकं दमम् ॥ २९० ॥
प्रसह्य दास्यभिगमे दण्डो दशपणः स्मृतः ॥
बहूनां यद्यकामासौ चतुर्विंशतिकः पृथक् ॥ २९१ ॥
(१.)गृहीतवेतना वेश्या नेच्छन्ती द्विगुणं वहेत् ॥
अगृहीते समं दाप्यः पुमानप्येवमेव हि ॥ २९२ ॥
अयोनौ गच्छतो योषां पुरुषं वापि मेहतः ॥
चतुर्विंशतिको दण्डस्तथा प्रव्रजितागमे ॥ २९३ ॥

---

(१) इद पद्यमेतव्द्याख्यानं च नोपलभ्यते क० ख० पुस्तकयोः । अतः केवलं मूलं मिताक्षरानुरोधेन स्थापितमत्र ।

अन्त्याभिगमने त्वङ्क्यः कुबन्धेन प्रवासयेत् ॥
शूद्रस्तथान्त्य एव स्यादन्त्यस्यार्यागमे वधः ॥ २९४ ॥

अकामसवर्णगुप्तपरदारागमने उत्तमसाहसो दण्डः । पितृष्वस्रादिगमने तु वध एवेति तृतीयाध्याये वक्ष्यति । तदाह मनुः—

सहस्रं ब्राह्मणो दण्ड्यो गुप्तां विप्रां बलाद्व्रजन् ।
शतानि पञ्च दण्ड्यः स्यादिच्छन्त्या सह सङ्गतः ॥

अत्रानुलोम्येनाऽसवर्णस्त्रीगमने तु मध्यमसाहसो दण्डः । अत्र विशेषमाह मनुः—

अगुप्ते क्षत्रियावैश्ये शूद्रां वा ब्राह्मणो व्रजन् ।
शतानि पञ्च दण्ड्यः स्यात्सहस्रं त्वन्त्यजस्त्रियम् ॥
सहस्रं ब्राह्मणो दाप्यो गृहं गुप्तं ततो व्रजन् ।
शूद्राणां क्षत्रियविशोः साहस्रं वै भवेद्दमः ॥

प्रातिलोम्य इति शूद्रादीनां पुंसां वैश्यास्त्रीगमने वधः । नार्याश्च हीनवर्णायाः कर्णनासादिकर्तनं दण्ड इत्यर्थः । एतच्च गुप्ताविषयम् । तदाह मनुः—

उभावपि हि तावेव ब्राह्मण्या गुप्तया सह ।
विप्लुतौ शूद्रवद्दण्ड्यौ दग्धव्यौ वा कटाग्निना ॥
ब्राह्मणीं यद्यगुप्तां तु सेवेतां वैश्यपार्थिवौ ।
वैश्यं पञ्चशतं कुर्यात्क्षत्रियं तु सहस्रिणम् ॥

सवर्णमानुलोम्येन वा इच्छया व्रजन्त्या नार्यास्तु दमः कल्पनीयः । बलात्पुरुषेणोपभुक्तायास्तु न दण्डः ।

बलात्सन्दूषयेद्यस्तु परभार्यां कथञ्चन ।
वधो दण्डो भवेत्तस्य नापराधो भवेत्स्त्रियाः ॥

इति मत्स्यपुराणवचनात् । मनुः—

वैश्यश्चेत्क्षत्रियां गुप्तां वैश्यां वा क्षत्रियो व्रजेत् ।
यो ब्राह्मण्यामगुप्तायां तावुभौ दण्डमर्हतः ॥

शूद्रस्येत्यनुवृत्तौ गौतमः—'आर्यस्त्र्यभिगमने लिङ्गोद्धारः सर्वस्वहरणं, गुप्ता चेद्वधोऽधिकः' । वधोपायमाह बौधायनः—'शूद्रं कटाग्निना दहेत्' । हारीतः—'श्रेयसः शयनशायिनं राजा वध्वा स्व-

भिः खादयेत्, काष्ठैश्चैनं दाहयेत्' । यमः—

वृषलं सेवते या तु ब्राह्मणी मदमोहिता ।
तां श्वभिः खादयेद्राजा संस्थाने वध्यघातिनाम् ॥
वैश्यं वा क्षत्रियं वापि ब्राह्मणी सेवते तु या ।
शिरसो मुण्डनं तस्य प्रयाणं गर्दभेन च ॥

बृहस्पतिः—

गृहमागत्य या नारी प्रलोभ्य स्पर्शनादिना ।
कामयेत्तत्र सा दण्ड्या नरस्याऽर्धदमः स्मृतः ॥
छिन्ननासौष्ठकर्णां तां परिभ्राम्याशु मज्जयेत् ।

अलङ्कृतामिति विवाहार्थमलङ्कृतां कन्यां सवर्णासु मध्ये सवर्णामिति यावत् सम्भोगार्थमकामां हरन्नुत्तमसाहसम्, अन्यथा विवाहार्थमलङ्कृतत्वाभावे सवर्णामकामां कन्यां हरन्नधमं प्रथमसाहसं दण्डं दद्यात् । प्रतिलोम्येऽपकृष्टेनोत्कृष्टवर्णकन्याहरणे भर्तुर्वधः स्मृतः । सकामासु हीनवर्णासु कन्यासु हृतासु हर्तुर्दोषा दण्डप्रयोजको न भवति । अन्यथा तु तस्या अकामत्वे हर्तुर्दमः । नारदः—

सकामायां तु कन्यायां सवर्णे नास्त्यतिक्रमः ।
किन्त्वलङ्कृत्य सत्कृत्य स एवैनां समुद्वहेत् ॥

अकामायां तु हृतायां शङ्खः—'समं शुल्कमाभरणं द्विगुणं च स्त्रीधनं दत्वा प्रतिपद्येत' । दूषणे त्विति । अकामायाः सवर्णाया हीनवर्णाया वा कन्याया योनावङ्गुलिप्रवेशनेन दूषणे तु दूषयितुः करच्छेदः कार्यः । उत्तमायामुत्कृष्टवर्णायामकामायां दूषणे कृते वधः तथा स्मृत इत्यर्थः ।

अभिषह्य तु यः कन्यां कुर्याद्दर्पेण मानवः ।
तस्याशु कर्त्ये अङ्गुल्यौ दण्डं चार्हति षट् शतम् ॥

इति मनूक्तमत्र विकल्पेनान्वेति । षट्शतस्याऽधिकत्वेऽपि अङ्गुलीद्वयकर्त्तनाभावे साम्यात् । अत्र मनुः—

सकामां दूषयंस्तुल्यो नाङ्गुलिच्छेदमाप्नुयात् ।
द्विशतं तु दमं दाप्यः प्रसङ्गविनिवृत्तये ॥
कन्यैव कन्यां या कुर्यात्तस्यास्तु द्विशतो दमः ।
शुल्कं च द्विगुणं दद्याच्छिफाश्चैवाऽऽप्नुयाद्दश ॥

या तु कन्यां प्रकुर्यात् स्त्री सा सद्यो मौण्ड्यमर्हति ।
अङ्गुल्योरेव च च्छेदं खरेणोद्वहनं तथा ॥

प्रकुर्यादङ्गुलिप्रक्षेपेण दूषयेत् । स्त्री युवती । दूषणान्तरेऽपि दण्डमाह 'शतं स्त्रीदूषणे' इत्यादि । अत्र स्त्रीपदेन प्रकरणात्कन्योच्यते, तस्याश्च वरभिन्नेनाऽपस्मारादिदोषस्य विद्यमानस्य केनापि दूषणे स शतं पणान् दण्डं दद्यात् । अविद्यमानमेवापस्मारादिकं यदि शंसति तदा तु द्वे पणानां शतं दण्डं दद्यात् । वरस्य तु मिथ्यादोषाऽभिधायित्वे 'दूषयंस्तु मृषा शत'मिति प्रथमाध्याये दण्ड उक्तः । यथार्थ दोषाभिधायित्वे तु वरस्य न दोषः । पशूनिति गोव्यतिरिक्तपशून् छाग्यादिकानित्यर्थः । हीनां स्त्रीं शूद्रां गां वा गच्छन्मध्यमं साहसं दाप्यः । चकारेण गुप्तक्षत्रियवैश्ययोर्गमने उत्तमसाहसं दाप्य इति पूर्वोदाहृतं मनुवाक्यसिद्धं समुच्चीयते । हीनां स्त्रीमित्युक्तमपवदति अवरुद्धास्वित्यादि । दासी पुरुषविशेषेण विवाह्या परिगृहीता च त्रिविधा । एकेन पुरुषेण स्वभोगार्थं पुरुषान्तरभोगतो निरुद्धा भुजिष्या वेश्या चेति । भुजिष्या च स्वमित्रपुरुषान्तरोपभोगविषयः स्वपरिचर्याकारिणी । तासु त्रिविधासु आद्यचरमकथितासु नियतपुरुषेण गम्यास्वपि परः पुमान् गच्छन् पञ्चाशत्पणमितं दमं, दास्याः वेश्यायाः प्रसह्य बलात्कारेणाऽभिगमे च दशपणमितो दण्डः । अकामा वेश्या यदि नैरन्तर्येण बहूनां पुरुषाणां भोगविषयः तदा प्रत्येकं चतुर्विंशतिपणमितो दण्डः । एवं च सकामाया वेश्याया एकेन बहुभिर्वाऽभिगमे दण्डाभावः । अवरुद्धाभुजिष्ययोरपि नियतपुरुषस्याभिगमे दण्डाभावः, गम्यास्वित्यभिधानादिति मिताक्षरास्वरसः । मिश्रास्तु—

वेश्यागामी द्विजो दण्ड्यो वेश्याशुल्कं पणं स्मृतम् ।

इति नारदेन शुल्कतुल्यदण्डो मध्यमसाहसरूपो ब्राह्मणस्योक्त इति न क्वापि दण्डाभाव इत्याहुः । तेषां चायमाशयः—

बहुभिर्भुक्तपूर्वा या तां गच्छेयुर्नराधमाः ।
तस्यां वेश्यावदिच्छन्ति दण्डनं न तु दारवत् ॥

इति व्यासेन नराधमत्वेनोपन्यासात् सामान्यत एव भुक्तपूर्वागमने दण्ड उक्तः । 'स्वदारनिरतश्चैवे'ति ग्रन्थकृता प्रथमाध्याये स्वदारव्यतिरिक्तगमनमर्थतः प्रतिषिद्धमिति गम्यास्वित्यनेन नान्या-

पेक्षाल्पदण्डप्रयोजकगमनयोग्यास्वित्येव विवक्षणीयं, न च निषिद्धेऽपि वेश्यागमने मानाभावाद्दण्डाभावः ।

अगम्यागामिनः शास्तिर्दण्डो राज्ञः प्रकीर्तितः ।
प्रायश्चित्तविधानं तु पापराशेर्विशोधनम् ॥

इति प्रायश्चित्तदण्ड उक्तो नारदेन, ग्रन्थकृता तु दशपणादिरिति विरोध इति वाच्यं, प्रकृतदण्डस्य शूद्रपरत्वात् । एवं च पञ्चाशत्पणो यत्र शूद्रस्योक्तो ग्रन्थकृता तत्र ब्राह्मणस्य पञ्चशतपरिमितो दण्डः, क्षत्रियस्य प्रथमसाहसो, वैश्यस्य तदर्द्धमित्यूह्यम् । एवं दशपणस्थलेऽपि द्वैगुण्यं वैश्यादेः कल्पनीयमित्याभाति । अयोनाविति । मुखकट्यादौ योषां स्त्रियं गच्छतः पुरुषं वा मेहतो मुखकट्यादौ मेहतः प्रवेशनेनाऽभिगच्छतः चतुर्विंशतिपणमितो दण्डः । प्रव्रजितायास्तपस्या अभिगमे तु तद्गन्तुश्च तथा चतुर्विंशतिपणमितो दण्डः । अपिकारेण गन्तव्यात्वे पूर्वदण्डाधिक्यं समुच्चिनोति । अन्त्या चाण्डली तदभिगमे तु त्रैवर्णिकं कुबन्धेन कुत्सितबन्धेन भगाकारेणाङ्कयित्वा स्वराष्ट्रात् प्रवासयेत् । शूद्रस्त्वन्त्याभिगमे तथा भगाद्याकारेणाऽङ्क्य एव, न तु प्रवास्यः स्यात् । अन्त्यस्य चाण्डालस्यार्यागमे उत्कृष्टजातिस्त्र्यभिगमे वधः स्यात् ॥ २८६—२९४ ॥

इति श्रीमत्० याज्ञवल्क्यव्याख्याने स्त्रीसङ्ग्रहणप्रकरणम् ।

(मिता०) तदिदानीं संग्रहणे दण्डमाह—

सजाताविति । चतुर्णामपि वर्णानां बलात्कारेण सजातीयगुप्तपरदाराभिगमने साशीतिपणसहस्रं दण्डनीयः । यदा त्वानुलोम्येन हीनवर्णां स्त्रियमगुप्तामभिगच्छति तदा मध्यमसाहसं दण्डनीयः । यदा पुनः सवर्णामगुप्तामानुलोम्येन गुप्तां वा व्रजति तदा मानवे विशेष उक्तः (८।३७८–३८३)—'सहस्रं ब्राह्मणो दण्ड्यो गुप्तां विप्रां बलाद्व्रजन् । शतानि पञ्च दण्ड्यः स्यादिच्छन्त्या सह सङ्गतः' । तथा—'सहस्रं ब्राह्मणो दण्डं दाप्यो गुप्ते तु ते व्रजन् । शूद्रायां क्षत्रियविशोः सहस्रं तु भवेद्दमः' ॥ इति । एतच्च गुरुसखिभार्यादिव्यतिरेकेण द्रष्टव्यम् । 'माता मातृष्वसा श्वश्रूर्मातुलानी पितृष्वसा ।

पितृव्यसखिशिष्यस्त्री भगिनी तत्सखी स्नुषा । दुहिताचार्यभार्या च सगोत्रा शरणागता । राज्ञी प्रव्रजिता धात्री साध्वी वर्णोत्तमा च या ॥ आसामन्यतमां गच्छन्गुरुतल्पग उच्यते । शिश्नस्योत्कर्तनात्तत्र नान्यो दण्डो विधीयते' ॥ इति नारदस्मरणात् । प्रातिलोम्ये उत्कृष्टवर्णस्त्रीगमने क्षत्रियादेः पुरुषस्य वधः । एतच्च गुप्ताविषयम् । अन्यत्र तु धनदण्डः । (८।३७६।३७७)—'उभावपि हि तावेव ब्राह्मण्या गुप्तया सह । विप्लुतौ शूद्रवद्दण्ड्यौ दग्धव्यौ वा कटाग्निना । ब्राह्मणीं यद्यगुप्तां तु सेवेतां वैश्यपार्थिवौ । वैश्यं पञ्चशतं कुर्यात्क्षत्रियं तु सहस्रिणम्' ॥ इति मनुस्मरणात् । शूद्रस्य पुनरगुप्तामुत्कृष्टवर्णां स्त्रियं व्रजतो लिङ्गच्छेदनसर्वस्वापहारौ । गुप्तां तु व्रजतस्तस्य वधसर्वस्वापहाराविति तेनैवोक्तम् । (मनुः ८।३७४)—'शूद्रो गुप्तमगुप्तं वा द्वैजातं वर्णमावसन् । (१)अगुप्तमङ्गसर्वस्वैर्गुप्तं सर्वेण हीयते'॥ इति । नार्याः पुनर्हीनवर्णं व्रजन्त्याः कर्णयोरादिग्रहणान्नासादेश्च कर्तनम् । आनुलोम्येन वा सवर्णं वा व्रजन्त्या दण्डः कल्प्यः । अयं च वधाद्युपदेशो राज्ञ एव तस्यैव पालनाधिकाराच्च द्विजातिमात्रस्य । तस्य 'ब्राह्मणः परीक्षार्थमपि शस्त्रं नाददीत' इति शस्त्रग्रहणनिषेधात् । यदा तु राज्ञा निवेदने कालविलम्बनेन कार्यातिपाताशङ्का तदा स्वयमेव जारादीन् हन्यात् । (मनुः ८।३४८)—'शस्त्रं द्विजातिभिर्ग्राह्यं धर्मो यत्रोपरुध्यते' । तथा (मनुः ८।३।३१)—'नाततायिवधे दोषो हन्तुर्भवति कश्चन । प्रकाशं वाऽप्रकाशं वा मन्युस्तं मन्युमृच्छति' ॥ इति शस्त्रग्रहणाभ्यनुज्ञानाच्च । तथा क्षत्रियवैश्ययोरन्योन्यस्त्र्यभिगमने यथाक्रमं सहस्रपञ्चशतपणात्मकौ दण्डौ वेदितव्यौ । तदाह मनुः (८।३।८२)—'वैश्यश्चेत्क्षत्रियां गुप्तां वैश्यां वा क्षत्रियो व्रजेत् । या ब्राह्मण्यामगुप्तायां तावुभौ दण्डमर्हतः' ॥ इति ॥ २८६ ॥

(मिता०) पारदार्यप्रसङ्गात्कन्यायामपि दण्डमाह—

अलङ्कृतामिति । विवाहाभिमुखीभूतामलंकृतां सवर्णां कन्यामपहरन्नुत्तमसाहसं दण्डनीयः । तदनभिमुखीं सवर्णां हरन्प्रथमं साहसम् । उत्कृष्टवर्णजां कन्यामपहरतः पुनः क्षत्रियादेर्वध एव । दण्डविधानाच्चापहर्तृसकाशादाच्छिद्यान्यस्मै देयेति गम्यते ॥ २८७ ॥

(१) अगुप्तैकाङ्गसर्वस्वैः घ. ।

(मिता०) आनुलोम्यापहरणे दण्डमाह—

सकामास्विति । यदि सानुरागां हीनवर्णां कन्यामपहरति तदा दोषाभावान्न दण्डः । अन्यथा त्वनिच्छन्तीमपहरतः प्रथमसाहसो दण्डः ॥

(मिता०) कन्यादूषणे दण्डमाह—

दूषण इति । अनुलोमास्वित्यनुवर्तते । यद्यकामां कन्यां बलात्कारेण नखक्षतादिना दूषयति तदा तस्य करश्छेत्तव्यः । यदा पुनस्तामेवाङ्गुलिप्रक्षेपेण योनिक्षतं कुर्वन्दूषयति तदा मनूक्तषट्शतसहितोऽङ्गुलिच्छेदः । (मनुः ८।३६७)—'अभिषह्य तु यः कन्यां कुर्याद्दर्पेण मानवः । तस्याशु कर्त्ये अङ्गुल्यौ दण्डं चार्हति षट्शतम्'॥ इति । यदा पुनः सानुरागां पूर्ववद् दूषयति तदापि तेनैव विशेष उक्तः (मनुः ८।३६८)—'सकामां दूषयंस्तुल्यो नाङ्गुलिच्छेदमर्हति । द्विशतं तु दमं दाप्यः प्रसङ्गविनिवृत्तये' ॥ इति । यदा तु कन्यैव कन्यां दूषयति विदग्धा वा तत्रापि विशेषस्तेनैवोक्तः (मनुः ८।३६९-७०)—'कन्यैव कन्यां या कुर्यात्तस्यास्तु द्विशतो दमः' । 'या तु कन्यां प्रकुर्यात्स्त्री सा सद्यो मौण्ड्यमर्हति । अङ्गुल्योरेव वा छेदं खरेणोद्वहनं तथा' ॥ इति । कन्यां कुर्यादिति कन्यां योनिक्षतवतीं कुर्यादित्यर्थः । यदा पुनरुत्कृष्टजातीयां कन्यामविशे(१)षात्सकामामकामां वाभिगच्छति तदा हीनस्य क्षत्रियादेर्वध एव । (८।३६६)—'उत्तमां सेवमानस्तु जघन्यो वधमर्हति' । इति मनुस्मरणात् । यदा सवर्णां सकामामभिगच्छति तदा गोमिथुनं शुल्कं तत्पित्रे दद्यात् यदीच्छति । पितरि तु शुल्कमनिच्छति दण्डरूपेण तदेव राज्ञे दद्यात् । सवर्णामकामां तु गच्छतो वध एव । यथाह मनुः (८।३६६)—'शुल्कं दद्यात्सेवमानः समामिच्छेत्पिता यदि' । (८।३६४)—'योऽकामां दूषयेत्कन्यां स सद्यो वधमर्हति । सकामां दूषयंस्तुल्यो न वधं प्राप्नुयान्नरः' ॥ इति ॥ २८८ ॥

(मिता०) किञ्च—

शतमिति । स्त्रीशब्देनात्र प्रकृतत्वात्कन्यावमृश्यते । तस्या यदि कश्चिद्विद्यमानानेवापस्मारराजयक्ष्मादिदीर्घकुत्सितरोगसंसृष्टमैथुनत्वादिदोषान् प्रकाशयेयमकन्येति दूषयत्यसौ शतं दाप्यः । मिथ्याभि-

---

(१) विशेषात्सानुरागामकामां ख. ।

शंसने तु पुनरविद्यमानदोषाविष्कारेण दूषणे द्वे शते दापनीयः । गो-व्यतिरिक्तपशुगमने तु शतं दाप्यः । यः पुनर्हीनां स्त्रियमन्त्यावसायिनीमविशेषात्सकामामकामां वा गां चाभिगच्छत्यसौ मध्यमसाहसं दण्डनीयः ॥ २८९ ॥

(मिता०) साधारणस्त्रीगमने दण्डमाह—

अवरुद्धास्विति । गच्छन्नित्यनुवर्तते । उक्तलक्षणा वर्णस्त्रियो दास्यस्ता एव स्वामिना शुश्रूषाहानिच्युदासार्थं गृह एव स्थातव्यमित्येवं पुरुषान्तरोपभोगतो निरुद्धा अवरुद्धाः । पुरुषनियतपरिग्रहाः भुजिष्याः। यदा दास्योऽवरुद्धा भुजिष्या वा भवेयुस्तदा तासु तथा । चशब्दाद्वेश्यास्वैरिणीनामपि साधारणस्त्रीणां भुजिष्याणां च ग्रहणम् । तासु च सर्वपुरुषसाधारणतया गम्यास्वपि गच्छन् पञ्चाशत्पणान्दण्डनीयः । परपरिगृहीतत्वेन तासां परदारतुल्यत्वात् । एतच्च स्पष्टमुक्तं नारदेन— 'स्वैरिण्यब्राह्मणी वेश्या दासी निष्कासिनी च या । गम्याः स्युरानुलोम्येन स्त्रियो न प्रतिलोमतः ॥ आस्वेव तु भुजिष्यासु दोषः स्यात्परदारवत् । गम्यास्वपि हि नोपेया(१)यत्ताः परपरिग्रहाः' ॥ इति । निष्कासिनी स्वाम्यनवरुद्धा दासी । ननु च स्वैरिण्यादीनां साधारणतया गम्यत्वाभिधानमयुक्तम् । न हि जातितः शास्त्रतो वा काश्चन लोके साधारणाः स्त्रिय उपलभ्यन्ते । तथा हि—स्वैरिण्यो दास्यश्च तावद्वर्णस्त्रिय एव । 'स्वैरिणी या पतिं हित्वा सवर्णं कामतः श्रयेत् । वर्णानामानुलोम्येन दास्यं न प्रतिलोमतः' ॥ इति मनुस्मरणात् । न च वर्णस्त्रीणां पत्यौ जीवति मृते वा पुरुषान्तरोपभोगो घटते । (मनुः५।१५४-१५७)—'दुःशीलः कामवृत्तो वा गुणैर्वा परिवर्जितः । परिचर्यः स्त्रिया साध्व्या सततं देववत्पतिः । कामं तु क्षपयेद्देहं पुष्पमूलफलैः शुभैः । न तु नामापि गृह्णीयात्पत्यौ प्रेते परस्य तु' ॥ इति निषेधस्मरणात् । नापि कन्यावस्थायाः साधारणत्वं, पित्रादिपरिरक्षितायाः कन्याया एव दानोपदेशात् । दात्रभावेऽपि तथाविधाया एव स्वयंवरोपदेशात् । न च दासीभावात्स्वधर्माधिकारच्युतिः । पारतन्त्र्यं हि दास्यं न स्वधर्मपरित्यागः । नापि वेश्या साधारणी वर्णानुलोमजव्यतिरेकेण गम्यजात्यन्तरासम्भवात् । तदन्तःपातित्वं च पूर्ववदेवागम्यत्वम् । प्रति-

(१) यतस्ताः सपरिग्रहाः घ. ।

लोमजत्वे तु तासां नितरामगम्यत्वम् । अतः पुरुषान्तरोपभोगे तासां निन्दितकर्माभ्यासेन पातित्यात् । पतितसंसर्गस्य निषिद्धत्वाच्च न सकलपुरुषोपभोगयोग्यत्वम् । सत्यमेवम् । किं त्वत्र स्वैरिण्याद्युपभोगे पित्रादिरक्षकराजदण्डभयादिदृष्टदोषाभावाद्गम्यत्ववाचोयुक्तिः । दण्डाभावश्चावरुद्धासु दासीष्विति नियतपुरुषपरिग्रहोपाधितो दण्डविधानात्तदुपाधिरहिता(१)स्वर्थादवगम्यते । स्वैरिण्यादीनां पुनर्दण्डाभावो विधानाभावात् । 'कन्यां भजन्ती(२)मुत्कृष्टं न किञ्चिदपि दापयेत्' । इति लिङ्गनिर्देशनाच्चावगम्यते । प्रायश्चित्तं तु स्वधर्मस्खलननिमित्तं गम्यानां गन्तॄणां चाविशेषाद्भवत्येव । यत्पुनर्वेश्यानां जात्यन्तरासम्भवे न वर्णान्तःपातित्वमनुमानादुक्तम्—'वेश्या वर्णानुलोमाद्यन्तःपातिन्यो मनुष्यजात्याश्रयत्वात् ब्राह्मणादिवत्' इति, तन्न । कुण्डगोलकादिभिरनैकान्तिकत्वात् । अतो वेश्याख्या काचिज्जातिरनादिर्वेश्यायामुत्कृष्टजातेः समानजातेर्वा पुरुषादुत्पन्ना पुरुषसम्भोगवृत्तिर्वेश्येति ब्राह्मण्यादिवल्लोकप्रसिद्धिबलादभ्युप(३)गमनीयम् । न च निर्मूलेयं प्रसिद्धिः । स्मर्यते हि स्कन्दपुराणे—'पञ्चचूडा नाम काञ्चनाप्सरसस्तत्सन्ततिर्वेश्याख्या पञ्चमी जातिः' इति । अतस्तासां नियतपुरुषपरिणयनविधिविधुरतया समानोत्कृष्टजातिपुरुषाभिगमने नादृष्टदोषो नापि दण्डः । तासु चानवरुद्धासु गच्छतां पुरुषाणां यद्यपि न दण्डस्तथाप्यदृष्टदोषोऽप्यस्त्येव । 'स्वदारनितः सदा' इति नियमात् । 'पशुवेश्याभिगमने प्राजापत्यं विधीयते' इति प्रायश्चित्तस्मरणाच्चेति निरवद्यम् ॥ २९० ॥

(मिता०) 'अवरुद्धासु दासीषु' इत्यनेन दासीस्वैरिण्यादिभुजिष्याभिगमने दण्डं विदधतस्तास्वभुजिष्यासु दण्डो नास्तीत्यर्थादुक्तं तदपवादमाह—

प्रसह्येति । पुरुषसम्भोगजीविकासु स्वैरिण्यादिषु शुल्कदानविरहेण प्रसह्य बलात्कारेणाभिगच्छतो दशपणो दण्डः । यदि बहव एका(४)मनिच्छन्तीमपि बलात्कारेणाभिगच्छन्ति तर्हि प्रत्येकं चतुर्विंशतिपणपरिमितं दण्डं दण्डनीयाः । यदा पुनस्तदिच्छया भाटिं दत्त्वा पश्चादनिच्छन्तीमपि बलाद् व्रजन्ति तदा तेषामदोषः, यदि व्याध्याद्यभिभवस्तस्या न स्यात् । 'व्याधिता सश्रमा व्यग्रा राजकर्म-

(१) स्वर्थाद्गम्यते घ. । (२) मुत्कृष्टं. । (३) उपगमनीया घ. । (४) मनभिलषन्तीं घ. ।

परायणा । आमन्त्रिता चेन्नागच्छेददण्ड्या वडवा स्मृता' ॥ इति नारदवचनात् ॥ २९१ ॥

(मिता०) गृहीतेति । यदा तु शुल्कं गृहीत्वा स्वस्थापि अर्थपतिं नेच्छति तदा द्विगुणं शुल्कं दद्यात् । तथा शुल्कं दत्त्वा स्वयमनिच्छतः स्वस्थस्य पुंसः शुल्कहानिरेव । 'शुल्कं गृहीत्वा पण्यस्त्री नेच्छती द्विगुणं वहेत् । अनिच्छन् दत्तशुल्कोऽपि शुल्कहानिमवाप्नुयात्' ॥ इति तेनैवोक्तम् । तथान्योऽपि विशेषस्तेनैव दर्शितः— 'अप्रयच्छंस्तथा शुल्कमनुभूय पुमान्स्त्रियम् । आक्रमेण च सङ्गच्छन् (१)पाददन्तनखादिभिः ॥ अयोनौ वाभिगच्छेद्यो बहुभिर्वापि वासयेत् । शुल्कमष्टगुणं दाप्यो विनयं तावदेव तु । वेश्याः प्रधाना यास्तत्र कामुकास्तद्गृहोपिताः । तत्समुत्थेषु कार्येषु निर्णयं संशये विदुः' ॥ इति ॥ २९२ ॥

(मिता०) किञ्च—

अयोनाविति । (२)यस्तु स्वयोषां मुखादावभिगच्छति पुरुषं वाभिमुखो मेहति तथा प्रव्रजितां वा गच्छत्यसौ चतुर्विंशतिपणान्दण्डनीयः ॥ २९३ ॥

(मिता०) किञ्च—

अन्त्याभिगमन इति । अन्त्या चाण्डाली तद्गमने त्रैवर्णिकान्प्रायश्चित्तानभिमुखान् 'सहस्रं त्वन्त्यजस्त्रियम्' इति मनुवचनात्पणसहस्रं दण्डयित्वा कुबन्धेन कुत्सितबन्धेन भगाकारेणाङ्कयित्वा स्वराष्ट्रान्निर्वासयेत् । प्रायश्चित्ताभिमुखस्य पुनर्दण्डनमेव । शूद्रः पुनश्चाण्डाल्यभिगमेऽन्त्य एव चाण्डाल एव भवति । अन्त्यजस्य पुनश्चाण्डालादेरुत्कृष्टजातिस्त्र्यभिगमे वध एव ॥ २९४ ॥

इति स्त्रीसङ्ग्रहणप्रकरणम् ।

(वी०मि०) विवाहादिविधिः स्त्रीणां पुंसां यत्र च कीर्त्यते ।
स्त्रीपुंसयोगसंज्ञं तद्विवादपदमुच्यते ॥

इति नारदोक्तं विवादपदं विवाहप्रकरणेनैव गतार्थत्वादुपेक्ष्य

---

(१) घातदन्तनखा ख-घ. । (२) यः स्वेच्छया योषां घ. ।

प्रकीर्णकाख्यं विवादपदं नारदेन—

प्रकीर्णकेषु विज्ञेया व्यवहारा नृपाश्रयाः ।
राज्ञामाज्ञाप्रतीघातस्तत्कर्मकरणं तथा ॥
पुरप्रदानं भेदश्च प्रकृतीनां तथैव च ।
पाखण्डिनैगमश्रेणिगणधर्मविपर्ययाः ॥
पितापुत्रविवादश्च प्रायश्चित्तव्यतिक्रमः ॥
प्रतिग्रहविलोपश्च कोपश्चाश्रमिणामपि ॥
वर्णसङ्करदोषश्च तद्वृत्तिनियमस्तथा ।
न दृष्टं यच्च पूर्वेषु सर्वं तत्स्यात्प्रकीर्णके ॥

इति लक्षितमुपक्रमते सम्पूर्णप्रकरणेन—

ऊनं वाप्यधिकं वापि लिखेद्यो राजशासनम् ॥
पारदारिकचौरं वा मुञ्चतो दण्ड उत्तमः ॥ २९५ ॥

राज्ञाज्ञप्तमर्थं स्वयमूनमधिकं वा कृत्वा यो लिखति तस्य, पारदारिकचौरं वा मुञ्चति यश्च तस्यापि दण्ड उत्तमसाहसः । आद्येनाऽपिकारेण विरुद्धार्थशिष्टस्य, द्वितीयेन लेखनस्य समुच्चयः॥२९५॥

(मिता०) व्यवहारप्रकरणमध्ये स्त्रीपुंसयोगाख्यमप्यपरं विवादपदं मनुनारदाभ्यां विवृतम् । तत्र नारदः—'विवाहादिविधिः स्त्रीणां यत्र पुंसां च कीर्त्यते । स्त्रीपुंसयोगसंज्ञं तद्विवादपदमुच्यते' ॥ इति । मनुरप्याह (८।२)—'अस्वतन्त्राः स्त्रियः कार्याः पुरुषैः स्वैर्दिवानिशम् । विषयेषु च सज्जन्त्यः संस्थाप्या ह्यात्मनो वशे' ॥ इत्यादि । यद्यपि स्त्रीपुंसयोः परस्परमर्थिप्रत्यर्थितया (१)नृपसमक्षं व्यवहारो निषिद्धस्तथापि प्रत्यक्षेण कर्णपरम्परया वा विदिते तयोः परस्परातिचारे दण्डादिना दम्पती निजधर्ममार्गे राज्ञा स्थापनीयौ, इतरथा दोषभाग्भवतीति व्यवहारप्रकरणे राजधर्ममध्येऽस्य स्त्रीपुंसधर्मजातस्यापदेशः । एतच्च विवाहप्रकरण एव सप्रपञ्चं प्रतिपादितमिति योगीश्वरेण न पुनरत्रोक्तम् ।

साम्प्रतं प्रकीर्णकाख्यं व्यवहारपदं प्रस्तूयते । तल्लक्षणं च कथितं नारदेन—'(२)प्रकीर्णके पुनर्ज्ञेया व्यवहारा नृपाश्रयाः । राज्ञामाज्ञाप्रतीघातस्तत्कर्मकरणं तथा ॥ पुरप्रदानं संभे(३)दः प्रकृतीनां तथैव

(१) नृपसमीपं घ. । (२) र्णकेषु विज्ञेया । (३) भेदश्च घ. ।

च । पाखण्डिनैगमश्रेणीगणधर्मविपर्ययाः । पितापुत्रविवादश्च प्रायश्चित्तव्यतिक्रमः । प्रतिग्रहविलोपश्च कोपश्चाश्रमिणामपि ॥ वर्णसङ्करदोषश्च तद्वृत्तिनियमस्तथा । न दृष्टं यच्च पूर्वेषु सर्वं तत्स्यात्प्रकीर्णके' ॥ इति । प्रकीर्णके विवादपदे ये विवादा राजाज्ञोल्लङ्घनतदाज्ञाकरणादिविषयास्ते नृपसमवायिनः । नृप एव तत्र स्मृत्याचारव्यपेतमार्गे वर्तमानानां प्रतिकूलतामास्थाय व्यवहारनिर्णयं कुर्यात् । एवं च वदता यो नृपाश्रयो व्यवहारस्तत्प्रकीर्णकमित्यर्थाल्लक्षितं भवति॥

तत्रापराधविशेषेण दण्डविशेषमाह—

ऊनमिति । राजदत्तभूमेर्निबन्धस्य वा परिमाणान्न्यूनत्वमाधिक्यं वा प्रकाशयन् राजशासनं योऽभिलिखति यश्च पारदारिकं चौरं वा गृहीत्वा राज्ञेऽनर्पयित्वा मुञ्चति तावुभावुत्तमसाहसं दण्डनीयौ ॥ २९५ ॥

अभक्ष्यैर्दूषयन् (१)विप्रं दण्डमुत्तमसाहसम् ॥
मध्यमं क्षत्रियं वैश्यं प्रथमं शूद्रमर्द्धिकम् ॥ २९६ ॥

(वी०मि०) अभक्ष्यैः पुरीषादिभिर्विप्रं खादयित्वा दूषयन्नुत्तमसाहसं, क्षत्रियं दूषयन् मध्यमसाहसं, वैश्यं दूषयन् प्रथमसाहसं शूद्रं दूषयन् प्रथमसाहसार्द्धमितं दण्ड्यः ॥ २९६ ॥

(मिता०) प्रसङ्गान्नृपाश्रयव्यतिरिक्तव्यवहारविषयमपि दण्डमाह—

अभक्ष्येणेति । मूत्रपुरीषादिना अभक्ष्येण भक्ष्यानर्हेण ब्राह्मणं दूष्य अन्नपानादिमिश्रणेन स्व(२)रूपेण वा दूषयित्वा खादयित्वोत्तमसाहसं दण्ड्यो भवति । क्षत्रियं पुनरेवं दूषयित्वा मध्यमम् । वैश्यं दूषयित्वा प्रथमम् । शूद्रं दूषयित्वा प्रथमसाहसस्यार्धं दण्ड्यो भवतीति सम्बन्धः । लशुनाद्यभक्ष्यदूषणे तु दोषतारतम्याद्दण्डतारतम्यमूहनीयम् ॥ २९६ ॥

कूटस्वर्णव्यवहारी विमांसस्य च विक्रयी ॥
त्र्यङ्गहीनस्तु कर्तव्यो दाप्यश्चोत्तमसाहसम् ॥२९७॥

(वी०मि०)कूटैः कपटनिर्मितैः स्वर्णैः स्वर्णाभासैः कूटादिव्यवहारशीलः स्वर्णकारादिः विमांसस्य कुत्सितस्य श्वादिमांसस्य विक्रयशी-

(१) अभक्ष्येण द्विजं दूष्य—इति मु०पु० पाठः । (२) द्रव्यरूपेण घ. ।

लः शौनिकादिः नासाकर्णकरैस्त्रिभिरङ्गैर्हीनः कर्तव्य उत्तमसाहसं च दाप्यः । आद्येन चकारेण ब्राह्मणस्य शरीरदण्डानर्हस्य निर्वासनादि समुच्चिनोति । द्वितीयेन मिलितस्य दण्डद्वयस्य कर्तव्यत्वमभिप्रैति । तुशब्देन—

सर्वकण्टकपापिष्ठं हेमकारं तु पार्थिवः ।
प्रवर्तमानमन्याये छेदयेल्लवशः क्षुरैः ॥

इति देवब्राह्मणस्वर्णपरमन्यत्र व्यवच्छिनत्ति ॥ २९७ ॥

(मिता०) किञ्च—

कूटेति । रसवेधाद्यापादितवर्णोत्कर्षैः कूटैः स्वर्णैर्व्यवहारशीलो यः स्वर्णकारादिः, यश्च विमांसस्य कुत्सितमांसस्य श्वादिसम्बद्धस्य विक्रयशीलः सौनिकादिः, चशब्दात्कूटरजतादिव्यवहारी च ते सर्वे प्रत्येकं नासाकर्णकरैस्त्रिभिरङ्गैर्हीनाः कार्याः । चशब्दा(१)त्त्र्यङ्गच्छेदेन समुच्चितमुत्तमसाहसं दण्डं दाप्याः । यत्पुनर्मनुनोक्तम् (९।२९२)—'सर्वकण्टकपापिष्ठं हेमकारं तु पार्थिवः ॥ प्रवर्तमानमन्याये छेदयेल्लवशः क्षुरैः' ॥ इति, तदेतद्देवब्राह्मणराजस्वर्णविषयम् ॥ २९७ ॥

चतुष्पादकृतो दोषो नापेहीति प्रजल्पतः ॥
काष्ठलोष्टेषुपाषाणबाहुयुग्यकृतस्तथा ॥ २९८ ॥
छिन्ननस्येन यानेन तथा भग्नयुगादिना ॥
पश्चाच्चैवाऽपसरता हिंसने स्वाम्यदोषभाक् ॥ २९९ ॥
शक्तो ह्यमोक्षयन् स्वामी शृङ्गिणो दंष्ट्रिण(२)स्तथा ॥
प्रथमं साहसं दद्याद्विक्रुष्टे द्विगुणं तथा ॥ ३०० ॥

(वी० मि०) अपेहीति प्रकर्षेणोच्चैर्जल्पतः चतुष्पादेन हस्तिवृषादिना कृतो मारणादिरूपो दोषोऽपराधस्तत्स्वामिनो न भवति । तथाऽपेहीति प्रजल्पतः शकटस्थितैर्युग्यभिन्नैः सर्वैरेव व्यापार्यमाणैर्वा काष्ठादिभिः कृतो दोषो न भवति । छिन्ननासारज्जुना भग्नयुगकीलकादिमता वा शकटादियानेन पश्चात्पृष्ठतः चशब्दात्तिर्यक् चाऽपसरता च यानेन हिंसनेऽपि तत्स्वामी न दोषभाक् । हि यतः शक्तः

(१) शब्दादङ्गच्छेदेन ख । (२) दंष्ट्रिणां शृङ्गिणां तथा—इति मु०पु० पाठः ।

सन् शृङ्गिणो गवादेर्दंष्ट्रिणो हस्त्यादेः हिंसनीयममोक्षयन्नेव प्रथमसाहसं नयेत् । तथा उच्चैर्विक्रुष्टे सत्यमोक्षयंस्तद्विगुणं दमं दद्यात् । युग्यं वाहनं, युगं युगकाष्ठम् । तथापदेन प्रथमेन तथोक्तच्छेदसङ्ग्रहः । द्वितीयेन तु सारथिदोषं विना भग्नत्वमुक्तम् ।

यत्राऽपवर्त्तते युग्यं वैगुण्याद्योजकस्य तु ।
तत्र स्वामी भवेद्दण्ड्यो हिंसायां द्विशतं दमम् ॥

इति मनुना सारथिदोषेण स्वामिनो दण्ड्यत्वाभिधानात् । अपसरतैवैत्येवकारेण न हननार्थप्रवृत्तिव्यवच्छेदः । तृतीयेन तथापदेन नखिनां भल्लुकादीनां सङ्ग्रहः ॥ २९८-३०० ॥

(मिता०) विषयविशेषे दण्डाभावमाह—

चतुष्पादकृत इति । चतुष्पादैर्गोगजादिभिः कृतो यो दोषो मनुष्यमारणादिरूपोऽसौ गवादिस्वामिनो न भवत्यपसरेति प्रकर्षेणोच्चैर्भाषमाणस्य । तथा लकुटलोष्ठसायकपाषाणोत्क्षेपणेन बाहुना युग्येन च युगं वहताश्वादिना कृतो यः पूर्वोक्तो दोषः सोऽपि काष्ठादीन्प्रास्यतो न भवत्यपसरेति प्रजल्पतः । काष्ठाद्युत्क्षेपणेन हिंसायां दोषाभावकथनं दण्डाभावप्रतिपादनार्थम् । प्रायश्चित्तं पुनरबुद्धिपूर्वकरणनिमित्तमस्त्येव । काष्ठादिग्रहणं च शक्तितोमरादेरुपलक्षणार्थम् ॥ २९८ ॥

(मिता०) किञ्च—

छिन्ननस्येनेति । नसि भवा रज्जुर्नस्या छिन्ना शकटादियुक्तबलीवर्दनस्या रज्जुर्यस्मिन् याने तत् छिन्ननस्यं शकटादि तेन । तथा भग्नयुगेन, आदिग्रहणाद्भग्नाक्षचक्रादिना च यानेन पश्चात्पृष्ठतोऽपसरता चशब्दात्तिर्यग(१)पगच्छता प्रतिमुखं चागच्छता च मनुष्यादिहिंसने स्वामी प्रा(२)जको वा दोषभाङ् न भवति । अतत्प्रयत्नजनितत्वाद्धिंसनस्य । तथा च मनुः (९।२९१।२९२)—'छिन्ननस्ये भग्नयुगे तिर्यक्प्रतिमुखागते । अक्षभङ्गे च यानस्य चक्रभङ्गे तथैव च ॥ छेदने चैव यन्त्राणां योक्तृरश्म्योस्तथैव च । (३)आक्रन्दे सत्यपेहीति न दण्डं मनुरब्रवीत्' ॥ इति ॥ २९९ ॥

(मिता०) उपेक्षायां स्वामिनो दण्डमाह—

शक्त इति । अप्रवीणप्राजकप्रेरितैर्दंष्ट्रिभिर्गजादिभिः शृङ्गिभिर्ग-

(१) तिर्यगपसरता घ. । (२) प्राजकः सारथिः । (३) आक्रन्दनेप्यपैहीति घ. ।

वादिभिर्वध्यमानं समर्थोऽपि तत्स्वामी यद्यमोक्षयन्नुपेक्षते तदा अकुशलप्राजकनियोजननिमित्तं प्रथमसाहसं दण्डं दद्यात् । यदा तु मारितोऽहमिति विक्रुष्टेऽपि न मोक्षयति तदा द्विगुणम् । यदा पुनः प्रवीणमेव प्राजकं प्रेरयति तदा प्राजक एव दण्ड्यो न स्वामी । यथाह मनुः (८।२९४)—'प्राजकश्चेद्भवेदाप्तः प्राजको दण्डमर्हति' । इति । प्राजको यन्ता । आप्तोऽभियुक्तः । प्राणिविशेषाच्च दण्डविशेषः कल्पनीयः । यथाह मनुः (८।२९६-९८)—'मनुष्यमारणे क्षिप्रं चौरवत्किल्बिषी भवेत् । प्राणभृत्सु महत्स्वर्धं गोगजोष्ट्रहयादिषु ॥ (१)क्षुद्राणां च पशूनां तु हिंसायां द्विशतो दमः । पञ्चाशत्तु भवेद्दण्डः शुभेषु मृगपक्षिषु ॥ गर्दभाजाविकानां तु दण्डः स्यात्पञ्चमाषकः । माषकस्तु भवेद्दण्डः श्वशूकरनिपातने' ॥ इति ॥ ३०० ॥

जारं चौरेत्यभिवदन् दाप्यः पञ्चशतं दमम् ॥
उपजीव्य धनं मुञ्चंस्तदेवाऽष्टगुणीकृतम् ॥ ३०१ ॥

(वी०मि०) जारं कुलकलङ्कशङ्कया चौरेत्यभि सर्वतो वदन् पञ्चशतं पणानां दमं दाप्यः । धनमुपजीव्य उत्कोचरूपेण गृहीत्वा जारं मुञ्चन् तदेव गृहीतधनमष्टगुणीकृतं दाप्यः ॥ ३०१ ॥

(मिता०) किञ्च—

जारमिति । स्ववंशकलङ्कभयाज्जारं पारदारिकं 'चौर निर्गच्छे'त्यभिवदन् पञ्चशतं पणानां पञ्च शतानि यस्मिन्दमे स तथोक्तस्तं दमं दाप्यः । यः पुनर्जारहस्ताद्धनमुपजीव्य उत्कोचरूपेण गृहीत्वा जारं मुञ्चत्यसौ यावद् गृहीतं तावदष्टगुणीकृतं दण्डं दाप्यः ॥३०१॥

राज्ञोऽनिष्टप्रवक्तारं तस्य चा(२)क्रोशकारिणम् ॥
तन्मन्त्रस्य च भेत्तारं छित्त्वा जिव्हां प्रवासयेत् ॥ ३०२ ॥

(वी० मि०) राज्ञोऽनिष्टं परास्तत्वादि तदुच्चैर्वदन्तं राजनिन्दाकारिणं तन्मन्त्रितार्थं तदमित्रेषु प्रकाशयन्तं जिव्हाच्छेदपूर्वकं प्रवासयेदित्यर्थः । आद्यचकारेण—

अपवक्तुश्च राजानं धर्मे च स्वे व्यवस्थितम् ।
जिव्हाछेदाद्भवेद् बुद्धिः सर्वस्वहरणे न चेत् ॥

---

(१) क्षुद्रकाणां पशूनां तु घ. ।

(२) तस्यैवाक्रोशकारिणम्—इति मु० पु० पाठः ।

इति नारदोक्तसर्वस्वापहारसमुच्चयः । द्वितीयचकारेण—

राज्ञः कोशापहर्तृंश्च प्रतिकूले व्यवस्थितान्।
घातयेद्विविधैर्दण्डैररीणां चोपजायकान् ॥

इति मनूक्तस्य तत्तदपराधेषु समुच्चयः ॥ ३०२ ॥

(मिता०) किञ्च—

राज्ञ इति । राज्ञोऽनिष्टस्यानभिमतस्यामि(१)त्रस्तोत्रादेः प्रकर्षेण भूयोभूयो वक्तारं तस्यैव राज्ञ आक्रोशकारिणं निन्दाकरणशीलं तदीयस्य च मन्त्रस्य स्वराष्ट्रविवृद्धिहेतोः परराष्ट्रापक्षयकरस्य वा भेत्तारममित्रकर्णेषु जपन्तं तस्य जिह्वामुत्कृत्य स्वराष्ट्रान्निष्कासयेत्। कोशापहरणादौ पुनर्वध एव । (मनुः ९।२७५)—'राज्ञः कोशापहर्तृंश्च प्रतिकूलेषु च स्थितान्। घातयेद्विविधैर्दण्डैररीणां चो(२)पकारकान्' ॥ इति मनुस्मरणात्। विविधैः सर्वस्वापहाराङ्गच्छेदवधरूपैरित्यर्थः । सर्वस्वापहारेऽपि यद्यस्य जीवनोपकरणं तन्नापहर्तव्यं चौर्योपकरणं विना । यथाह नारदः—'आयुधान्यायुधीयानां वाह्यादीन्वाह्यजीविनाम्। वेश्यास्त्रीणामलङ्कारान्वाद्यातोद्यादि तद्विदाम् ॥ यच्च यस्योपकरणं येन जीवन्ति कारुकाः। सर्वस्वहरणेऽप्येतन्न राजा हर्तुमर्हति' ॥ इति । ब्राह्मणस्य पुनः 'न (३)शारीरो दण्डः' इति निषेधाद्वधस्थाने शिरोमुण्डनादिकं कर्तव्यम्। 'ब्राह्मणस्य वधो मौण्ड्यं पुरान्निर्वासनाङ्कने । ललाटे चाभिशस्ताङ्कः प्रयाणं गर्दभेन तु' ॥ इति मनुस्मरणात् ॥ ३०२ ॥

मृताङ्गलग्नविक्रेतुर्गुरोस्ताडयितुस्तथा ॥
राजयानासनारोढुर्दण्ड उत्तमसाहसः ॥ ३०३ ॥

(वी० मि०) शवाङ्गसम्बन्धिमालादिविक्रेतुर्गुरुताडकस्य राजकीयाश्वसिंहासनाद्यारोहणं तदननुमत्या कुर्वतश्चोत्तमसाहसो दण्डः। तथाशब्देन रज्जुवेणुदण्डातिरिक्तेन पृष्ठभिन्नदेशे वा भार्यापुत्रादिताडयितुस्सङ्ग्रहः ॥ ३०३ ॥

(मिता०) किञ्च—

मृताङ्गेति । मृतशरीरसम्बन्धिनो वस्त्रपुष्पादेर्विक्रेतुः गुरोः पित्रा-

---

(१) मित्रस्तवादेः घ. । (२) चोपजायकान् घ. ।
(३) न शारीरो ब्राह्मणे दण्डः ।

चार्यादेस्ताडयितुः तथा राजानुमतिं विना तद्यानं गजाश्वादि आ-
सनं सिंहासनादि आरोहतश्चोत्तमसाहसो दण्डः ॥ ३०३ ॥

द्विनेत्रभेदिनो राजद्विष्टादेशकृतस्तथा ॥

विप्रत्वेन च शूद्रस्य जीवतोऽष्टशतो दमः ॥ ३०४ ॥

(वी० मि०) परस्य नेत्रभेदनकर्तुः राजशत्रुसमाज्ञप्तार्थकर्तु-
र्विप्रलिङ्गधारणेन प्रतिग्रहादिकं कृत्वा जीवतः शूद्रस्य चाऽष्टौ
पणशतानि दण्ड इत्यर्थः । यदि विप्रत्वेन जीवता शूद्रेण द्विजा-
तिभिर्ब्राह्मणस्य योनौ वा सम्बन्ध आचरितस्तदासौ वध्य एव ।

तान् सर्वान् घातयेद्राजा शूद्रांश्च द्विजलिङ्गिनः ।

इति मनुवचनात् । 'श्राद्धभोजनादिस्मार्तकर्मार्थं विप्रवेषधा-
रिणः शूद्रस्य तु तप्तशलाकया यज्ञोपवीतवद्बपुष्यालिखे'दिति स्मृ-
त्यन्तरोक्तं दण्डनं द्रष्टव्यम् ।

यो लोभादधमो जातो जीवेदुत्कृष्टकर्मभिः ।

तं राजा निर्धनं कृत्वा क्षिप्रमेव प्रवासयेत् ॥

इति मनुवचनं वैश्यक्षत्रियपरम् । तथाशब्देन संवत्सरान्ते तव
राज्यच्युतिर्भविष्यतीति राजाद्विष्टमाशंसतः सङ्ग्रहः ॥ ३०४ ॥

(मिता०) किञ्च—

द्विनेत्रेति । यः पुनः क्रोधादिना परस्य नेत्रद्वयं भिनत्ति । यश्च
ज्योतिःशास्त्रवित् गुर्वादिहिते(१)च्छुव्यतिरिक्तो राज्ञो द्विष्टमनिष्टं
संवत्सरान्ते तव राज्यच्युतिर्भविष्यतीत्येवमादिरूपमादेशं करोति ।
तथा यः शूद्रो भोजनार्थं यज्ञोपवीतादीनि ब्राह्मणलिङ्गानि दर्शयति
तेषामष्टशतो दमः । अष्टौ पणशतानि यस्मिन्दमे स तथोक्तः ।
'श्राद्धभोजनार्थं पुनः शूद्रस्य विप्रवेषधारिणस्तप्तशलाकया यज्ञो-
पवीतवद्बपुष्यालिखेत्' इति स्मृत्यन्तरोक्तं द्रष्टव्यम् । वृत्त्यर्थं तु
यज्ञोपवीतादिब्राह्मणलिङ्गधारिणो वध एव । 'द्विजातिलिङ्गिनः शूद्रा-
न्घातयेत्' इति स्मरणात् ॥ ३०४ ॥

दुर्दृष्टांस्तु पुनर्दृष्ट्वा व्यवहारान्नृपेण तु ॥

सभ्याः सजयिनो दण्ड्या विवादाद्द्विगुणं पृथक्(२) ॥३०५॥

(१) हितेप्सु ख.। (२) दमम्-इति मु. पु. पाठः ।

(वी० मि०) दुर्दृष्टान् राजद्वेषादिभिरसम्यग्विचारितानतथा-त्वेन ज्ञातान् व्यवहारान् पुनः शास्त्रानुसारेण स्वयं दृष्ट्वा नृपेण पूर्व-व्यवहारदर्शिनः सभ्या असम्यग्विचारजनितजयवत्तत्सहिता विवा-दपदात् द्विगुणं पृथक् प्रत्येकं दण्ड्याः । पृथगित्यत्र दममिति क्वचि-त्पाठः । जयदण्डविधानार्थं प्रागुक्तोऽपि सभ्यदण्ड इह प्रदर्शितः । आद्यतुशब्देन प्रामाणिकतयाऽवधारितैः सभ्यैर्दृष्टे पुनर्दर्शनसभ्य-दण्डयोर्व्यवच्छेदः । द्वितीयतुशब्देन कपटपराजितस्य दण्डो व्यव-च्छिद्यते ॥ ३०५ ॥

(मिता०) रागलोभादिनाऽन्यथा व्यवहारदर्शने दण्डमाह—

दुर्दृष्टानिति । दुर्दृष्टान् स्मृत्याचारप्राप्तधर्मोल्लङ्घनेन रागलोभादि-भिरसम्यग्विचारितत्वेनाशङ्क्यमानान् व्यवहारान् पुनः स्वयं राजा सम्यग्विचार्य निश्चितदोषाः पूर्वसभ्याः (१)सजयिनः प्रत्येकं विवाद-पदे यो दमः पराजितस्य तद्द्विगुणं दाप्याः । अप्राप्तजेतृदण्डविधिपर-त्वाद्वचनस्य रागाल्लोभादित्यादिना श्लोकेनापौनरुक्त्यम् । यदा पुनः साक्षिदोषेण व्यवहारस्य दुर्दृष्टत्वं ज्ञातं तदा साक्षिण एव दण्ड्या न जयी नापि सभ्याः । यदा तु राजानुमत्या व्यवहारस्य (२)दुर्दृ-ष्टत्वं ज्ञातं तदा सर्व एव राजसहिताः सभ्यादयो दण्डनीयाः । 'पादो गच्छति कर्तारं पादः साक्षिणमृच्छति । पादः सभासदः सर्वान्पादो राजानमृच्छति' ॥ इति वचनात् । एतच्च प्रत्येकं राजादीनां दोषप्र-तिपादनपरं न पुनरेकैक(३)स्यैव पापापूर्वस्य विभागाय । यथो-(४)क्तम्—'कर्तृसमवायिफलजननस्वभावत्वादपूर्वस्य' इति ॥ ३०५ ॥

यो मन्येताऽजितोऽस्मीति न्यायेनापि पराजितः ॥
तं स(५)भायां पुनर्जित्वा दापयेद्द्विगुणं दमम् ॥ ३०६ ॥

(वी० मि०) पूर्वविचारकस्य प्रामाणिकत्वसंशयेनाऽजितो-ऽस्मीति यो न्यायेन पराजितोऽपि सन् मन्येत तं परो वादी पुनर्जि-त्वा विवादपदात् द्विगुणं दमं दापयेदित्यर्थः ॥ ३०६ ॥

(मिता०) न्यायतो निर्णीतव्यवहारस्य प्रत्यावर्तयितुर्दण्डमाह—

य इति । यः पुनर्न्यायमार्गेण पराजितोऽपि औद्धत्यान्नाहं परा-

---

(१) जयिसहिताः घ. । (२) दुर्दृष्टता तदा ख. । (३) रेकस्यैव. ।
(४) क्वचिन्नास्ति । (५) तमायान्तं—इति मु० पु० पाठः ।

जितोऽस्मीति मन्येत तमायान्तं कूटलेख्याद्युपन्यासेन पुनर्धर्माधिकारिणमधितिष्ठन्तं धर्मेण पुनः पराजयं नीत्वा द्विगुणं दण्डं दापयेत्। नारदेनाप्युक्तम्—'तीरितं चानुशिष्टं वा यो मन्येत विधर्मतः। द्विगुणं दण्डमास्थाय तत्कार्यं पुनरुद्धरेत्' ॥ इति । तीरितं साक्षिलेख्यादिनिर्णीतमनुद्धृतदण्डम् । अनुशिष्टमुद्धृतदण्डम् । दण्डपर्यन्तं नीतमिति यावत् । यत्पुनर्मनुवचनम् (९।२३३)—'तीरितं चानुशिष्टं च यत्र क्वचन विद्यते । कृतं तद्धर्मतो ज्ञेयं न तत्प्राज्ञो निवर्तयेत्' ॥ इति । तदर्थिप्रत्यर्थिनोरन्यतरवचनाद्व्यवहारस्याधर्मतो वृतत्वाशङ्कायां पुनर्द्विगुणदण्डप्रतिज्ञापूर्वकं व्यवहारं प्रवर्तयेत्, न पुनर्धर्मतो वृत्तत्वनिश्चयेऽपि राज्ञा लोभादिना प्रवर्तयितव्य इत्येवंपरम् । यत्पुनर्नृपान्तरेणापि न्यायापेतं कार्यं निर्वर्तितं तदपि सम्यक्परीक्षणेन धर्म्ये पथि स्थापनीयम् । 'न्यायापेतं यदन्येन राज्ञा ज्ञानकृतं भवेत् । तदप्यन्यायविहितं पुनर्न्याये निवेशयेत्' ॥ इति स्मरणात् ॥ ३०६ ॥

(वी० मि०) शास्त्रानुसारेण दण्डो ग्राह्य इत्युक्तः, यदि तु शास्त्राननुमतो दण्डो राज्ञा ग्राह्यते तदा राजैवाऽपराध्यति स एव दण्डं दद्यादित्याह—

राज्ञाऽन्यायेन यो दण्डो गृहीतो वरुणाय तम् ॥
निवेद्य दद्याद्विप्रेभ्यः स्वयं त्रिंशद्गुणीकृतम् ॥ ३०७ ॥

अन्यायेन शास्त्राननुसारेण यो दण्डो गृहीतस्तं दण्डं त्रिंशद्गुणीकृतं वरुणाय निवेद्य उत्सृज्य स्वयं विप्रेभ्यो दद्यात् प्रतिपादयेत् ॥ ३०७ ॥

इति श्रीसकलसामन्तचक्रचूडामणिमरीचिमञ्जरीनीराजितचरणकमलश्रीमन्महाराजाधिराजमधुकरसाहिसूनुश्रीमन्महाराजाधिराजचतुरुदधिवलयवसुन्धराहृदयपुण्डरीकविकासदिनकरश्रीवीरसिंहदेवोद्योतितश्रीहंसपण्डितात्मजश्रीपरशुराममिश्रसूरिसूनुसकलविद्यापारावारपारीणधुरीणश्रीमन्मित्रमिश्रकृते श्रीवीरमित्रोदयाख्याने श्रीयाज्ञवल्क्यव्याख्याने प्रकीर्णकप्रकरणं नाम द्वितीयोऽध्यायः ॥

(मिता०) अन्यायगृहीतदण्डधनस्य गतिमाह—

राज्ञेति । अन्यायेन यो दण्डो राज्ञा लोभाद् गृहीतस्तं त्रिंशद्गुणीकृतं वरुणायेदमिति संकल्प्य ब्राह्मणेभ्यः स्वयं दद्यात् । यस्माद्दण्डरूपेण यावद् गृहीतमन्यायेन तावत्तस्मै प्रतिदेयमितरथापहारदोषप्रसङ्गात् । अन्यायदण्डग्रहणे पूर्वस्वामिनः स्वत्वविच्छेदाभावाच्चेति ॥ ३०७ ॥

इति श्रीमत्पद्मनाभभट्टोपाध्ययात्मजस्य श्रीमत्परमहंसपरिव्राजकाचार्यविज्ञानेश्वरभट्टारकस्य कृतौ ऋजुमिताक्षराख्यायां याज्ञवल्कीयधर्मशास्त्रविवृतौ द्वितीयोऽध्यायो व्यवहाराख्यः समाप्तिमगात् ॥

अथास्मिन्नध्याये प्रकरणानुक्रमणिका कथ्यते । आद्यं साधारणव्यवहारमातृकाप्रकरणम् १ । असाधारणव्यवहारमातृकाप्रकरणम् २ । ऋणादानम् ३ । उपनिधिप्रकरणम् ४ । साक्षिप्रकरणम् ५ । लेख्यप्रकरणम् ६ । दिव्यप्रकरणम् ७ । दायविभागः ८ । सीमाविवादः ९ । स्वामिपालविवादः १० । अस्वामिविक्रयः ११ । दत्ताप्रदानिकम् १२ । क्रीतानुशयः १३ । अभ्युपेत्याशुश्रूषा १४ । संविद्व्यतिक्रमः १५ । वेतनादानम् १६ । द्यूतसमाह्वयाख्यम् १७ । वाक्पारुष्यम् १८ । दण्डपारुष्यम् १९ । साहसम् २० । विक्रीयासम्प्रदानम् २१ । सम्भूयसमुत्थानम् २२ । स्तेयप्रकरणम् २३ । स्त्रीसङ्ग्रहणम् २४ । प्रकीर्णकम् २५ । इति पञ्चविंशतिप्रकरणानि ॥

उत्तमोपपदस्येयं शिष्यस्य कृतिरात्मनः ।
धर्मशास्त्रस्य विवृतिर्विज्ञानेश्वरयोगिनः ॥ १ ॥

अथ प्रायश्चित्ताध्यायः ।

निःसाम्यं(१) स्वस्य शंसन्निव विदधदिव द्वैतवार्तामिहार्ता—
मद्वन्द्वं शीलयिष्यन्निव च निजपदं शीलिताद्वन्द्वभावः ॥
अध्यास्त्वां शुद्धसत्त्वाङ्कुर इव विशदो विश्वभृत्क्रोडभर्तु-
र्दंष्ट्रेवोच्चैरनाशीहरमुकुटशशीवै(२)कदन्तस्य दन्तः ॥ १ ॥
अस्ति क्षोणिप्रशस्तिस्तनुरिव गिरिशस्योऽछापूरपूर्वा
दुर्वारा भास्वदुर्गा तनुरतनुरिपुर्विभ्रती भूरिभूतिम् ॥
नीराजद्राजलक्ष्मीः सगुणमपि रुचा निर्धुनाना पिनाकं
इष्यन्नागाजिनश्रीः सुवृषमधिगता नागराबद्धशोभा ॥ २ ॥
अरिकुलकरिकुम्भकूटपाटीशिखरितटीमिव यां प्रभापटीयान् ॥
अधिवसति महीन्दुर्वीरसिंहो मधुकरसाहिमहीशसिन्धुजन्मा ॥ ३ ॥
श्रेयःसंभृतवीरसिंहनृपतेराप(३) प्रतापोदया—
द्दावोद्दामहुताशनो(४)हितचमूरार्द्रेन्धनस्य श्रियम् ॥
या(५) चान्तः स्फुटति ध्वनिं प्रकटयत्यस्य(६)श्रुधारारसा-
विर्भावं तनुते तनोति कुयशोधूमैर्जगच्छ्यामलम् ॥ ४ ॥
गाम्भीर्यं बहु वीरसिंहनृपतेरम्भोधिरन्तः स्मरन्
दुर्वारौर्वशिखिच्छलेन निविडप्रौढप्रतापं दधौ ॥
स्मारंस्मारमुदारसारमधिकोदञ्चच्चमत्कारतो
जातोऽचेतन एव जातजडिमा श्यामाकृतिः क्ष्माधरः ॥ ५ ॥
बाल्याबाल्यान्तरालस्थगितमिति(७) मनः कामकौमारकेली-
मस्वीकुर्वन् किशोरीचरण इव रिपुश्शृङ्खलीभूय भूयः ॥
क्रीडान्तावस्थकान्ताजन इव विगलत्कुन्तलो व्यस्तवासा
यस्य त्रासाज्जरत्याः स्तन इव निपतन्नुन्नतिं नैव लेभे ॥ ६ ॥

---

(१) निःस्वाम्यं–इति क० पु० पाठः । (२) शशी चैक–इति क० ख० पु० पाठः ।
(३) नृपतेरायप्रता–इति क० ख० पु० पाठः । (४) हुताशनोहित–इति क० ख० पु० पाठः ।
(५) येनान्तः–इति क० पु० पाठः । (६) त्यस्याश्रु०–इति ख० पु० पाठः ।
(७) स्थगितमिव–इति क० पु० पाठः ।

भगोलाद् भूगोलाद्बहिरभियियासन्ति भवितुं
पठानाः पाठीना इव जलविलीना(१) धियमधुः ॥
मघो मोघारम्भोऽपसरति बुँदेलाकुलपतौ
रणार्थं दुर्वारे रणति रणसारे रणभुवि ॥ ७ ॥
बिभ्राणो बुधमित्रतां कविगुरू राजा धरानन्दनः
शोभाभिर्विलसत्तमो दिवि लसत्केतुश्च भास्वत्सुतः ॥
इत्थं जन्यजनुर्नवग्रहतनुः किन्त्वस्ति तुङ्गः सदा
सोद्रेकः किल वीरसिंहधरणीधौरेयचूडामणिः ॥ ८ ॥
शुभ्राभाविभवार्थमात्तवृतपयो भोगीन्द्रभागीरथी-
भास्वद्भूतिभनाथभूषित(२)वपुः कैलासवासी भवन् ॥
विश्वोत्तंसबुँदेलवीरनृपतेः(३) सम्भाव्य शम्भुर्यशः
शान्त्यै साम्यविधेर्बभार गरलं कण्ठे किमुत्कण्ठितः ॥ ९ ॥
हेमोर्वीधरकर्णिकापरमहाशैलोच्च(४)संवर्तिका
व्यालेन्द्रैकमृणालिका गजघटाव्यालीनभृङ्गालिका ॥
सप्ताम्भोधिमधूलिकाविमलिका क्षोणीयशोमालिका
सम्पर्केऽप्रतिमल्लवीरनृपतेः शुभ्रारविन्दायते ॥ १० ॥
व्रीडाभिर्जडिमोदयादुपलतां चिन्तामणिः पाशवं
कामं कामगवी च कल्पविटपी स्वर्गाटवीं गाहते ॥
आकर्ण्योर्ज्जितवीरसिंहनृपतेर्दानोर्ज्जिहानं यशः
सान्तर्द्धानतयाऽद्य निर्दयमधो नेतारमस्तौद्बलिः ॥ ११ ॥
वसु वर्षति वीरसिंहदेवो जलदः केवलमम्बु यद्विजेषु ॥
इयतैव यशोऽवदातविश्वो मलिनः सोऽजनि लज्जया तयैव ॥१२॥
दूराद् दुश्च्यवनो दिवस्पतिरभूद्दिक्कोणभाक् पावकः
कीनाशः स्वयमेव दण्डमितवान् रक्षोऽपि रक्षोक्तिभाक् ॥
पाशं च स्वयमाददे पतिरपां वातो गतोऽदृश्यतां
प्रस्थाने धनदोऽस्य गुह्यकपदं दुर्गाप्ति(५)मुग्रोऽचरत् ॥ १३ ॥
आरोहो गीर्लतायाः सदुपकृतिपदं धर्मभूमीरुहाणा-
मुद्यानं शुद्धकीर्तेरुपचयभवनं श्रीमृगीवागुरेव ॥

(१) जनविलीनां-इति क० पु० पाठः ।
(२) भावितवपुः-इति क०ख०पु०पाठः । (३) वीरश्रीयुतवीरसिंहनृपते-इति क०पु०पाठः ।
(४) शैलौघ-इति क० पु० पाठः । (५) दुर्गातिमुद्रो-इति ख० पु० पाठः ।

आकारो विप्रताया निधिरपि महसः सर्वविद्यानवद्यो
यद्द्वारि द्योतते श्रीद्युमणिरिव तमो मूर्छयन् मित्रमिश्रः ॥ १४ ॥
क्ष्माचक्रं चारु चक्रे(१) समुचितनयतो रक्षितं भूमिदेवान्
देवांश्च प्राप्तसेवान् विमलमपि यशो वीरसिंहो नरेन्द्रः ॥
वित्तं मत्वाप्यसारं व्यतरदविरतं याज्ञवल्क्योक्ति(२)मुक्ता-
हारं(३) स्मृत्यर्थसारं रचयितुमथ स प्रादिशन्मित्रमिश्रम् ॥ १५ ॥
उत्तंसस्तीरभुक्तेरखिलबुधगुरुः श्रीसदानन्दधीमान्
श्रीभाजो मित्रमिश्राज्जगदुपकृतये विभ्रदादेशदीपम् ॥
ज्ञानानां दैन्यदोषापहमकलिभयं याज्ञवल्क्योक्तिकोषात्
दृष्ट्वा स्मृत्यर्थसारं समचिनुत यशो धर्मलक्ष्मीविहारम् ॥ १६ ॥

(वी०मि०)अथ तृतीयाध्यायमारभते। तत्र चैतानि प्रकरणानि-(१) आशौचप्रकरणम् [श्लो०१-३४] (२)आपद्धर्मप्रकरणम् [श्लो०३५-४४] (३) वानप्रस्थधर्मप्रकरणम् [श्लो०४५-५५] (४)यतिधर्मप्रकरणम् [श्लो०५६-२०५] (५)प्रायश्चित्तप्रकरणम् [श्लो२०६-३३४] इति । तत्र शौचस्य वैदिककर्मसु प्रागुक्तेषु वक्ष्यमाणेषु चाऽङ्गतयाऽशौचनिरूपणद्वारा तन्निरूपयिष्यन्नादौ शौचानङ्गकानि कानिचित्कर्माण्याह—

ऊनद्विवर्षं निखनेन्न कुर्यादुदकं ततः ॥
आश्मशानादनुव्रज्य इतरो ज्ञातिभिर्मृतः ॥ १ ॥
यमसूक्तं तथा गाथा जपद्भिर्लौकिकाग्निना ॥
स दग्धव्य उपेतश्चेदाहिताग्न्यावृतार्थवत् ॥ २ ॥

असम्पूर्णद्विवर्षं प्रेतं भूमौ गर्तं कृत्वा निखनेन्न तु दहेत् । न च "सकृत् प्रसिञ्चन्त्युदक"मिति सामान्यविधिप्राप्तमप्युदकं तस्य कुर्यात् । अत्र विशेषमाह मनुः—

उनाद्विवार्षिकं प्रेतं निदध्युर्बान्धवा बहिः ।
अलङ्कृत्य शुचौ भूमावस्थिसञ्चयनादृते ॥
नाऽस्य कार्योऽग्निसंस्कारो न च कार्योदकक्रिया ।
अरण्ये काष्ठवत्त्यक्त्वा क्षपेयुस्त्र्यहमेव च ॥

काष्ठवदित्युदासीनतां प्रतिपादयत्पदं श्राद्धाद्यभावं सूचयति ।

(१) चारुचक्रं-इति ख० पु० पाठः । (२) मुक्त्वा-इत्युभयत्र पाठः ।
(३) चारं-इति क० ख० पु० पाठः ।

यमश्च—

ऊनद्विवार्षिकं प्रेतं घृताक्तं निखनेद्भुवि।
यमगाथां गायमानो यमसूक्तं जपन्नपि॥

मनुः—

नाऽत्रिवर्षस्य कर्तव्या बान्धवैरुदकक्रिया।
जातदन्तस्य वा कुर्युर्नाम्नि वाऽपि कृते सति॥

अत्रिवर्षस्य तृतीयवर्षारम्भशून्यस्य द्वितीयार्द्धस्य प्रेताहितार्थित्वे ताभ्यां च निदानपरत्वं प्रकृतग्रन्थस्य च नित्यनिषेधकत्वमित्यविरोधः। ततस्तस्मादूनद्विवार्षिकादितरो मृतः श्मशानपर्यन्तं ज्ञातिभिः सपिण्डैः सकुल्यैश्च यमसूक्तं 'परेयिवांस'-मित्यादिकम्, 'अहरहर्नयमान' इत्यादिकं च यमगाथां 'साकेसुवर्णा'मित्यस्यामृचि गीतां जपद्भिरनुगन्तव्यस्तथा शास्त्रोक्तविधिना दग्धव्यः। स चेदुपेत आहिताग्निस्तदाहितस्याग्नेः सम्बन्धिन्या आवृता पात्रप्रक्षेपणादिरूपया अर्थवत्पात्रप्रतिपत्तिरूपप्रयोजनवद्यथा भवति तथा दग्धव्यः। केचित्तु कृतोपनयनस्य दाहे भूसंस्कारादिरूपेतिकर्तव्यतामेतद्वचनबलादाहुः। जपद्भिरिति भविष्यतोऽभिधानं वर्तमानसामीप्ये लट्प्रत्ययानुशासनात्। तदाह वैजवापः—'प्रेतमरण्यं गत्वा यथोक्तमग्निं गमयित्वा अनवेक्ष्यमाणा अभ्यायान्त्येकवाससो वीतिभूताः कनिष्ठपर्याया यमगाथां गायन्तो यमसूक्तं च जपन्तोऽहरहर्नयमाना गामश्वं पुरुषं पशुं चैव स्वतो न तृप्यन्ति सुराया इव दुर्मति'रिति। ज्ञातिभिरिति बहुवचनं बहूनां काष्ठाहरणादिना प्रयोजकत्वमभिप्रेत्य। तेन शूद्रस्य काष्ठाद्याहर्तृत्वं व्यवच्छिद्यते।

यस्यानयति शूद्रोऽग्निं तृणं काष्ठं हवींषि च।
प्रेतत्वं हि सदा तस्य स चाऽधर्मेण लिप्यते॥

इति यमस्मरणात्॥ १–२॥

(मिता०) गृहस्थाश्रमिणां नित्यनैमित्तिका धर्मा उक्ताः। अभिषेकादिगुणयुक्तस्य गृहस्थविशेषस्य गुणधर्माश्च प्रदर्शिताः। अधुना तदधिकारसङ्कोचहेतुभूताशौचप्रतिपादनमुखेन तेषामपवादः प्रतिपाद्यते। आशौचशब्देन च कालस्नानाद्यपनोद्यः पिण्डोदकदानादिविधेरध्ययनादिपर्युदासस्य च निमित्तभूतः पुरु·

पगतः कश्चनातिशयः कथ्यते, न पुनः कर्मानधिकारमात्रम् । 'अशुद्धा बान्धवाः सर्वे' इत्यादावशुद्धत्वाभिधानात् । (१)अशुद्धशब्दस्य च वृद्धव्यवहारेऽनाहिताग्निदीक्षितादावनधिकारिमात्रे प्रयोगाभावात्, वृद्धव्यवहारव्युत्पत्तिनिबन्धनत्वाच्च शब्दार्थावगतेः । किञ्च यद्या-शौचिनां दानादिनिषेधदर्शनात्तदयोग्यत्वमाशौचशब्दाभिधेयं कल्प्यते तर्हि उदकदानादिविधिदर्शनात् तद्योग्यत्वमप्याशौचशब्दाभिधेयं स्यात् । तत्रानेकार्थकल्पनादोषप्रसङ्ग इत्युपेक्षणीयोऽयं पक्षः ।

तत्राशौचिभिः सपिण्डाद्यैर्यत्कर्तव्यं तत्तावदाह—

ऊनेत्यादि । ऊने अपरिपूर्णे द्वे वर्षे यस्यासावूनद्विवर्षस्तं प्रेतं निखनेत् भूमाववटं कृत्वा निदध्यान्न पुनर्दहेदित्यर्थः । न च सकृत्प्र-सिञ्चन्त्युदकमित्यादिभिः प्रेतोद्देशेन विहितमुदकदानाद्यौर्ध्वदेहिकं कुर्यात् । अयं च गन्धमाल्यानुलेपनादिभिरलङ्कृत्य शुचौ भूमौ श्म-शानादन्यत्रास्थिनिचयरहितायां बहिर्ग्रामान्निखननीयः । यथाह मनुः (५।६८)—'ऊनद्विवार्षिकं प्रेतं निदध्युर्बान्धवा बहिः । अलङ्कृत्य शुचौ भूमावस्थिसञ्चयनादृते ॥ नास्य कार्योऽग्निसंस्कारो ना(२)पि कार्योदकक्रिया । अरण्ये काष्ठवत्त्यक्त्वा क्षिपेयुस्त्र्यहमेव तु' ॥ इति । अरण्ये काष्ठवत्त्यक्त्वेत्यस्यायमर्थः । यथारण्ये काष्ठं त्यक्त्वो-दासीनास्तद्विषये भवन्ति तथोनद्विवार्षिकमपि खातायां भूमौ परित्यज्य तद्विषये श्राद्धाद्यौर्ध्वदेहिकेषु उदासीनैर्भवितव्यमित्याचा-रादिप्राप्तश्राद्धाद्यभावोऽनेन दृष्टान्तेन सूच्यते । स(३) च घृतेना-भ्यज्य यमगाथाः प(४)ठद्भिर्निधातव्यः । 'ऊनद्विवार्षिकं प्रेतं घृताक्तं निखनेद्(५)भुवि । यमगाथा गायमानो यमसूक्तमनुस्मरन्' ॥ इति यम-स्मरणात् । ततस्तस्मादूनद्विवार्षिकादितरः पूर्णद्विवर्षो यो मृतोऽसौ श्मशानपर्यन्तं ज्ञातिभिः सपिण्डैः समानोदकैश्च ज्येष्ठपुरःसरैरनु-व्रज्योऽनुगन्तव्यः । अस्मादेव वचनादूनद्विवर्षस्यानुगमनमनियतमि-ति गम्यते । अनुगम्य च 'परेयिवांसम्' इत्यादि यमसूक्तं यमदेव-त्या गाथाश्च जपद्भिर्लौकिकेनासंस्कृतेनाग्निना दग्धव्यो यदि जाता-रणिर्नास्ति । तत्सद्भावे तु तन्मथितेन दग्धव्यो न लौकिकेन । त-स्याग्निसम्पाद्यकार्यमात्रार्थत्वेनोत्पत्तेः । लौकिकाग्निश्च चण्डाला-

(१) अत्राशुद्धशब्दस्य च व्यवहारेणाहिताग्नि ख० । (२) नास्य क० ।
(३) शवश्च क० । (४) गाथाद्भिः क० । (५) निखनेद्बहिः-इति पाठान्तरम् ।

ग्न्यादिव्यतिरिक्तो ग्राह्यः। 'चण्डालाग्निरमेध्याग्निः सूतिकाग्निश्च कर्हिचित्। पतिताग्निश्चिताग्निश्च न शिष्टग्रहणोचिताः' ॥ इति देवलस्मरणात्। लौगाक्षिणा चात्र विशेष उक्तः—'तूष्णीमेवोदकं कुर्यात्तूष्णीं संस्कारमेव च। सर्वेषां कृतचूडानामन्यत्रापीच्छया द्वयम्' ॥ इति। अयमर्थः—'चौलकर्मानन्तरकाले नियमेनाग्न्यु(१)दकदानं कार्यम्। अन्यत्रापि नामकरणादूर्ध्वं अकृतचूडेऽपीच्छया प्रेताभ्युदयकामनया द्वयं अग्न्युदकदानात्मकं तूष्णीं कार्यं, न नियमेनेति विकल्पः। मनुनाप्यत्र विशेषो दर्शितः (५।७०) 'नात्रिवर्षस्य कर्तव्या बान्धवैरुदकक्रिया। जातदन्तस्य वा कुर्यान्नाम्नि वापि कृते सति' ॥ इति। उदकग्रहणं साहचर्यादग्निसंस्कारस्याप्युपलक्षणार्थम्। 'नात्रिवर्षस्य' इति वचनात्। कुलधर्मापेक्षया चूडोत्कर्षेऽपि वर्षत्रयादूर्ध्वमग्न्युदकदानादिनियमोऽवगम्यते। लौगाक्षिवचनाद्वर्षत्रयात्प्रागपि कृतचूडस्य तयोर्नियम इति विवेचनीयम्। उपेतश्चेद्यद्युपनीतस्तर्हि आहिता(२)ग्न्यावृता आहिताग्नेर्दाहप्रक्रियया स्वगृह्यादिप्रसिद्धया लौकिकाग्निनैव दग्धव्यः। अर्थवत्प्रयोजनवत्। अयमर्थः—यस्य क्लृप्तं दाहे द्वारं कार्यरूपं प्रयोजनं सम्भवति भूमिजोपणप्रोक्षणादि तदुपादेयम्। यत्पुनर्लुप्तप्रयोजनं पात्रयोजनादि तन्निवर्तते। तथा लौकिकाग्निविधानेनोपनीतस्य अनाहिताग्नेर्गृह्या(३)ग्निना दाहविधानेन च अपहृतप्रयोजनत्वादाहवनीयादेरपि निवृत्तिरिति। अग्न्यन्तरविधानं च वृद्धयाज्ञवल्क्येनोक्तम्—'आहिताग्निर्यथान्यायं दग्धव्यस्त्रिभिरग्निभिः। अनाहिताग्निरेकेन लौकिकेनापरो जनः' ॥ इति। न च शूद्रेण श्मशानं प्रति अग्निकाष्ठादिनयनं कार्यम्। 'यस्याऽऽनयति शूद्रोऽग्निं तृणं काष्ठं हवींषि च। प्रेतत्वं हि सदा तस्य स चाधर्मेण लिप्यते' ॥ इति यमस्मरणात्। तथा दाहश्च स्नपनानन्तरं कार्यः। 'प्रेतं दहेच्छुभैर्गन्धैः स्नापितं स्रग्विभूषितम्' इति स्मरणात्। प्रचेतसाप्युक्तम्—'स्नानं प्रेतस्य(४)पुत्राद्यैर्वस्त्राद्यैः पूजनं तथा। नग्नदेहं दहेन्नैव किञ्चिद्देयं परित्यजेत्' ॥ इति। किञ्चिद्देयमिति शववस्त्रैकदेशं श्मशानवास्यर्थं देयं परित्यजेदित्यर्थः। तथा प्रेतनिर्हर-

---

(१) उदकदानात्मकं क।
(२) आहिताग्नेर्दानप्रक्रियया ङ।
(३) आहिताग्नेः स्वगृह्याग्निना ङ।
(४) कार्यमिति शेषः।

णेऽपि मनुना विशेषो दर्शितः (५।१०४) 'न विप्रं स्वेषु तिष्ठत्सु मृतं शूद्रेण हारयेत् । अस्वर्ग्या ह्याहुतिः सा स्याच्छूद्रसंपर्कदूषिता'॥ अत्र च स्वेषु तिष्ठत्सु इत्यविवक्षितम् । अस्वर्ग्यत्वादिदोषश्रवणात् । 'दक्षिणेन मृतं शूद्रं पुर(१)द्वारेण निर्हरेत् । पश्चिमोत्तरपूर्वैस्तु यथासंख्यं द्विजातयः' ॥ तथा हारीतोपि—'न ग्रामाभिमुखं प्रेतं हरेयुः' इति । यदा तु प्रोषितमरणे शरीरं न लभ्यते तदास्थिभिः प्रतिकृतिं कृत्वा तेषामप्यलाभे पर्णशरैः शौनकादिगृह्योक्तमार्गेण प्रतिकृतिं कृत्वा संस्कारः कार्यः । आशौचं चात्र दशाहादिकमेव । 'आहिताग्निश्चेत्प्रवसन्म्रियेत पुनःसंस्कारं कृत्वा शववदाशौचम्' इति वसिष्ठस्मरणात् । अनाहिताग्निस्तु त्रिरात्रम् । 'सुपिष्टैर्जलसंमिश्रैर्दग्धव्यश्च तथाग्निना । असौ स्वर्गाय लोकाय स्वाहेत्युक्त्वा स बान्धवैः ॥ एवं पर्णशरं दग्ध्वा त्रिरात्रमशुचिर्भवेत्' ॥ इति वचनात् । ततश्चायमर्थः—नामकरणादर्वाङ् निखननमेव, न चोदकदानादि । तत ऊर्ध्वं यावत्त्रिवर्षवैकल्पिकमग्न्युदकदानम् । ततः परं यावदुपनयनं तूष्णीमेवाग्न्युदकदानं नियतम् । वर्षत्रयात्प्रागपि कृतचूडस्य । उपनयनादूर्ध्वं पुनराहिताग्न्यावृता दाहं कृत्वा सर्वमौर्ध्वदैहिकं कार्यम् । अयं तु विशेषः । उपनीतस्य लौकिकाग्निना दाहः कार्यः । अनाहिताग्नेर्गृह्याग्निना दाहो यथासम्भवं पात्रयोजनं च कार्यम् ॥ १-२ ॥

(वी०मि०) दाहानन्तरं कृत्यमाह—

सप्तमाद्दशमाद्वापि ज्ञातयोऽभ्युपयन्त्यपः ॥
अपनःशोशुचदघमनेन पितृदिङ्मुखाः ॥ ३ ॥
एवं मातामहाचार्यप्रेतानामुदकक्रिया ॥
कामोदकं सखिप्रत्तास्वस्रीयश्वशुरर्त्विजाम् ॥ ४ ॥
सकृत्प्रसिञ्चन्त्युदकं नामगोत्रेण वाग्यताः ॥

सप्तमादिति ल्यब्लोपे पञ्चमी, तेन सप्तमं व्याप्य ज्ञातयः सपिण्डाः सप्तमादूर्ध्वं दशमं पुरुषं व्याप्य ज्ञातयः सकुल्याश्च दक्षिणदिगभिमुखा 'अपनः शोशुचदघ'मिति मन्त्रेणाऽनामिकया जलमालोड्याऽपोऽभ्युपयन्ति निमज्य जलाञ्जलिं प्रसिञ्चन्ति । अपिकारेण समानग्रामवासिनां व्यवहितसम्बन्धानां ग्रहणम् । तदाह

(१) परद्वारेण—इति पाठान्तरम् ।

पारस्करः—'संयुक्तं मिथुनं याचेरन्नुदकं करिष्याम इति, कुरुध्वं मा चैवं पुनरित्यशतवर्षप्रेते कुरुध्वमेवेतरस्मिन् सर्वज्ञातयोऽभ्युपयन्त्यासप्तमात्पुरुषाद्द्वादशमाद्वादशमन्यग्रामवासे यावत्सम्बन्धमनुस्मरेयुर्वा एकवस्त्राः प्राचीनावीतिनः सव्यानामिकयाऽप आलोड्याऽपनः शोशुचदघमिति पुरुषाः पठित्वा दक्षिणामुखा निमज्जन्ति प्रेतायोदकं प्रसिञ्चन्त्यञ्जलिनाऽसावेतत्ते' इति। एवं सपिण्डानामेव। मातामहानामाचार्याणां च प्रेतानां प्रत्ता(१)नामुदकक्रियाञ्जलिदानरूपा नित्यवत्कार्या। सख्यादीनां प्रेतानां कामेनेच्छया उदकमुदकक्रिया। चकारेण स्नानसमुच्चयः। प्रेताः परिणीता दुहितृभगिन्यादयः। शेषं प्रसिद्धम्। उक्त एवोदकदाने गुणं विधत्ते सकृदिति ज्ञातयो वाग्यतास्त्यागवाक्यातिरिक्तवाक्योच्चारणशून्याः सन्तः प्रेतस्य नामगोत्रेणोद्दिष्टेनोदकमञ्जलिमितं सकृदेव सपिण्डादयः प्रसिञ्चन्ति उत्सृजन्ति ॥ ३-४ ॥

(मिता०) संस्कारानन्तरं किं कर्तव्यमित्यत आह—

सप्तमादिति। सप्तमाद्दिवसादर्वाग्दशमदिवसाद्वा ज्ञातयः समानगात्राः सपिण्डाः समानोदकाश्च 'अपनः शोशुचदघम्' इत्यनेन मन्त्रेण दक्षिणामुखाः अप अभ्युपयन्ति। अभ्युपगमनेन तत्प्रयोजनभूतोदकदानविशिष्टमभ्युपगमनं लक्ष्यते। 'एवं मातामहाचार्ये'त्यनन्तरमुदकदानस्यातिदेशदर्शनात्। एतच्चायुग्मासु तिथिषु कार्यम्। 'प्रथमतृतीयपञ्चमसप्तमनवमेषूदकक्रिया' इति गौतमस्मरणात्। एतच्च स्नानानन्तरं कार्यम्। 'शरीरमग्नौ संयोज्यानवेक्षमाणा अपोऽभ्युपयन्ति' इति शातातपस्मरणात्। तथा प्रचेतसाप्यत्र विशेषो दर्शितः—'प्रेतस्य बान्धवा यथावृद्धमुदकमवतीर्य नोद्धर्षयेयुरुदकान्ते प्रसिञ्चेयुरपसव्ययज्ञोपवीतवाससो दक्षिणाभिमुखा ब्राह्मणस्योदङ्मुखाः (२)प्रत्यङ्मुखाश्च राजन्यवैश्ययोः' इति। स्मृत्यन्तरे तु यावन्त्याशौचदिनानि तावदुदकदानस्यावृत्तिरुक्ता। यथाह विष्णुः—'यावदाशौचं तावत्प्रेतस्योदकं पिण्डं च दद्युः' इति। तथा च प्रचेतसाप्युक्तम्—'दिने दिनेऽञ्जलीन्पूर्णान्प्रदद्यात्प्रेतकारणात्। तावद्वृद्धिश्च कर्तव्या यावत्पिण्डः समाप्यते'॥ इति। प्रतिदिनमञ्जलीनां वृद्धिः कार्या यावद्दशमः पिण्डः समाप्यत इत्यर्थः। यद्यप्यनयोर्गु-

(१) प्रेतानां—इति ख० पु० पाठः। (२) प्राङ्मुखाश्च खः।

रुलघुकल्पयोरन्यतरानुष्ठानेनापि शास्त्रार्थः सिद्धस्तथापि बहुक्लेशावहत्वेन गुरुतरकल्पे प्रवृत्त्यनुपपत्तेः प्रेतस्योपकारातिशयो भविष्यतीति कल्पनीयम्। अन्यथा गुरुतरकल्पा(१)म्नायस्यानर्थक्यप्रसङ्गात्। वसिष्ठेनापि विशेषोऽभिहितः—'सव्योत्तराभ्यां पाणिभ्यामुदकक्रियां कुर्वीरन्' इति ॥ ३ ॥

(मिता०) वक्ष्यमाणसकृत्प्रसेकस्य नामगोत्रादिभिर्गुणैर्विशिष्टस्योदकदानस्या(२)समानगोत्रेषु मातामहादिष्वतिदेशमाह—

एवमिति। यथा सगोत्रसपिण्डानां प्रेतानामुदकं दीयते तथा मातामहानामाचार्याणां प्रेतानां नित्यमुदकक्रिया कार्या। सखा मित्रं, प्रत्ताः परिणीता दुहितृभगिन्यादयः, स्वस्रीयो भागिनेयः, श्वशुरः प्रसिद्धः, ऋत्विजो याजकाः एषां सख्यादीनां प्रेतानां कामोदकं कार्यम्। काम इच्छा, कामेनोदकदानं कामोदकं प्रेताभ्युदयकामनायां सत्यामुदकं देयमसत्यां न देयमिति अकरणे प्रत्यवायो नास्तीत्यर्थः ॥ ४ ॥

(मिता०) उदकदाने गुणविधिमाह—

सकृदिति। तच्चोदकदानमित्थं कर्तव्यम्। सपिण्डाः समानोदकाश्च मौनिनो भूत्वा प्रेतस्य नामगोत्रे उच्चार्य अमुकनामा प्रेतोऽमुकगोत्रस्तृप्यात्विति सकृदेवोदकं प्रसिञ्चेयुः त्रिर्वा। 'त्रिः प्र(३)सेकं कुर्युः प्रेतस्तृप्यत्विति' इति प्रचेतःस्मरणात्। प्रतिदिनमञ्जलिवृद्धिस्तु प्रतिपादितैव। तथा अयमपि विशेषस्तेनैवोक्तः—'नदीकूलं ततो गत्वा शौचं कृत्वा यथार्थवत्। वस्त्रं संशोधयेदादौ ततः स्नानं समाचरेत् ॥ सचैलस्तु ततः स्नात्वा शुचिः प्रयतमानसः। पाषाणं तत आदाय विप्रे दद्याद्दशाञ्जलीन् ॥ द्वादश क्षत्रिये दद्याद्वैश्ये पञ्चदश स्मृताः। त्रिंशच्छूद्राय दातव्यास्ततः संप्रविशेद् गृहम् ॥ ततः स्नानं पुनः कार्यं गृहशौचं च कारयेत्'। इति ॥

(वी०मि०) अथ सपिण्डादीनामपि केषाञ्चिदुदकदाननिषेधमाह—

न ब्रह्मचारिणः कुर्युरुदकं पतितास्तथा ॥ ५ ॥
पाखण्ड्यनाश्रिताः स्तेना भर्तृघ्न्यः कामगादिकाः ॥
सुराप्य आत्मत्यागिन्यो नाशौचोदकभाजनाः ॥ ६ ॥

(१) कल्पनीयस्या क। (२) स्य समानं ङ। (३) प्रत्येकं कुर्युः ख।

ज्ञातित्वे सत्यपि न ब्रह्मचारिणो न च पतिताः प्रेतोदकदानं कुर्युः । एतस्यापवाद आचार्यपित्रादिस्थल इत्यग्रे वक्ष्यति । अत्र विशेषमाह मनुः—

आदिष्टी नोदकं कुर्यादाव्रतस्य समापनात् ।
समाप्ते तूदकं कृत्वा त्रिरात्रेणैव शुद्ध्यति ॥

आदिष्टी ब्रह्मचारी, व्रतं ब्रह्मचर्यम्, उदकं ब्रह्मचर्यकालमृतानाम्।
वृद्धमनुः—

क्लीवाद्या नोदकं कुर्युस्तेना व्रात्या विकर्मणः ।
गर्भभर्तृद्रुहश्चैव सुराप्यश्चैव योषितः ॥

एवमुदकदाने कर्तृविशेषप्रतिषेधमुक्त्वा सम्प्रदायविशेषेण प्रतिषेधमाह पाखण्डीति । पाखण्डिनो वेदप्रामाण्यानभ्युपगन्तारः, अनाश्रिताः अधिकारे सत्यप्याश्रमविशेषाश्रयणहीनाः । पाखण्डमाश्रिता इति पाठे रक्तपटमौण्ड्यव्रतमाश्रिता इत्यर्थः । स्तेना ब्राह्मणसुवर्णहारिणः पुरुषाः पतिता इति यावत् । भर्तृघ्न्यः पतिघातिन्यः, कामगाः स्वैरिण्यः, आदिपदात्स्वगर्भघातिन्यः । विशेषोक्तातिरिक्त पातकवशाश्च । सुराप्यो गौडीपैष्टीमाध्वीनामन्यतमस्य पानकर्त्र्यः । आत्मत्यागिन्यो विषाग्न्यादिना बुद्धिपूर्वकं शरीरत्यागिनश्च योषितो नाशौचनिमित्तभूता न चोदकदानसम्प्रदानतार्हा इत्यर्थः ।
अत्र मनुः—

वृथा सङ्करजातानां प्रव्रज्यासु च तिष्ठताम् ।
आत्मनस्त्यागिनां चैव निवर्तेतोदकक्रिया ॥

उदकानर्हाणां च दाहादिकमपि न कार्यम् ।

नाशौचं नोदकं नाश्रु न दाहाद्यन्त्यकर्म च ।।
ब्रह्मदण्डहतानां च न कुर्यात्कटधारणम् ॥

इति यमस्मरणात् । ब्रह्मदण्डहताः ब्राह्मणहताः । अङ्गिराः—

अथ कश्चित्प्रमादेन म्रियेताऽग्न्युदकादिभिः ।
तस्याशौचं विधातव्यं कार्या चास्योदकक्रिया ॥

वृद्धाऽगस्त्यः—

वृद्धः शौचस्मृतेर्लुप्तः प्रत्याख्यातभिषक्क्रियः ।
आत्मानं घातयेद्यस्तु भृग्वग्न्यनशनाम्बुभिः ॥

तस्य त्रिरात्रमाशौचं द्वितीये त्वस्थिसञ्चयः ।
तृतीये तूदकं कृत्वा चतुर्थे श्राद्धमाचरेत् ॥-॥६॥

(मिता०) सपिण्डानां केषाञ्चिदुदकदानप्रतिषेधमाह—

नेति । ज्ञातित्वे सत्यपि ब्रह्मचारिणः समावर्तनपर्यन्तं पतिताश्च प्रच्युतद्विजातिकर्माधिकारा उदकादिदानं न कुर्युः । ब्रह्मचर्योत्तरकालं पूर्वमृतानां सपिण्डादीनामुदकदानमाशौचं च कुर्यादेव । यथाह मनुः (५।८८)—'आदिष्टी नोदकं कुर्यादाव्रतस्य समापनात् । समाप्ते तूदकं कृत्वा त्रिरात्रमशुचिर्भवेत्' ॥ इति । आदिष्टी 'कस्य ब्रह्मचार्यस्यपोशान कर्म कुरु दिवा मा स्वाप्सीः' इत्यादिव्रतादेशयोगाद्ब्रह्मचार्युच्यते । एतच्च पित्रादिव्यतिरेकेणेति वक्ष्यति । आचार्यपित्रुपाध्यायानिति । अत्राचार्यः पुनरेवं मन्यते-आदिष्टीति प्रक्रान्तप्रायश्चित्तः कथ्यते, तस्यैवायमुदकदानादिनिषेधः प्रायश्चित्तरूपव्रतस्य समाप्त्युत्तरकालमुदकदानाशौचविधिरिति। तथा क्लीबादीनां चोदकदायित्वं निषिद्धम् । 'क्लीबाद्या नोदकं कुर्युः स्तेना व्रात्या विधर्मिणः । गर्भभर्तृद्रुहश्चैव सुराप्यश्चैव योषितः' ॥ इति वृद्धमनुस्मरणात् ॥ ५ ॥

(मिता०) एवमुदकाने कर्तृविशेषप्रतिषेधमुक्त्वा सम्प्रदानविशेषेण प्रतिषेधमाह—

पाखण्डीति । नरशिरःकपालादि श्रुतिबाह्यलिङ्गधारणं पाखण्डं तद्विद्यते येषां ते पाखण्डिनः। अनाश्रिताः अधिकारे सत्यप्यकृताश्रमविशेषपरिग्रहाः। स्तेनाः सुवर्णाद्युत्तमद्रव्यहारिणः। भर्तृघ्न्यः पतिघातिन्यः । कामगाः कुलटाः । आदिग्रहणात्स्वगर्भब्राह्मणघातिन्यो गृह्यन्ते । सुराप्यो यासां या सुरा प्रतिषिद्धा तत्पानरताः । आत्मत्यागिन्यः विषाग्न्युदकोद्बन्धनाद्यैरात्मानं यास्त्यजन्ति । एते पाखण्ड्यादयः 'त्रिरात्रं दशरात्रं वा' इति वक्ष्यमाणस्याशौचस्योदकदानाद्यौर्ध्वदेहिकस्य च भाजना न भवन्ति । भाजयन्तीति भाजनाः सपिण्डादीनामाशौचादिनिमित्तभूता न भवन्ति । अतस्तन्मरणे सपिण्डैरुदकदानादि न कार्यमित्येतत्प्रतिपादनपरं वचनम् । अत्र च सुराप्य इत्यादिषु लिङ्गमविवक्षितम् । 'लि(१)ङ्गं च वचनं देशः कालोऽयं कर्मणः फलम् । मीमांसाकुशलाः प्राहुरनुपादेयपञ्चकम्' ॥

(१) इदं पद्यं क० ग० पुस्तकयोर्नास्ति ।

इत्यनुपादेयगतत्वात् । एतच्च बुद्धिपूर्वविषयम् । यथाह गौतमः- 'प्रायोऽनाशकशस्त्राग्निविषोदकोद्बन्धनप्रपतनैश्चेच्छताम्' इति । प्रायो महाप्रस्थानम् । अनाशकमनशनम् । गिरिशिखरादवपातः प्रपतनम् । अत्र चेच्छतामिति विशेषणोपादानात्प्रमादकृते दोषो नास्तीत्यवगन्तव्यम् । 'अथ कश्चित्प्रमादेन म्रियेताग्न्युदकादिभिः । तस्याशौचं विधातव्यं कर्तव्या चोदकक्रिया' ॥ इति अङ्गिरःस्मरणात् । तथा मृत्युविशेषादपि आशौचादिनिषेधः । 'चाण्डालादुदकात्सर्पाद्ब्राह्मणाद्वैद्युतादपि । दंष्ट्रिभ्यश्च पशुभ्यश्च मरणं पापकर्मिणाम् ॥ उदकं पिण्डदानं च प्रेतेभ्यो यत्प्रदीयते । नोपतिष्ठति तत्सर्वमन्तरिक्षे विनश्यति' ॥ इति । एतदपीच्छापूर्वमात्महननविषयम् । गौतमवचनेनेच्छापूर्वकमेवोदकेन हतस्याशौचादिनिषेधस्योक्तत्वात् । अत्रापि 'चाण्डालादुदकात्सर्पादि'ति तत्साहचर्यदर्शनाद्बुद्धिपूर्वविषयत्वनिश्चयः । अतो दर्पादिना चण्डालादीन्हन्तुं गतो यस्तैर्मारितस्तस्यायं 'सर्वत एवात्मानं गोपायेदि'ति विध्यतिक्रमनिमित्तः पिण्डदानादिनिषेधः । एवं दुष्टदंष्ट्र्यादिग्रहणार्थमाभिमुख्येन दर्पाद्गच्छतो मरणेऽप्ययं निषेध इत्यनुसन्धेयम् । अयं चाशौचप्रतिषेधो दशाहादिकालावच्छिन्नस्य । 'हतानां नृपगोविप्रैरन्वक्षं चात्मघातिनाम्' इति सद्यःशौचस्य वक्ष्यमाणत्वात् । तथा दाहादिकमप्येषां न कार्यम् । 'नाशौचं नोदकं नाश्रु न दाहाद्यन्त्यकर्म च । ब्रह्मदण्डहतानां च न कुर्यात्कटधारणम्' ॥ इति यमस्मरणात् । ब्रह्मदण्डहता ब्राह्मणहताः । प्रेतवहनसाधनं खट्वादि कटशब्देनोच्यते । न चाहिताग्निमग्निभिर्दहन्ति यज्ञपात्रैश्चेत्येतत् श्रुतिविहिताग्नियज्ञपात्रादिप्रतिपत्तिलोपप्रसङ्गात् अयं स्मार्तो दाहादिनिषेधो विप्रादिहताऽऽहिताग्निविषयं नास्कन्दतीत्याशङ्कनीयम् । यतश्चण्डालादिहताहिताग्निसम्बन्धिनामग्नियज्ञपात्राणां स्मृत्यन्तरे प्रतिपत्त्यन्तरं विधीयते । 'वैतानं प्रक्षिपेदप्सु आवसथ्यं चतुष्पथे । पात्राणि तु दहेदग्नौ यजमाने वृथा मृते' ॥ इति । तथा तच्छरीरस्यापि प्रतिपत्त्यन्तरमुक्तम् । 'आत्मनस्त्यागिनां नास्ति पतितानां तथा क्रिया । तेषामपि तथा गङ्गातोये संस्थापनं हितम्' ॥ इति स्मरणात् । तस्मादविशेषेण सर्वेषां दहनादिनिषेधः । अतः स्नेहादिना निषेधातिक्रमे प्रायश्चित्तं कर्तव्यम् । 'कृत्वाग्निमुदकं स्नानं स्पर्शनं वहनं कथाम् ।

रज्जुच्छेदाश्रुपातं च तप्तकृच्छ्रेण शुध्यति' ॥ इति स्मरणात् । एतच्च प्रत्येकं बुद्धि(१)पूर्वकं वेदितव्यम् । अबुद्धिपूर्वकरणे तु 'एषामन्यतमं प्रेतं यो वहेत दहेत वा । कटोदकक्रियां कृत्वा कृच्छ्रं सान्तपनं चरेत्' ॥ इति संवर्तोक्तं द्रष्टव्यम । यः पुनः 'तच्छवं केवलं स्पृष्टमश्रु वा पातितं यदि । पूर्वोक्तानामकारी चेदेकरात्रमभोजनम्' ॥ इति स्पर्शाश्रुपातयोरुपवास उक्तः । असौ कृच्छ्रेष्वशक्तस्य । तथा 'बन्धनच्छेदने दहने वा मासं भैक्षाहारस्त्रिषवणं च' इति सुमन्तुना भैक्षाशित्वमुक्तं तदप्यशक्तस्यैव । एवमन्यान्यपि तद्विषयाणि स्मृतिवाक्यानि व्यवस्थापनीयानि । अयं च दाहादिप्रतिषेधो नित्यकर्मानुष्ठानासमर्थजीर्णवानप्रस्थादिव्यतिरिक्तविषयः तेषामभ्यनुज्ञादर्शनात् । 'वृद्धः शौचस्मृतेर्लुप्तः प्रत्याख्यातभिषक्क्रियः । आत्मानं घातयेद्यस्तु भृग्वग्न्यनशनाम्बुभिः ॥ तस्य त्रिरात्रमाशौचं द्वितीये त्वस्थिसञ्चयः । तृतीये तूदकं कृत्वा चतुर्थे श्राद्धमाचरेत्' ॥ इति स्मरणात् ।

एवं येन येनोपाधिना आत्महननं शास्त्रतोऽभ्यनुज्ञायते तत्तद्व्यतिरिक्तमार्गेणात्महनने श्राद्धाद्यौर्ध्वदेहिकेषु निषिद्धेषु किं पुनस्तेषां कार्यमित्यपेक्षायां वृद्धयाज्ञवल्क्यछागलेयाभ्यामुक्तम्–'नारायणबलिः कार्यो लोकगर्हाभयान्नरैः । तथा तेषां भवेच्छौचं नान्यथेत्यब्रवीद्यमः ॥ तस्मात्तेभ्योऽपि दातव्यमन्नमेव सदक्षिणम्' ॥ इति । व्यासेनाप्युक्तम्–'नारायणं समुद्दिश्य शिवं वा यत्प्रदीयते । तस्य शुद्धिकरं कर्म तद्भवेन्नैतदन्यथा' ॥ इति । एवं नारायणबलिः प्रेतस्य शुद्ध्यापादानद्वारेण श्राद्धादिसंप्रदानत्वे योग्यतां जनयतीति और्ध्वदेहिकमपि सर्वं कार्यमेव । अत एव षट्त्रिंशन्मतेऽपि और्ध्वदेहिकस्याभ्यनुज्ञा दृश्यते । 'गोब्राह्मणहतानां च पतितानां तथैव च । ऊर्ध्वं संवत्सरात्कुर्यात्सर्वमेवौर्ध्वदेहिकम्' ॥ इति । एवं संवत्सरादूर्ध्वमेव नारायणबलिं कृत्वौर्ध्वदेहिकं कार्यम् ।

नारायणबलिश्चेत्थं कार्यः । कस्याञ्चिच्छुक्लैकादश्यां विष्णुं वैवस्वतं यमं च यथावदभ्यर्च्य तत्समीपे मधुघृतप्लुतांस्तिलमिश्रान्दश पिण्डान् विष्णुरूपिणं प्रेतमनुस्मरन् प्रेतनामगोत्रे उच्चार्य दक्षिणाग्रेषु दर्भेषु दक्षिणाभिमुखो दत्त्वा गन्धादिभिरभ्यर्च्य पिण्डप्रवाहणान्तं कृत्वा नद्यां क्षिपेत् न पत्न्यादिभ्यो दद्यात् । ततस्तस्यामेव रात्र्यामयुग्मा

(१) पूर्वं वेदितव्यम् ख ।

न्ब्राह्मणानामन्त्र्योपोषितः श्वोभूते मध्याह्ने विष्ण्वाराधनं कृत्वा एकोद्दिष्टविधिना ब्राह्मणपादप्रक्षालनादितृप्तिप्रश्नान्तं कृत्वा पिण्डपितृयज्ञावृतोल्लेखनाद्यवनेजनान्तं तूष्णीं कृत्वा विष्णवे ब्रह्मणे शिवाय यमाय च परिवारसहिताय चतुरः पिण्डान्दत्त्वा नामगोत्रसहितं प्रेतं संस्मृत्य विष्णोर्नाम सकीर्त्य पञ्चमं पिण्डं दद्यात्। ततो विप्रानाचान्तान्दक्षिणाभिस्तोषयित्वा तन्मध्ये चैकं गुणवत्तमं प्रेतबुद्ध्या संस्मरन् गोभूहिरण्यादिभिरतिशयेन सन्तोष्य ततः पवित्रपाणिभिर्विप्रैः प्रेताय तिलादिसहितमुदकं दापयित्वा स्वजनैः सार्धं भुञ्जीत।

सर्पहते त्वयं विशेषः—संवत्सरं यावत्पुराणोक्तविधिना पञ्चम्यां नागपूजां विधाय पूर्णे संवत्सरे नारायणबलिं कृत्वा सौवर्णं नागं दद्यात् गां च प्रत्यक्षाम्। ततः सर्वमौर्ध्वदेहिकं कुर्यात्।

नारायणबलिस्वरूपं च वैष्णवेऽभिहितम्। यथा–'एकादशीं समासाद्य शुक्लपक्षस्य वै तिथिम्। वि(१)ष्णुं समर्चयेद्देवं यमं वैवस्वतं तथा॥ दश पिण्डान्घृताभ्यक्तान्दर्भेषु मधुसंयुतान्। तिलमिश्रान्प्रदद्याद्वै संयतो दक्षिणामुखः॥ विष्णुं बुद्धौ समासाद्य नद्यम्भसि ततः क्षिपेत्। नामगोत्रग्रहं तत्र पुष्पैरभ्यर्चनं तथा॥ धूपदीपप्रदानं च भक्ष्यं भोज्यं तथा परम्। निमन्त्रयेत विप्रान्वै पञ्च सप्त नवापि वा॥ विद्यातपःसमृद्धान्वै कुलोत्पन्नान्समाहितान्। अपरेऽहनि संप्राप्ते मध्याह्ने समुपोषितः॥ विष्णोरभ्यर्चनं कृत्वा विप्रांस्तानुपवेशयेत्। उदङ्मुखान्यथाज्येष्ठं पितृरूपमनुस्मरन्॥ मनो निवेश्य विष्णौ वै सर्वं कुर्यादतन्द्रितः। आवाहनादि यत्प्रोक्तं देवपूर्वं तदाचरेत्॥ तृप्तान् ज्ञात्वा ततो विप्रांस्तृप्तिं पृष्ट्वा यथाविधि। हविष्यव्यञ्जनेनैव तिलादिसहितेन च॥ पञ्च पिण्डान् प्रदद्याच्च देव(२)रूपमनुस्मरन्। प्रथमं विष्णवे दद्याद्ब्रह्मणे च शिवाय च॥ यमाय सा(३)नुचराय चतुर्थं पिण्डमुत्सृजेत्। मृतं संकीर्त्य मनसा गोत्रपूर्वमतः परम्॥ विष्णोर्नाम गृहीत्वैव पञ्चमं पूर्ववत्क्षिपेत्। वि(४)प्रानाचम्य विधिवद्दक्षिणाभिः समर्चयेत्॥ एकं वृद्धतमं विप्रं हिरण्येन समर्चयेत्। गवा वस्त्रेण भूम्या च प्रेतं तं मनसा स्मरन्॥ ततस्तिलाम्भो विप्रास्तु हस्तैर्दर्भसमन्वितैः। क्षिपेयुर्गोत्रपूर्वं तु नाम बुद्धौ निवेश्य च॥

(१) अर्चयेद्देवदेवेशं क। (२) देवं रूपं ख।
(३) सानुचाराय क ङ। (४) विप्रेणाचम्य क।

हविर्गन्धतिलाम्भस्तु तस्मै दद्युः समाहिताः । मित्रभृत्यजनैः सार्धं पश्चाद् भुञ्जीत वाग्यतः ॥ एवं विष्णुमते स्थित्वा यो दद्यादात्मघातिने । समुद्धरति तं क्षिप्रं नात्र कार्या विचारणा' ॥ सर्पदंशनिमित्तं सौवर्णनागदानं प्रतिकृतिरूपेण भविष्यत्पुराणे सुमन्तुनाऽभिहितम्–'सुवर्णभारनिष्पन्नं नागं कृत्वा तथैव गाम्। व्यासाय दत्त्वा विधिवत्पितुरानृण्यमाप्नुयात्' ॥ इति ॥ ६ ॥

(वी०मि०) उदकदानानन्तरं कृत्यमाह—

कृतोदकान् समुत्तीर्णान् मृदुशाद्वलसंस्थितान् ॥
स्नातानपवदेयुस्तानितिहासैः पुरातनैः ॥ ७ ॥
मानुष्ये कदलीस्तम्भ(१)निःसारे सारमार्गणम् ॥
यः करोति स संमूढो जलबुद्बुदसन्निभे ॥ ८ ॥
पञ्चधा सम्भृतः कायो यदि पञ्चत्वमागतः ॥
कर्मभिः स्वशरीरोत्थैस्तत्र का परिदेवना ॥ ९ ॥
गन्त्री वसुमती नाशमुदधिर्दैवतानि च ।
फेनप्रख्यः कथं नाशं मर्त्यलोको न यास्यति ॥ १० ॥
श्लेष्माश्रु बान्धवैर्मुक्तं प्रेतो भुङ्क्ते यतोऽवशः ॥
अतो न रोदितव्यं हि क्रियाः कार्याः प्रय(२)त्नतः ॥ ११ ॥
इति संश्रुत्य गच्छेयुर्गृहं बालपुरःसराः ॥
विदश्य निम्बपत्राणि नियता द्वारि वेश्मनः ॥ १२ ॥
आचम्याग्न्यादि सलिलं गोमयं गौरसर्षपान् ॥
प्रविशेयुः समालभ्य कृत्वाऽश्मनि पदं शनैः ॥ १३ ॥

कृतमुदकदानं यैस्तान् स्नातान् जलाशयात् समुत्तीर्णान् मृदुशाद्वले नूतनोद्भूतहरिततृणावृते भूप्रदेशे सम्यक् स्थितान् पुत्रस्य प्रेतादीन् पुरातनैरितिहासैः 'मानुष्यः' इत्यादिश्लोकचतुष्टयरूपैस्तदर्थकैरन्यैर्वा कुलवृद्धा अपवदेयुः शोकापनोदनयुक्तान् कुर्युः । ते च पुत्रादय इतिश्लोकचतुष्टयरूपमितिहासं सम्यक् श्रुत्वा यथावा-

(१) कदलीस्तम्भे निःसारे—इति क० ख० पु० पाठः। (२) स्वशक्तितः—इति० मु० पु० पाठः।

लपुराःसराः सन्तो गृहं गच्छेयुः। तत्र वेश्मनो गृहस्य द्वारि नियताः संयतमनस्का निम्बपत्राणि विदश्य दन्तैः खण्डयित्वा आचम्याऽग्न्यादीन् समालभ्य स्पृष्ट्वाऽश्मनि प्रस्तरे पदं चरणं कृत्वा निधाय शनैः सत्वरं वेश्म प्रविशेयुरित्यर्थः। आदिपदेनाक्षतशस्यादिसङ्ग्रहः। तदाह वैजवापः–'अश्मा(१)नमालभन्ते अश्मा(२) पापं शमयत्विति, अश्मानमालभन्तेऽश्मेव स्थिरो भूयाः, शमग्निमग्निर्नः शर्म यच्छत्वि'ति। आश्वलायनः—'प्राप्य सदोश्मानरोमाग्निगोमयभक्षमप उपस्पृशन्ति'। इतिहासार्थस्तु—मानुष्ये मनुष्यसम्बन्धिनि जन्मकर्मप्रबन्धे कदलीकाण्डवत्सारहीने जलबुद्बुदवन्नश्वरे सारमार्गणं सारस्थिरबुद्धिं यः करोति स संमूढः जन्मान्तरीयस्वशरीरार्जितैः पुण्यपापैः स्वफलोपभोगार्थं पञ्चधा पृथिव्यादिपञ्चभूतात्मकतया सम्भृतो निर्मितः कायो यदि पृथिव्यादिकारणपञ्चकरूपतां प्राप्तस्तत्र भवतां का किमर्थं परिदेवनाऽनुशोचनम्। पृथ्वी समुद्रो देवताश्च नाशं यास्यन्ति यदि, तदा फेनवदस्थिरो मर्त्यलोकः प्राणिसमूहः कथं नाशं यास्यति न तु केवलं निष्प्रयोजनमेव परिदेवनं, किन्तु बान्धवैः शोकवशान्मुक्तं श्लेष्मयुक्ताऽश्रुपातमवशः प्रतीकाराक्षमः प्रेतो भुङ्क्तेऽतो न बान्धवै रोदितव्यम्। हि यतः प्रयत्नतः प्रेताऽनिष्टनिवारणपूर्वकं क्रिया श्राद्धादिरूपा क्रिया भवतीति॥७–१३॥

(मिता०) एवमुकदानं सापवादमभिधायानन्तरं किं कार्यमित्यत आह—

कृतोदकानिति। कृतमुदकदानं यैस्तान् कृतोदकान् स्नातान् सम्यगुदकादुत्तीर्णान्मृदुशाद्वले नवोद्गततृणचयावृतभूभागे सम्यक स्थितान् पुत्रादीन् कुलवृद्धाः पुरातनैरितिहासैर्वक्ष्यमाणैरपवदेयुः शोकनिरसनसमर्थैर्वचोभिर्बोधयेयुः॥ ७॥

(मिता०) शोकनिरसनसमर्थेतिहासस्वरूपमाह—

मानुष्य इति। मनुष्यशब्देन जरायुजाण्डजादिचतुर्विधभूतजातं लक्ष्यते तस्य भावो मानुष्यं तत्र संसरणधर्मित्वेन कदलीस्तम्भवदन्तःसाररहिते जलबुद्बुदवदचिरविनश्वरे संसारे सारस्य स्थिरस्य मार्गणमन्वेषणं यः करोति स संमूढः अत्यन्तविनष्टचित्तः, तस्मात्संसारस्वरूपवेदिभिर्भवद्भिरित्थं न कार्यम्॥ ८॥

(१)-(२) शमी—इति क० पु० पाठः।

(मिता०) किंच—

पञ्चधेति । जन्मान्तरात्मीयशरीरजनितैः कर्मबीजैः स्वफलोपभोगार्थं पञ्चधा पृथिव्यादिपञ्चभूतात्मकतया पञ्चप्रकारं संभृतो निर्मितः कायः स यदि फलोपभोगनिवृत्तौ पञ्चत्वमागतः पुनः पृथिव्यादिरूपतां प्राप्तस्तत्र भवतां किमर्था परिदेवना । निष्प्रयोजनत्वान्नानुशोचनं कर्तव्यं, वस्तुस्थितेस्तथात्वात् । न हि केनचिद्वस्तुस्थितिरतिक्रमितुं शक्यते ॥ ९ ॥

(मिता०) अपि च—

गन्त्रीति । नेदमाश्चर्यं मरणं नाम । यतः पृथिव्यादीनि महान्त्यपि भूतानि नाशं गच्छन्ति । तथा समुद्रा अपि । जरामरणविरहिणः अमरा अपि प्रलयसमये अवसानं गच्छन्ति कथमिवाऽस्थिरतया फेनसंनिभो मरणधर्मा भूतसङ्घो विनाशं न यास्यति । उचितमेव हि मरणधर्मिणः प्रायणम् । अतो निष्प्रयोजनः शोकसमावेशः ॥ १० ॥

(मिता०) अनिष्टापादकत्वादप्यनुशोचनं न कार्यमित्याह—

श्लेष्मेति । यस्मादनुशोचद्भिर्बान्धवैर्वदननयननिर्गमितं श्लेष्माश्रु वा यस्मादवशोऽकामोऽपि प्रेतो भुङ्क्ते तस्मान्न रोदितव्यं किन्तु प्रेतहितेप्सुभिः स्वशक्त्यनुसारेण श्राद्धादिक्रियाः कार्याः ॥ ११ ॥

(मिता०) इतीत्यादि । एवं कुलवृद्धवचांसि सम्यगाकर्ण्य त्यक्तशोकाः सन्तो बालानग्रतः कृत्वा गृहं गच्छेयुः । गत्वा च वेश्मनो द्वारि स्थित्वा नियताः संयतमनस्काः निम्बपत्राणि विदश्य दशनैः खण्डयित्वा खादित्वा आचमनं च कृत्वाग्न्युदकगोमयगौरसर्षपानालभ्य आदिग्रहणाद् 'दूर्वाप्रवालमग्निवृषभौ वे'ति शङ्खोक्तौ दूर्वाङ्कुरवृषभावपि स्पृष्ट्वा अश्मनि च पदं निधाय शनैरस्खलितं वेश्म प्रविशेयुः ॥ १२-१३ ॥

(वी०मि०) पुत्रादीनां कृत्यं विदश्येत्यादिनाऽभिहितमन्यत्राप्यतिदिशति—

प्रवेशनादिकं कर्म प्रेतसंस्पर्शिनामपि ॥

प्रेतं सम्यगुद्वहनादिप्रकारेण स्पृशतामपिकारेणाऽनुगच्छतां च गृहप्रवेशनाग्निस्पर्शनादिकं कर्म कर्तव्यम् ॥

(वी०मि०) ज्ञातितस्तेषां परं विशेष इत्याह—

इच्छतां तत्क्षणाच्छुद्धिः परेषां स्नानसंयमात् ॥ १४ ॥

अनाथब्राह्मणोद्वहनाद् यज्ञफलमिच्छतां परेषां ज्ञातिभिन्नाना स्नानपूर्वकात् संयमात् प्राणायामान्न तु क्षणादेव शुद्धिर्न तु त्रिरात्राद्याशौचमित्यर्थः । तदाह पराशरः—

अनाथं ब्राह्मणं प्रेतं ये वहन्ति द्विजातयः ।
पदे पदे यज्ञफलमनुपूर्वं लभन्ति ते ॥
न तेषामशुभं किञ्चित्पापं वा शुभकर्मणाम् ।
जलावगाहनात्तेषां सद्यः शौचं विधीयते ॥

स्नेहादिना निर्हरणे त्वाह मनुः—

असपिण्डं द्विजं प्रेतं विप्रो निर्हृत्य बन्धुवत् ।
विशुद्ध्यति त्रिरात्रेण मातुराप्तांश्च बान्धवान् ॥
यद्यन्नमत्ति तेषां तु दशाहेनैव शुद्ध्यति ।
अनदन्नन्नमह्नैव न चेत्तस्मिन् गृहे वसेत् ॥

त्रिरात्रं तद्गृहवासे सति, तदन्नभोजनात्तु दशाहमेवाऽऽशौचं ज्ञेयम् । शेषं सुबोधम् ॥ १४ ॥

(मिता०) अतिदेशादाह—

प्रवेशनादिकमिति । यदेतत्पूर्वोक्तं निम्बपत्रदशनादि वेश्मप्रवेशनान्तं कर्म तन्न केवलं ज्ञातीनामपि तु परेषामपि धर्मार्थं प्रेतालङ्कारनिर्हरणादिकं कुर्वतां भवति । प्रवेशनादिकमित्यत्र आदिशब्दोऽमाङ्गलिकत्वात्प्रतिलोमक्रमाभिप्रायः । तेषां च धर्मार्थं निर्हरणादौ प्रवृत्तानां तत्क्षणाच्छुद्धिमिच्छतामसपिण्डानां स्नानप्राणायामाभ्यामेव शुद्धिः । यथाह पराशरः—'अनाथं ब्राह्मणं प्रेतं ये वहन्ति द्विजातयः । पदेपदे यज्ञफलमनुपूर्वं लभन्ति ते । न तेषामशुभं किञ्चित्पापं वा शुभकर्मणाम् । जलावगाहनात्तेषां सद्यः शौचं विधीयते' ॥ इति । स्नेहादिना निर्हरणे तु मनूक्तो विशेषः (५।१०१।१०२)—'असपिण्डं द्विजं प्रेतं विप्रो निर्हृत्य बन्धुवत् । विशुध्यति त्रिरात्रेण मातुराप्तांश्च बान्धवान् ॥ यद्यन्नमत्ति तेषां तु दशाहेनैव शुध्यति । अनदन्नन्नमह्नैव न चेत्तस्मिन्गृहे वसेत्' ॥ इति । अत्रेयं व्यवस्था—यः स्नेहादिना शवनिर्हरणं कृत्वा तदीयमेवान्नमश्नाति तद्गृहे च वसति तस्य दशाहेनैव शुद्धिः । यस्तु केवलं तद्गृहे वसति न पुनस्तदन्नमश्नाति

तस्य त्रिरात्रम् । यः पुनर्निर्हरणमात्रं करोति न तद्गृहे वसति न च तदन्नमश्नाति तस्यैकाह इति । एतत्सजातीयविषयम् । विजातीयविषये पुनर्यज्जातीयं प्रेतं निर्हरति तज्जातिप्रयुक्तमाशौचं कार्यम् । यथाह गौतमः—'अवरश्चेत्पूर्ववर्णमुपस्पृशेत्पूर्वो वाऽवरं तत्र तच्छवोक्तमाशौचम्' इति । उपस्पर्शनं निर्हरणम् । विप्रस्य शूद्रनिर्हरणे मासमाशौचम् । शूद्रस्य तु विप्रनिर्हरणे दशरात्रमित्येवं शववदाशौचं कर्तव्यमित्यर्थः ॥ १४ ॥

(वि०मि०) 'न ब्रह्मचारिणः कुर्यु'रित्युक्तं सङ्कोचयन्नेव पित्रादिमरणे तत्कृत्यमाह—

आचार्यपित्रुपाध्यायान्निर्हृत्यापि व्रती व्रती ॥
सकटान्नं च नाश्नीयान्न च तैः सह संविशेत्(१) ॥ १५ ॥

आचार्यादीन् निर्हृत्य अपिकारेण दग्ध्वा च जलाञ्जलिपूरकपिण्डादिना संयोज्य व्रती ब्रह्मचारी व्रत्येव अभ्रष्टब्रह्मचर्य एव तिष्ठति । कटपदेनाशौचं लक्ष्यते, तत्सहचरितमन्नं सकटान्नं तद्ब्रह्मचारी नाश्नीयान्न वा तैराशौचिभिः सह संविशेत् स्वपेत् । संवसेदिति क्वचित्पाठः । तदाप्युपसर्गबलात्स एवार्थः । पितृपदेन मातापितरावेकशेषबलादुच्येते । तदाह वसिष्ठः—'ब्रह्मचारिणः शवकर्मिणो व्रतान्निवृत्तिरन्यत्र मातापित्रो'रिति । आद्यचकारेणाऽशौचस्य द्वितीयचकारेण श्राद्धस्य च ब्रह्मचर्यसमये निषेधस्य समुच्चयः ।

असमाप्तव्रतस्याऽपि कर्तव्यं ब्रह्मचारिणः ।
निरन्वये सपिण्डे तु मृते (२)सति दयान्वितः ॥
तदशौचं पुरा चीर्त्वा कुर्यात्तत् पितृवत् क्रियाम् ।
यतेः किञ्चिन्न कर्तव्यं न चान्येषां करोति सः ॥

इति ब्रह्मपुराणात् ॥ १५ ॥

(मिता०) ब्रह्मचारिणं प्रत्याह—

आचार्येति । आचार्य उक्तलक्षणः, माता च पिता च पितरौ, उपाध्यायश्च पूर्वोक्तः, एतान्निर्हृत्यापि व्रती ब्रह्मचारी व्रत्येव न पुनरस्य व्रतभ्रंशः । कटशब्देनाशौचं लक्ष्यते तत्सहचरितमन्नं सकटान्नं तद्ब्रह्मचारी नाश्नीयात् । न चाशौचिभिः सह संवसेत् । एवं वदता

(१) संवसेत्—इति मु० पु० पाठः । (२) मृतेष्वपि—इति ख० पु० पाठः ।

आचार्यादिव्यतिरिक्तप्रेतनिर्हरणे तु ब्रह्मचारिणो व्रतलोप इत्यर्थादुक्तं भवति । अत एव वसिष्ठेनोक्तम्—'ब्रह्मचारिणः शवकर्मिणो व्रतान्निवृत्तिरन्यत्र मातापित्रोः' इति ॥ १५ ॥

(वी०मि०) आशौचिनां कृत्यमाह—

क्रीतलब्धाशना भूमौ स्वपेयुस्ते पृथक् पृथक् ॥
पिण्डयज्ञावृता देयं प्रेतायान्नं दिनत्रयम् ॥ १६ ॥
जलमेकाहमाकाशे स्थाप्यं क्षीरं च मृन्मये ॥
वैतानोपासनाः कार्याः क्रियाश्च श्रुतिचोदनात् ॥ १७ ॥

ते आशौचिनः क्रीतमयाचितलब्धं वा न तु पूर्वसिद्धमशनं भोक्तव्यं येषां तादृशो भवेयुः । इदं चाशक्तपरं, शक्तस्य त्वहोपवासः । अत्र सम्भवे 'त्र्यहमनश्नन्त आसीरन् क्रीतोत्पन्नेन वा वर्तरन्नि'ति वसिष्ठवचनात् । अशक्तस्य त्वेक उपवासः । 'नैवास्य रात्रावन्नं पचेयु'रित्याश्वलायनवचनात् । पृथक् पृथक् स्त्रीपुरुषाः भूमौ खट्वादिव्यतिरेकेण स्वपेरन् । अत्र विशेषमाह गौतमः—'अधःशय्याशायिनो ब्रह्मचारिणः शवकर्मिणः' । मनुः—

अक्षारलवणान्नाः स्युर्निमज्जेयुश्च ते त्र्यहम् ।
मांसाशनं च नाश्नीयुः शयीरंश्च पृथक् पृथक् ॥

पिण्डयज्ञस्य पिण्डपितृयज्ञस्यावृता परिपाट्याऽवनेजनादिरूपयान्नं पूरकपिण्डरूपं प्रेताय दिनत्रयपर्यन्तं ज्ञातिभिर्देयम् । दिनत्रयमिति सकुल्यपरम् । सपिण्डास्तु दशा(१)हं दद्युः ।

प्रथमेऽहनि यो दद्यात्स दशाहं समापयेत् ।

इत्यादिवचनात् । जलमिति । जलं दुग्धं च मृन्मये पात्रद्वये पृथक् पृथक् आकाशे शिक्यादौ मरणाहोरात्रं व्याप्य पुत्रादिभिः प्रेतहितार्थं स्थाप्यम् । चकारेण तत्पूर्वकृत्यं दशाहं व्याप्याकाशे वटदानं समुच्चीयते ।

तस्मिन्निधेयमाकाशे दशरात्रं पयस्तथा ।
सर्वथा तापशान्त्यर्थमध्वश्रमविनाशनम् ॥

इति वचनात् । आशौचे सकलश्रौतस्मार्तक्रियानिवृत्तिप्रसक्तावाह वैतानेति । वितानोऽग्नीनां विस्तरस्तत्र भवा वैतानास्त्रेताग्नि-

(१) सपिण्डास्तूदकान्तं—इति ग० पु० पाठः ।

साध्या अग्निहोत्रदर्शपूर्णमासाद्या उपासना अवश्यकर्तव्याः क्रियाः श्रुतिचोदनात् वेदेन 'यावज्जीवमग्निहोत्रं जुहोती'त्यादिना विहितत्वात्। श्रु(१)त्युक्तत्वहेतुं वदता स्मार्तकर्मण्यधिकारो गम्यते।

स्मार्तकर्मपरित्यागो राहोरन्यत्र सूतके।
श्रौते कर्मणि तत्कालं स्नातः शुद्धिमवाप्नुयात्॥

इति मिताक्षरालिखितं व्याघ्रपादवचनमपि अत्र संवदति। चकारेणाऽस्थिसञ्चयनादिकमाशौचिकृत्यं समुच्चिनोति। तदाह विष्णुः—'चतुर्थे दिवसेऽस्थिसञ्चयनं तेषां च गङ्गाम्भसि प्रक्षेपः'। अस्थिसञ्चयनादीनां सप्रपञ्चनिरूपणं विस्तरतया तत्तद्ग्रन्थेषु विशिष्य दर्शनाच्चात्रोपेक्षितम्॥ १६-१७॥

(मिता०) आशौचिनां नियमविशेषमाह—

क्रीतेति। क्रीतमयाचितलब्धं वा अशनं येषां ते क्रीतलब्धाशनाः। भवेयुरिति शेषः। क्रीतलब्धाशननियमात्तदलाभेऽनशनमर्थात्सिद्धं भवति। अत एव वसिष्ठः—'गृहान्व्रजित्वा अधःप्रस्तरे त्र्यहमनश्नन्त आसीरन् क्रीताद्युपपन्नेन(२) वर्तेरन्' इति। अधःप्रस्तर आशौचिनां शयनासनार्थस्तृणमयः प्रस्तरः। ते च सपिण्डा भूमावेव पृथक्पृथक् शयीरन् न खट्वादौ। मनुनाप्यत्र विशेषो दर्शितः (५।७३) 'अक्षारलवणान्नाः स्युर्निमज्जेयुश्च ते त्र्यहम्। मांसाशनं च नाश्नीयुः शयीरंश्च पृथक् क्षितौ'॥ इति। तथा गौतमेनापि विशेष उक्तः—'अधःशय्याशायिनो ब्रह्मचारिणः(३) शवकर्मिणः' इति। तथा पिण्डपितृयज्ञप्रक्रियया प्राचीनावीतित्वादिरूपया प्रेताय दिनत्रयं पिण्डरूपमन्नं तूष्णीं क्षितौ देयम्। यथाह मरीचिः—'प्रेतपिण्डं बहिर्दद्याद्दर्भमन्त्रविवर्जितम्। प्रागुदीच्यां चरुं कृत्वा स्नातः प्रयतमानसः'॥ इति। दर्भमन्त्रविवर्जितत्वमनुपनीतविषयम्। 'असंस्कृतानां भूमौ (पिण्डं) दद्यात्संस्कृतानां कुशेषु' इति प्रचेतःस्मरणात्। तथा कर्तृनियमश्च गृह्यपरिशिष्टाद्विज्ञेयः—'असगोत्रः सगोत्रो वा यदि स्त्री यदि वा पुमान्। प्रथमेऽहनि यो दद्यात्स दशाहं समापयेत्'॥ इति। तथा द्रव्यविनिमयश्च शुनःपुच्छेन दर्शितः—'शालिना सक्तुभिर्वापि शाकैर्वाप्यथ निर्वपेत्। प्रथमे-

---

(१) स्मृत्युक्त०—इति ख० पु० पाठः।

(२) क्रीतोत्पन्नेन इति पाठान्तरम्। (३) रिणः सर्वे इति क०।

ऽहनि यद् द्रव्यं तदेव स्याद्दशाहिकम् ॥ तूष्णीं प्रसेकं पुष्पं च धूपं दीपं तथैव च' ॥ इति । पिण्डश्च पाषाणे देयः । 'भूमौ माल्यं पिण्डं पानीयमुपले वा दद्युः' इति शङ्खस्मरणात् । न च 'दद्यु'रिति बहुवचनेनोदकदानवत्सर्वैः पिण्डदानं कार्यमित्याशङ्कनीयं, किन्तु पुत्रेणैव कार्यम् । तदभावे प्रत्यासन्नेन सपिण्डानामन्यतमेन तदभावे मातृसपिण्डादिना कार्यम् । 'पुत्राभावे सपिण्डा मातृसपिण्डाः शिष्याश्च दद्युस्तभावे ऋत्विगाचार्यौ' इति गौतमस्मरणात् । पुत्रबहुत्वे पुनर्ज्येष्ठेनैव कार्यम् । 'सर्वैरनुमतिं कृत्वा ज्येष्ठेनैव तु यत्कृतम् । द्रव्येण चाविभक्तेन सर्वैरेव कृतं भवेत्' ॥ इति मरीचिस्मरणात् । पिण्डसंख्यानियमश्च ब्राह्मणस्य दश पिण्डाः क्षत्रियस्य द्वादशैवेति । एवमाशौचदिवससंख्यया विष्णुनाभिहितम्—'यावदाशौचं प्रेतस्योदकमेकं पिण्डं च दद्युः' इति । तथा स्मृत्यन्तरेऽपि—'नवभिर्दिवसैर्दद्यान्नव पिण्डान्समाहितः । दशमं पिण्डमुत्सृज्य रात्रिशेषे शुचिर्भवेत्' ॥ इति शुचित्ववचनमपरेद्युः क्रियमाणश्राद्धार्थब्राह्मणनिमन्त्रणाभिप्रायेण । योगीश्वरेण तु पिण्डत्रयदानमभिहितम् । अनयोश्च गुरुलघुकल्पयोरुदकदानविषयोक्ता विज्ञेया। अत्रापरः शातातपीयो विशेषः—'आशौचस्य तु ह्रासेऽपि पिण्डान्दद्याद्दशैव तु' । इति । त्रिरात्राशौचिनां पुनः पारस्करेण विशेषो दर्शितः—'प्रथमे दिवसे देयास्त्रयः पिण्डाः समाहितैः । द्वितीये चतुरो दद्यादस्थिसंचयनं तथा ॥ त्रींस्तु दद्यात्तृतीयेऽह्नि वस्त्रादि क्षालयेत्तथा' । इति ॥ १६ ॥

(मिता०) किञ्च—

जलमिति । जलं क्षीरं च मृन्मये पात्रद्वये पृथक् पृथगाकाशे शिक्यादावेकाहं स्थापनीयम् । अत्र विशेषानुपादानात्प्रथमेऽहनि कार्यम् , तथा पारस्करवचनात् । 'प्रेतात्र स्नाहीत्युदकं स्थाप्यं पिब चेदमिति क्षीरम्' । तथास्थिसंचयनं प्रथमादिदिनेषु कार्यम् । तथाह संवर्तः—'प्रथमेऽह्नि तृतीये वा सप्तमे नवमे तथा । अस्थिसञ्चयनं कार्यं तद्गोत्रजैः सह' ॥ इति । क्वचिद्द्वितीये त्वस्थिसंचय इत्युक्तम् । वैष्णवे तु चतुर्थे दिवसेऽस्थिसंचयनं कुर्यात् तेषां च गङ्गाम्भसि प्रक्षेप इति । अतोऽन्यतमस्मिन्दिने स्वगृह्योक्तविधिनास्थिसंचयनं कार्यम् । अङ्गिरसा चात्र विशेषो दर्शितः—'अस्थिसञ्चयने याग्

देवानां परिकीर्तितः । प्रेतीभूतं तमुद्दिश्य यः शुचिर्न करोति चेत् ॥ देवतानां तु यजनं तं शपन्त्यथ देवताः' । देवताश्चात्र श्मशानवासिन्यः(१), तत्र (२)पूर्वदग्धाः 'श्मशानवासिनो देवाः शवानां परिकीर्तिताः' इति तेनैवोक्तम् । अतस्तान्देवानचिरमृतं च प्रेतमुद्दिश्य धूपदीपादिभिः पिण्डरूपेण चान्नेन तत्र पूजा कार्येत्युक्तं भवति । तथा वपनं च दशमेऽहनि कार्यम्--'दशमेऽहनि सम्प्राप्ते स्नानं ग्रामाद्बहिर्भवेत् । तत्र त्याज्यानि वासांसि केशश्मश्रुनखानि च' ॥ इति देवलस्मरणात् । तथा स्मृत्यन्तरेऽपि--'द्वितीयेऽहनि कर्तव्यं क्षुरकर्म प्रयत्नतः । तृतीये पञ्चमे वापि सप्तमे वा प्रदानतः' ॥ इति श्राद्धप्रदानादर्वागनियम इति यावत् । वपनं च केषामित्याकाङ्क्षायामापस्तम्बेनोक्तम्--'अनुभाविनां च परिवापनम्' इति । अयमर्थः--शावं दुःखमनुभवन्तीत्यनुभाविनः सपिण्डास्तेषां चाविशेषेण वपनमुताल्पवयसामित्यपेक्षायामिदमेवोपतिष्ठते अनुभाविनां च परिवापनमिति । अनु पश्चाद्भवन्तीत्यनुभाविनोऽल्पवयसस्तेषां वपनमिति । अनुभाविनः पुत्रा इति केचिन्मन्यन्ते । 'गङ्गायां भास्करक्षेत्रे मातापित्रो(३)र्गुरोर्मृतौ । आधानकाले सोमे च वपनं सप्तसु स्मृतम्' ॥ इति नियमदर्शनात् ॥

(मिता०) अशुचित्वेन सकलश्रौतस्मार्तकर्माधिकारनिवृत्तौ प्रसक्तायां केषुचिदभ्यनुज्ञानार्थमाह--

वैतानेति । वितानोऽग्नीनां विस्तारस्तत्र भवा वैतानाः त्रेताग्निसाध्या अग्निहोत्रदर्शपूर्णमासाद्याः क्रिया उच्यन्ते । प्रतिदिनमुपास्यत इत्युपासनो गृह्याग्निस्तत्र भवा औपासनाः सायंप्रातर्होमक्रिया उच्यन्ते । ता वैतानौपसना वैदिक्यः क्रियाः कार्याः । कथं वैदिकत्वमिति चेत् श्रुतिचोदनात् । तथा हि--'यावज्जीवमग्निहोत्रं जुहुयात्' इत्यादिश्रुतिभिरग्निहोत्रादीनां चोदना स्पष्टैव । तथा 'अहरहः स्वाहा कुर्यादन्नाभावे केनचिदाकाष्ठात्' इति श्रुत्यौपासनहोमोऽपि चो(४)द्यते । अत्र च श्रौतत्वविशेषणोपादानात्स्मार्तक्रियाणां दानादीनामननुष्ठानं गम्यते । अत एव वैयाघ्रपादेनोक्तम्—'स्मार्तकर्मपरित्यागो राहोरन्यत्र सूतके । श्रौते कर्मणि तत्कालं स्नातः शुद्धिमवाप्नुयात्' ॥ इति । श्रौतानां च कार्यत्वाभि-

(१) वासिनः ख० । (२) भूतपूर्वदग्धाः ङ० । (३) गुरौ मृते क० । (४) वध्यते क० ।

धानं नित्यनैमित्तिकाभिप्रायेण। यथाह पैठीनसिः—'नित्यानि विनिवर्तेरन्वैतानवर्जं शालाग्नौ चैके' इति । नित्यानि विनिवर्तेरन्निन्त्यविशेषेण आवश्यकानां नित्यनैमित्तिकानां निवृत्तौ प्रसक्तायां वैतानवर्जमित्यग्नित्रयसाध्यावश्यकानां पर्युदासः । 'शालाग्नौ चैके' इति गृह्याग्नौ भवानामप्यावश्यकानां पाक्षिकः पर्युदास उक्तः । अतस्तेष्वाशौचं नास्त्येव। काम्यानां पुनः शौचाभावादननुष्ठानम् । मनुनाप्यनेनैवाभिप्रायेणोक्तम् (५।८४) 'प्रत्यूहेन्नाग्निषु क्रिया' इति। अग्निषु क्रिया न प्रत्यूहेदिति अनग्निसाध्यानां पञ्चमहायज्ञादीनां निवृत्तिः । अत एव संवर्तः—'होमं तत्र प्रकुर्वीत शुष्कान्नेन फलेन वा। पञ्चयज्ञविधानं तु न कुर्यान्मृत्युजन्मनोः' ॥ इति । वैश्वदेवस्याग्निसाध्यत्वेऽपि वचनान्निवृत्तिः। 'विप्रो दशाहमासीत वैश्वदेवविवर्जितः' इति तेनैवोक्तत्वात्। 'सूतके कर्मणां त्यागः सन्ध्यादीनां विधीयते' इति यद्यपि सन्ध्याया विनिवृत्तिः श्रूयते तथाप्यञ्जलिप्रक्षेपादिकं कुर्यात्। 'सूतके सावित्र्या चाञ्जलिं प्रक्षिप्य प्रदक्षिणं कृत्वा सूर्यं ध्यायन्नमस्कुर्यात्' इति पैठीनसिस्मरणात्। यद्यपि 'वैतानौपासनाः कार्याः' इति सामान्येनोक्तं तथाप्यन्येन कारयितव्यम् । 'अन्य एतानि कुर्युः' इति पैठीनसिस्मरणात् । बृहस्पतिनाप्युक्तम्—'सूतके मृतके चैव अशक्तौ श्राद्धभोजने। प्रवासादिनिमित्तेषु हावयेन्न तु हापयेत्' ॥ इति। तथा स्मार्तत्वेऽपि पिण्डपितृयज्ञश्रवणाकर्माश्वयुज्यादिकश्च नित्यहोमः कार्य एव। 'सूतके तु समुत्पन्ने स्मार्तं कर्म कथं भवेत्। पिण्डयज्ञं चरुहोममसगोत्रेण कारयेत्' ॥ इति जातूकर्ण्यस्मरणात्। यद्यपि साङ्गे कर्मण्यन्यकर्तृत्वं तथापि स्वद्रव्यत्यागात्मकं प्रधानं स्वयं कुर्यात् । तस्यानन्यनिष्पाद्यत्वात् । अत एवोक्तम्—'श्रौते कर्मणि तत्कालं स्नातः शुद्धिमवाप्नुयात्' इति । यत्पुनः 'दानं प्रतिग्रहो होमः स्वाध्यायश्च निवर्तते' इति होमप्रतिषेधः स काम्याभिप्रायो वैश्वदेवाभिप्रायो वा व्यवस्थापनीयः। तथा सूतकान्नभोजनमपि न कार्यम्।'उभयत्र दशाहानि कुलस्यान्नं न भुज्यते' इति यमस्मरणात्। उभयत्र जननमरणयोः। दशाहानित्याशौचकालोपलक्षणम् । कुलस्य सूतकयुक्तस्य सम्बन्ध्यन्नमसकुल्यैर्न भोक्तव्यम्। सकुल्यानां पुनर्न दोषः। 'सूतके तु कुलस्यान्नमदोषं मनुरब्रवीत्' इति तेनैवोक्तत्वात्। अयं च निषेधो दातृभोक्त्रोरन्यतरेण जनने मरणे वा ज्ञाते सति वे-

दितव्यः । 'उभाभ्यामपरिज्ञाते सूतकं नैव दोषकृत् । एकेनापि परि-ज्ञाते भोक्तुर्दोषमुपावहेत्' ॥ इति षट्त्रिंशन्मतदर्शनात् । तथा वि-वाहादिषु सूतकोत्पत्तेः प्राक् ब्राह्मणार्थं पृथक्कृतमन्नं भोक्तव्यमेव । 'विवाहोत्सवयज्ञेषु त्वन्तरा मृतसूतके । पूर्वसंकल्पितार्थेषु न दोषः परिकीर्तितः' ॥ इति बृहस्पतिस्मरणात् । तथाऽपरोपि विशेषः षट्त्रिंशन्मते दर्शितः—'विवाहोत्सवयज्ञेषु त्वन्तरा मृतसूतके । परैरन्नं प्रदातव्यं भोक्तव्यं च द्विजोत्तमैः ॥ भुञ्जानेषु तु विप्रेषु त्वन्तरा मृत-सूतके । अन्यगेहोदकाचान्ताः सर्वे ते शुचयः स्मृताः'॥ इति । तथाशौ-चपरिग्रहत्वेऽपि केषुचिद्द्रव्येषु दोषाभावः । यथाह मरीचिः—'लवणे मधुमांसे च पुष्पमूलफलेषु च । शाककाष्ठतृणेष्वप्सु दधिसर्पिः-पयस्सु च ॥ तिलौषधाजिने चैव पक्वापक्वे स्वयङ्ग्रहः । पण्येषु चै-व सर्वेषु नाशौचं मृतसूतके' ॥ इति । पक्वं भक्ष्यजातं मोदकादि । अपक्वं तण्डुलादि । स्वयंग्रह इति स्वयमेव स्वाम्यनुज्ञातो गृह्णीयादित्यर्थः । पक्वापक्वाभ्यनु(१)ज्ञानमन्नसत्रप्रवृत्तविषयम् । 'अन्न-सत्रप्रवृत्तानामाममन्नमगर्हितम् । भुक्त्वा पक्वान्नमेतेषां त्रिरात्रं तु पयः पिबेत्' ॥ इत्यङ्गिरःस्मरणात् । अत्र पक्वशब्दो भक्ष्यव्यतिरि-क्तौदनादिविषयः । शवसंसर्गनिमित्ताशौचे त्वङ्गिरसा विशेष उ-क्तः—'आशौचं यस्य संसर्गादापतेद् गृहमेधिनः । क्रियास्तस्य न लु-प्यन्ते गृह्याणां च न तद्भवेत्' ॥ इति । तदाशौचं केवलं गृहमेधिन एव न पुनस्तद्गृहे भवानां भार्यादीनां तद्द्रव्याणां च भवेदित्यर्थः । अतिक्रान्ताशौचेऽप्ययमेवार्थः स्मृत्यन्तरे दर्शितः—'अतिक्रान्ते द-शाहे तु पश्चाज्जानाति चेद् गृही । त्रिरात्रं सूतकं तस्य न तद्द्रव्यस्य कर्हिचित्' ॥ इति ॥ १७ ।

(वी०मि०) एवमाशौचिकृत्यानि कर्माण्यभिधायाशौचविशेषान् तदपगमनिमित्तानि चाह प्रकरणसमाप्तिपर्यन्तेन—

आदन्तजन(२)नात् सद्य आचूडान्नैशिकी स्मृता ॥
त्रिरात्रमाव्रतादेशाद्दशरात्रमतः परम् ॥ १८ ॥(३)

---

(१) अनुज्ञातमन्नं ख. । (२) आदन्तजन्मनः—इति मु० पु० पाठः ।

(३) अयं श्लोको मिताक्षराव्याख्याने त्रयोविंशतिसंख्याकामितत्वेनाग्रे पठितोऽपि वीरमित्रोदया-ख्यव्याख्यायां मुख्यत्वेनाऽङ्गीकृत्य प्रवर्तिते प्रस्तुतपुस्तकमुद्रणे तदनुरोधादत्रैव संस्थाप्य तद्व्याख्यानं

दन्तजननचूडाव्रतादेशैस्तत्काला लक्ष्यन्ते । तत्र दन्तजननकालो 'दन्तजननं सप्तमे मासी'त्युपनिषदि दर्शितः । तेन सप्तममासात्प्राग्बाले प्रेते सपिण्डानां सद्यः शौचं स्नानमात्रापनेयमाशौचम् । 'तृतीये वा प्रतिहित' इत्यौत्सर्गिकश्चूडाकालः । प्रथमाब्दस्तु कुलधर्मवशादापवादिक इति ।हारलता, तेन सप्तममारभ्य वर्षद्वयसमाप्तिमध्ये मृते नैशिकी अहोरात्रव्यापिका शुद्धिर्ब्राह्मणस्य स्मृता यमादिस्मृताबुक्ता । तदाह यमः—

ऊनद्विवार्षिके बाले प्रेतत्वमनुगच्छति ।
अदन्तजाते तनये शिशौ गर्भच्युते तथा ॥
निवृत्तचूडके बाले देशान्तरमथो गते ।
सपिण्डानां तु सर्वेषामहोरात्रमशौचकम् ॥

इति । अदन्तजाते दन्तजननयोग्यसमयेऽप्यजातदन्ते, गर्भच्युते जातमृते, निवृत्तचूडके अकृतचूडके । अङ्गिराः—

विप्रे न्यूने त्रिभिर्वर्षैर्मृते शुद्धिस्तु नैशिकी ।
द्व्यहेन क्षत्रिये शुद्धिस्त्रिभिर्वैश्ये मृते सति ॥
निवृत्तचूडके विप्रे त्रिरात्राच्छुद्धिरिष्यते ।
निवृत्ते क्षत्रिये षड्भिर्वैश्ये नवभिरेव च ॥
शूद्रे त्रिवर्षन्यूने तु मृते शुद्धिस्तु पञ्चभिः ।
अत ऊर्द्ध्वं मृते प्रेते द्वादशाहो विधीयते ॥
षड्वर्षं समतीतस्तु शूद्रः स म्रियते यदि ।
मासिकं तु भवेच्छौचमित्याङ्गिरसभाषितम् ॥

शङ्खः—

अनूढभार्यः शूद्रस्तु षोडशाद्वत्सरात्परम् ।
मृत्युं समधिगच्छेच्चेन्मासं तस्य सबान्धवाः ॥
शुद्धिं समधिगच्छन्ति नात्र कार्या विचारणा ।

व्रतादेशकालस्तु—

द्विजन्मनामयं कालस्त्रयाणां तु षडाब्दिकः ॥

इति परिभाषितो ब्रह्मपुराणे । तेन तृतीयवर्षमारभ्य षड्वर्षसमा-

मिताक्षराख्यमपि सङ्गत्यौचित्येन प्रसक्त इहैव संमुद्रयत इति न वैपरीत्यं सुधीभिराकलनीयम् । मित्रमिश्रैस्तु जानद्भिरप्येतत् किमित्यत्रैव पद्यमिदं व्याख्यातमिति तट्टीकावलोकनेन स्फुटं प्रतीयतेति तत्र मौनमेवाऽस्माकं वरमिति तदेव शरणीक्रियत इति सं० ।

र्त्ति यावद् बाले मृते ब्राह्मणस्य त्रिरात्रमाशौचमित्यर्थः । 'गर्भाष्टम' इत्यनुसारान्मासद्वयाधिकषड्वर्षपूर्तिपर्यन्तं व्रतादेशपूर्वकालः, तेन तावत्कालं त्रिरात्रमाशौचमिति तु शूलपाणिः । अतः परमुपनयनकालानन्तरं मृते ब्राह्मणस्य दशाहोरात्रव्यापकमाशौचम् । क्षत्रियवैश्यशूद्राणां तु नैशिकीस्थाने द्व्यहत्र्यहपञ्चाहान्याशौचानि । त्रिरात्रिस्थाने क्षत्रियवैश्ययोः षडहनवाहव्यापिके अशुद्धी । तृतीयवर्षमारभ्य तु द्वादशवर्षपर्यन्तमविवाहितस्य मरणे द्वादशरात्रं, विवाहितस्य तु षष्ठवर्षारम्भा(१)नन्तरं मरणे पूर्णाशौचमित्यङ्गिरोवचने स्पष्टम् । क्षत्रियादेर्दशाहस्थाने द्वादशाहादिकमग्रे स्वयमेव वक्ष्यति । इदं च सर्वं बालस्य पुंसो मरणे द्रष्टव्यम् । कन्यामरणे त्वग्रे वक्ष्यति । अयं च श्लोको मिताक्षरकृताऽग्रे पठितः शूलपाणिप्रभृतिभिस्त्वत्रैव पठित इति बहुग्रन्थसंवादादत्रैवाऽस्माभिरपि व्याख्यातः ॥ १८ ॥

(मिता०) वयोवस्थाविशेषादपि दशाहाद्याशौचस्यापवादमाह—

आदन्तेति । यावता कालेन दन्तानामुत्पत्तिस्तस्मिन्काले अतीतस्य बालस्य सम्बन्धिनां सद्यः शौचम् । चूडाकरणादर्वाङ् मृतस्य सम्बन्धिनां नैशिकी निशायां भवा अहोरात्रव्यापिन्यशुद्धिः । व्रतादेश उपनयनं ततोऽर्वाक् चूडायाश्चोर्ध्वमतीतस्य त्र्यहमशुद्धिः । अत्र चादन्तजन्मनः सद्य इति यद्यप्यविशेषेणाभिधानं तथाप्यग्निसंस्काराभावे द्रष्टव्यम् । 'अदन्तजाते बाले प्रेते सद्य एव शुद्धिर्नास्याग्निसंस्कारो नोदकक्रिया' इति वैष्णवे अग्निसंस्काररहितस्य सद्यः शौचविधानात् । सति त्वग्निसंस्कारे 'अहस्त्वदत्तकन्यासु बालेषु च' इति वक्ष्यमाण एकाहः । तथा च यमः—'अदन्तजाते तनये शिशौ गर्भच्युते तथा । सपिण्डानां तु सर्वेषामहोरात्रमशौचकम्' ॥ इति । नामकरणात्प्राक्सद्यः शौचमेव नियतम् । 'प्राङ् नामकरणात्सद्यः शुद्धिः' इति शङ्खस्मरणात् । चूडा(२)कर्म च प्रथमे तृतीये वा वर्षे स्मर्यते—'चूडाकर्म द्विजातीनां सर्वेषामेव धर्मतः । प्रथमेऽब्दे तृतीये वा कर्तव्यं श्रुतिचोदनात्' ॥ इति स्मरणात् । ततश्च दन्तजननादूर्ध्वं प्रथमवार्षिकचूडाकर्मपर्यन्तमेकाहः । तत्र त्वकृतचूडस्य दन्तजनने सत्यपि त्रिवर्षं यावदेकाह एव । तथा च विष्णुः—'दन्तजातेऽप्यकृतचूडेऽहोरात्रेण शुद्धिः' इति । तत ऊर्ध्वं प्रागुपनयात् त्र्यहः । यत्तु

(१) वर्षावस्थानन्तरं--इति ख० पु० पाठः । (२) कर्म द्वितीये,ख० ।

मनुवचनम् (५।६७)—'नृणामकृतचूडानामशुद्धिर्नैशिकी स्मृता । निर्वृत्तचूडकानां तु त्रिरात्राच्छुद्धिरिष्यते' ॥ इति । तस्याप्ययमेव विषयः । यत्तूनद्विवर्षमधिकृत्य तेनैवोक्तम् (५।६९)—'अरण्ये काष्ठवत्यक्त्वा क्षि(१)पेयुस्त्र्यहमेव तु' इति । यच्च वसिष्ठवचनम्—'ऊनद्विवर्षे प्रेते गर्भपतने वा सपिण्डानां त्रिरात्रम्' इति तत्संवत्सरचूडाभिप्रायेण । यत्तु अङ्गिरोवचनम्—'यद्यप्यकृतचूडो वै जातदन्तस्तु संस्थितः । तथापि दाहयित्वैनमाशौचं त्र्यहमाचरेत्' ॥ इति तद्वर्षत्रयादूर्ध्वं (२)कुलधर्मापेक्षया चूडोत्कर्षे वेदितव्यम् । 'विप्रे न्यूनत्रिवर्षे तु मृते शुद्धिस्तु नैशिकी' इति तेनैवाभिहितत्वात् । न चायमेकाहो दन्तजननाभाव इति शङ्कनीयम् । न हि न्यूनतृतीयवर्षस्य दन्तानुत्पत्तिः सम्भवति । तथा सत्यपि दन्तजनने अकृतचूडस्यैकाहं विदधता विष्णुवचनेन विरोधश्च दुष्परिहरः स्यात् । तस्मात्प्राचीनैव व्याख्या ज्यायसी । यत्तु कश्यपवचनम्—'बालानामदन्तजातानां त्रिरात्रेण शुद्धिः' इति तन्मातापितृविषयम् । निरस्य तु पुमाञ्छुक्रमुप(३)स्पृश्यं विशुध्यति । वैजिकादभिसम्बन्धादनुरुन्ध्यादघं त्र्यहम्' ॥ इति जन्यजनकसम्बन्धोपाधिकतया त्रिरात्रस्मरणात् । ततश्चायमर्थः—प्राङ् नामकरणात्सद्यः शौचं, तदूर्ध्वं दन्तजननादर्वागग्निसंस्कारक्रियायामेकाहः । इतरथा सद्यः शौचम् । जातदन्तस्य च प्रथमवार्षिकाच्चौलादर्वागेकाहः । प्रथमवर्षादूर्ध्वं त्रिवर्षपर्यन्तं कृतचूडस्य त्र्यहः । इतरस्य त्वेकाहः । वर्षत्रयादूर्ध्वमकृतचूडस्यापि त्र्यहः । उपनयनादूर्ध्वं सर्वेषां ब्राह्मणादीनां दशरात्रादिकमिति ॥ १८ ॥

त्रिरात्रं दशरात्रं वा शावमाशौचमिष्यते ॥
ऊनद्विवर्ष उभयोः सूतकं मातुरेव हि ॥ १९ ॥
पित्रोस्तु सूतकं मातुस्तदसृग्दर्शनाद् ध्रुवम् ॥
तदहर्न प्रदुष्येत पूर्वेषां जन्मकारणात् ॥ २० ॥

(वी० मि०) शावं मरणनिमित्तकमस्पृश्यत्वलक्षणमाशौचं सपिण्डविप्राणां त्रिरात्रं, शूद्रसपिण्डानां दशरात्रमिष्यते । वाकारोऽन-

(१) क्षिपेत्तत्र्यहमेव क० । (२) कुलवर्णधर्मापेक्षया घ० ।
(३) मुपस्पृश्य इति ग० मुपस्पर्शाद्धि—इति मु० पाठः ।

वस्थायां, तृतीयभागमात्रस्य विवक्षितत्वात् । तेन क्षत्रियाणां चतूरात्रं वैश्यानां पञ्चरात्रमस्पृश्यत्वं सूचितम् । तथा च देवलः—

स्वाशौचकालाद्विज्ञेयं स्पर्शनं तु त्रिभागतः ।
शूद्रविट्क्षत्रविप्राणां यथाशास्त्रं प्रचोदितम् ।

ऊनद्विवर्षे तु प्रेते उभयोर्मातापित्रोरेवाऽस्पृश्यत्वलक्षणमहोरात्रव्यापकं विप्रस्य, क्षत्रियादेस्तु त्र्यहादिकमाशौचं न तु सपिण्डानामपि । सूतकं प्रसवनिमित्तकमस्पृश्यत्वं स्नानमात्रानपनेयं मातुरेव, स्नानापनेयं तु पितुरपि ।

माता शुद्ध्येद्दशाहेन स्नानात्तु स्पर्शनं पितुः ।

इति संवर्तवचनात् । एतदेवाह पित्रोरिति । अस्पृश्यत्वं सामान्यतो मातापित्रोर्भवत्येव, मातुस्तु ध्रुवं चिरकालव्यापि तदस्पृश्यत्वमसृग्दर्शनात् । जननाशौचस्य क्वचित्कर्मण्यविरोधित्वमाह तदहरिति । पित्रादीनां पुत्ररूपेणोत्पत्तेः पुत्रजन्मदिनं तु दानादौ कर्तव्ये न प्रदुष्येतेत्यर्थः । हिशब्देनाऽवधारणार्थकेन मरणाशौचानयोग्यत्वं जनन्यस्पृश्यत्वस्य सूचितम् ॥ १९—२० ॥

(मिता०) एवमाशौचिनो विधिप्रतिषेधरूपान्धर्मानभिधायाधुना आशौचनिमित्तं कालनियमं चाह—

त्रिरात्रमिति । शवनिमित्तं शावम् । सूतकशब्देन च जननवाचिना तन्निमित्तमाशौचं लक्ष्यते । एवञ्च वदता जननमरणयोराशौचनिमित्तत्वमुक्तं भवति । तच्च जननमरणमुत्पन्नज्ञातमेव निमित्तम् । 'निर्दशं ज्ञातिमरणं श्रुत्वा पुत्रस्य जन्म च' इत्यादिलिङ्गदर्शनात् । तथा—'विगतं तु विदेशस्थं शृणुयाद्यो ह्यनिर्दशम् । यच्छेषं दशरात्रस्य तावदेवाशुचिर्भवेत्' ॥ इत्यादिवाक्यारम्भसामर्थ्याच्च । उत्पत्तिमात्रापेक्षत्वे ह्याशौचस्य दशाहाद्याशौचकालनियमास्तत्तत्प्रभृतिका एवेति अनिर्दशज्ञातिमरणश्रवणे दशरात्रशेषमेवाशौचमर्थात्सिध्यतीति 'यच्छेषं दशरात्रस्य' इत्यनारम्भणीयं स्यात् । तस्माज्ज्ञातमेव जननं मरणं च निमित्तम् ।' तच्चोभयनिमित्तमप्याशौचं त्रिरात्रं दशरात्रं वेष्यते मन्वादिभिः । अत्राशौचप्रकरणे अहर्ग्रहणं चाहोरात्रोपलक्षणार्थम् । मन्वादिभिरिष्यत इति वचनं तदुक्तसपिण्डसमानोदकरूपाविषयभेदप्रदर्शनार्थम् । तथा हि—'दशाहं शावमाशौचं सपिण्डेषु विधीयते । जननेऽप्येवमेव स्यान्निपुणां शुद्धिमिच्छताम् ॥ जन्म-

न्येकोदकानां तु त्रिरात्राच्छुद्धिरिष्यते । शवस्पृशो विशुध्यन्ति त्र्यहात्तूदकदायिनः' ॥ इत्येतैर्वाक्यैस्त्रिरात्रदशरात्रयोः समानोदकसपिण्डविषयत्वेन व्यवस्था कृता । अतः सपिण्डानां सप्तमपुरुषावधिकानामविशेषेण दशरात्रम् । समानोदकानां त्रिरात्रमिति । यत्पुनः स्मृत्यन्तरवचनम्—'चतुर्थे दशरात्रं स्यात्षण्निशाः पुंसि पञ्चमे । षष्ठे चतुरहाच्छुद्धिः सप्तमे त्वहरेव तु' ॥ इति तद्विगीतत्वान्नादरणीयम् । यद्यप्यविगीतं तथापि मधुपर्काङ्गपश्वालम्भनवल्लोकविद्विष्टत्वान्नानुष्ठेयम् । 'अस्व(१)र्ग्यं लोकविद्विष्टं धर्म्यमप्याचरेन्न तु' इति मनुस्मरणात् । न च सप्तमे प्रत्यासन्ने सापिण्ड एकाहो विप्रकृष्टाष्टमादिषु समानोदकेषु त्र्यहमिति युक्तम् । एवमविशेषेण सपिण्डानामाशौचे प्राप्ते क्वचिन्नियमार्थमाह । ऊनद्विवर्षे संस्थिते उभयोरेव मातापित्रोर्दशरात्रमाशौचं न सर्वेषां सपिण्डानाम् । तेषां तु वक्ष्यति 'आदन्तजननात्सद्यः' इति । तथा च पैङ्गयः—'गर्भस्थे प्रेते मातुर्दशाहं, जात उभयोः, कृते नाम्नि सोदराणां च' इति । अथवा अयमर्थः—ऊनद्विवर्षे संस्थिते उभयोर्मातापित्रोरेव अस्पृश्यत्वलक्षणमाशौचं न सपिण्डानाम् । तथा च स्मृत्यन्तरे—'ऊनद्विवर्षे प्रेते मातापित्रोरेव नेतरेषाम्' इति अस्पृश्यत्वलक्षणमभिप्रेतम् । इतरस्य पुनः कर्मण्यनधिकारलक्षणस्य सपिण्डेष्वपि 'आदन्तजन्मनः सद्यः' इत्यादिभिर्विहितत्वात् । अत्र दृष्टान्तः—सूतकं मातुरेव हीति । यथा सूतकं जननिमित्तमस्पृश्यत्वलक्षणमाशौचं मातुरेव केवलं तथोनद्विवर्षोपरमे मातापित्रोरेवास्पृश्यत्वमिति । ऊनद्विवर्षे सपिण्डानामस्पृश्यत्वं प्रतिषेधताऽन्यत्रास्पृश्यत्वमभ्यनुज्ञातं भवति । तथा च देवलः—'स्वाशौचकालाद्विज्ञेयं स्पर्शनं च त्रिभागतः । शूद्रविट्क्षत्रविप्राणां यथाशास्त्रं प्रचोदितम्' ॥ इति । एतच्चानुपनीतप्रायणनिमित्ते अतिक्रान्ताशौचे च त्रिरात्रादौ वेदितव्यम् । उपनीतविषयेऽपि तेनैवोक्तम्—'दशाहादित्रिभागेन कृते सञ्चयने क्रमात् । अङ्गस्पर्शनमिच्छन्ति वर्णानां तत्त्वदर्शिनः ॥ त्रिचतुःपञ्चदशभिः स्पृश्या वर्णाः क्रमेण तु । भोज्यान्नो दशभिर्विप्रः शेषा द्वित्रिषडुत्तरैः' ॥ इति । द्व्युत्तरैर्दशभिः त्र्युत्तरैर्द्वादशभिः षडुत्तरैः पञ्चदशभिरिति द्रष्टव्यम् ॥ १९ ॥

---

(१) इदं वचनं पूर्वमाचाराध्याये आलोचनीयम् ।

(मिता०) जननिमित्तमस्पृश्यत्वलक्षणमाशौचमाह—

पित्रोरिति । सूतकं जननिमित्तमस्पृश्यत्वलक्षणमाशौचं पित्रोर्मातापित्रोरेव न सर्वेषां सपिण्डानाम् । तच्चास्पृश्यत्वं मातुर्ध्रुवं दशाहपर्यन्तं स्थिरमित्यर्थः । कुतः तदसृग्दर्शनात् तस्याः सम्बन्धित्वेनासृजो दर्शनात् । अत एव वसिष्ठः—'नाशौचं विद्यते पुंसः संसर्गं चेन्न गच्छति । रजस्तत्राशुचि ज्ञेयं तच्च पुंसि न विद्यते' ॥ इति । पितुस्तु ध्रुवं न भवति स्नानमात्रेणास्पृश्यत्वं निवर्तते । यथाह संवर्तः—'जाते पुत्रे पितुः स्नानं सचैलं तु विधीयते । माता शुद्ध्येद्दशाहेन स्नानात्तु स्पर्शनं पितुः' ॥ इति । माता शुद्ध्येद्दशाहेनेत्येतच्च संव्यवहारयोग्यतामात्रम् । अदृष्टार्थेषु पुनः कर्मसु पैठीनसिना विशेष उक्तः—'सूतिकां पुत्रवतीं विंशतिरात्रेण कर्माणि कारयेत् । मासेन स्त्रीजननीम्' इति । अङ्गिरसा च सपिण्डानामस्पृश्यत्वाभावः स्पष्टीकृतः । 'सूतके सूतिकावर्ज्यं संस्पर्शो न निषिध्यते । संस्पर्शे सूतिकायास्तु स्नानमेव विधीयते' ॥ इति । यस्मिन्दिवसे कुमारजननं तदहर्न प्रदुष्येत तन्निमित्तदानाद्यधिकारापहारकृन्न भवतीत्यर्थः । यस्मात्तस्मिन्नहनि पूर्वेषां पित्रादीनां पुत्ररूपेण जन्म उत्पत्तिस्तस्मात्तदहर्न प्रदुष्येत । तथा च वृद्धयाज्ञवल्क्येनोक्तम्—'कुमारजन्मदिवसे विप्रैः कार्यः प्रतिग्रहः । हिरण्यभूगवाश्वाजवासःशय्यासनादिषु ॥ तत्र सर्वं प्रतिग्राह्यं कृतान्नं न तु भक्षयेत् । भक्षयित्वा तु तन्मोहाद् द्विजश्चान्द्रायणं चरेत्' ॥ इति । व्यासेनाप्यत्र विशेष उक्तः—'सूतिकावासनिलया जन्मदा नाम देवताः । तासां यागनिमित्तं तु शुद्धिर्जन्मनि कीर्तिता ॥ प्रथमे दिवसे षष्ठे दशमे चैव सर्वदा । त्रिष्वेतेषु न कुर्वीत सूतकं पुत्रजन्मनि' ॥ मार्कण्डेयेनाप्युक्तम्—'रक्षणीया तथा षष्ठी निशा तत्र विशेषतः । रात्रौ जागरणं कार्यं जन्मदानां तथा बलिः ॥ पुरुषाः शस्त्रहस्ताश्च नृत्यगीतैश्च योषितः । रात्रौ जागरणं कुर्युर्दशम्यां चैव सूतके' ॥ इति ॥ २० ॥

(वी० मि०) एकस्मिन्नशौचे सत्यशौचनिमित्तान्तरपाते प्रतिनिमित्तमशौचावृत्तिं प्रसक्तामपवदति—

अन्तरा जन्ममरणे शेषाहोभिर्विशुद्ध्यति ॥

अन्तरा एकस्य पूर्णाशौचस्य जननिमित्तकस्य शावस्य च आद्यभागद्वयमध्ये सपिण्डस्य जन्मनि मरणे चाऽऽद्याशौचस्य शेषै-

स्वशिष्टैरहोभिर्विशुद्ध्यति न तूत्तराशौचयोग्यदशरात्रादिभिः। तदुक्तं ब्रह्मपुराणे—

आद्यं भागद्वयं यावत्सूनकस्य तु सूतके ।
द्वितीये पतिते चाऽऽद्यात्सूतकाच्छुद्धिरिष्यते ॥
अत ऊर्ध्वं द्वितीयात्तु सूतकान्ताच्छुचिः स्मृता ।
एवमेव विचार्यं स्यान्मृतके मृतकान्तरे ॥

अत्र चतुर्धा विभक्तस्य पूर्णाशौचस्य भागद्वयमध्ये तादृशाशौचान्तरपाते आद्याशौचव्यप(१)गमेन तदूर्ध्वमुपान्त्यादिनपर्यन्तं तादृशाशौचान्तरपाते द्वितीयाशौचव्यपगमेन शुद्धिरित्यर्थः । अशौचान्त्यदिने तु विष्णुः—'रात्रिशेषे दिनद्वयेन प्रभाते दिनत्रयेण'। अत्र प्रकरणे रात्रिदिनशब्दा अहोरात्रपराः, तेन अहोरात्रावशिष्टेऽशौचेऽशौचान्तरपातेऽन्त्यदिनातिरिक्तं दिनद्वयेन शुद्धिः । आशौचान्त्यदिवसस्य शेषे प्राचीप्रकाशकाले सूर्योदयात्प्राक् तादृशाशौचान्तरपाते सूर्योदयानन्तरत्रिरात्रेण शुद्धिरित्यर्थः । वर्धितत्र्यहत्र्यहाशौचयोः सम्पूर्णाशौचपाते तूत्तरेणैव शुद्धिरुत्तरस्य गुरुत्वादिति वदन्ति । इदं तु सम्पूर्णाशौचपरम् । असम्पूर्णाशौचानां समव्यापकानां समानजातीयानां सन्निपाते तु चरमाशौचव्यपगमेनैव शुद्धिः ।

परतः परतः शुद्धिरघवृद्धौ विधीयते ।

इति देवलवचनात् । विषयव्याप्यव्यापकयोर्विजातीययोश्चाशौचयोः सन्निपाते कूर्मपुराणम्—

आद्यानां यौगपद्ये तु ज्ञेया शुद्धिर्गरीयसी ।
मरणोत्पत्तियोगे तु गरीयो मरणं भवेत् ॥

आद्यानामशौचानां गरीयसात्राधिककालव्यापकेन मरणमल्पदिनव्यापकमपि पूर्वजातमुत्तरजातं वा मरणाशौचं प्रसवनिमित्तकं सूतिकाया दशाहास्पृश्यत्वलक्षणमशौचं न मरणाशौचबाध्यं, रजःसम्बन्धनिमित्तकत्वेन प्रयोजकत्वात् । 'अतः सूतके चेदो(२)त्थाना' दिति (३)पारस्करसम्बन्धाच्चेति दिक् ॥

(१) समेन—इति ख० पु० पाठः ।
(२) वेदोन्माना—इति ख०, वेदोत्थाना—इति क० पु० पाठः ।
(३) पाठे स्वरस०—इति ख० पु० पाठः ।

(मिता०) आशौचमध्ये पुनर्जनने मरणे वा जाते 'प्रतिनिमित्तं नैमित्तिकमावर्तते' इति न्यायेन पुनर्दशाहाद्याशौचप्राप्तौ तदपवादमाह—

अन्तरेति । वर्णापेक्षया वयोवस्थापेक्षया वा यस्य यावानाशौचकालस्तदन्तरा तत्समस्य ततो न्यूनस्यस्य वाशौचस्य निमितभूते जनने मरणे वा जाते पूर्वाशौचावशिष्टैरेवाहोभिर्विशुद्ध्यति । न पुनः पश्चादुत्पन्नजननादिनिमित्तं पृथक्पृथगाशौचं कार्यम् । यदा पुनरल्पाद्वर्तमानाशौचाद्दीर्घकालमाशौचमन्तरा पतति तदा न पूर्वशेषेण शुद्धिः । यथाहोशनाः—'स्वल्पाशौचस्य मध्ये तु दीर्घाशौचं भवेद्यदि । न पूर्वेण विशुद्धिः स्यात्स्वकालेनैव शुद्ध्यति' ॥ इति । यमोऽप्याह—'अघ(१)वृद्धिमदाशौचं पश्चिमेन समापयेत्' इति । अत्र चान्तरा जन्ममरणे इति यद्यप्यविशेषेणाभिहितं तथापि न सूतकान्तर्वर्तिनः शावस्य पूर्वाशौचशेषेण शुद्धिः । यथाहाङ्गिराः—'सूतके मृतकं चेत्स्यान्मृतके त्वथ सूतकम् । तत्राधिकृत्य मृतकं शौचं कुर्यान्न सूतकम्' ॥ इति । तथा षट्त्रिंशन्मतेऽपि—'शावाशौचे समुत्पन्ने सूतकं तु यदा भवेत् । शावेन शुद्ध्यते सूतिर्न सूतिः शावशोधिनी' ॥ इति । तस्मान्न सूतकान्तःपातिनः शा(२)वाशौचस्य पूर्वशेषेण शुद्धिः किन्तु शावान्तःपातिन एव सूतकस्य । तथा सजातीयान्तःपातित्वेऽपि शावस्य क्वचित्पूर्वशेषेण शुद्धेरपवादः स्मृत्यन्तरे दर्शितः—'मातर्यग्रे प्रमीतायामशुद्धौ म्रियते पिता । पितुः शेषेण शुद्धिः स्यान्मातुः कुर्यात्तु पक्षिणीम्' ॥ इति । अयमर्थः— मातरि पूर्वं मृतायां तन्निमित्ताशौचमध्ये यदि पितुरुपरमः स्यात्तदा न पूर्वशेषेण शुद्धिः किन्तु पितुः प्रयाणनिमित्ताशौचकालेनैव शुद्धिः कार्या । तथा पितुः प्रयाणनिमित्ताशौचमध्ये मातरि स्वर्यातायामपि न पूर्वशेषमात्राच्छुद्धिः किन्तु पूर्वाशौचं समाप्योपरि पक्षिणीं क्षिपेत्—इति । तथाऽऽशौचसन्निपातकालविशेषकृतोऽप्यपवादो गौतमेनोक्तः—'रात्रिशेषे सति द्वाभ्यां प्रभाते सति तिसृभिः' इति । अयमर्थः—रात्रिमात्रावशिष्टे पूर्वाशौचे यद्याशौचान्तरं सन्निपतेत्तर्हि पूर्वाशौचं समाप्यानन्तरं द्वाभ्यां रात्रिभ्यां शुद्धिः । प्रभाते पुनस्तस्या रात्रेः पश्चिमे यामे जननाद्याशौचान्तरसन्नि-

(१) अहोवृद्धिमत् ख० । (२) शावस्य ख० ।

पाते सति तिसृभी रात्रिभिः शुद्धिर्न पुनस्तच्छेषमात्रेण । शातातपेनाप्युक्तम्—'रात्रिशेषे द्व्यहाच्छुद्धिर्यामशेषे शुचिस्त्र्यहात्' इति । प्रेतक्रिया पुनः सूतकसन्निपातेऽपि न निवर्तत इति तेनैवोक्तम्—'अन्तर्दशाहे जननात्पश्चात्स्यान्मरणं यदि । प्रेतमुद्दिश्य कर्तव्यं पिण्डदानं स्वबन्धुभिः ॥ प्रारब्धे प्रेतपिण्डे तु मध्ये चेज्जननं भवेत् । तथैवाशौचपिण्डांस्तु शेषान्दद्याद्यथाविधि' ॥ इति । तथा शावाशौचयोः सन्निपातेऽपि प्रेतकृत्यं कार्यम् , तुल्यन्यायत्वात् । तथा जातकर्मादिकमपि पुत्रजन्मनिमित्तकमाशौचान्तरसन्निपातेपि कार्यमेव । तथाह प्रजापतिः—'आशौचे तु समुत्पन्ने पुत्रजन्म यदा भवेत् । कर्तुस्तात्कालिकी शुद्धिः पूर्वाशौचेन शुद्ध्यति' ॥ इति ॥

गर्भस्रावे मासतुल्या निशाः शुद्धेस्तु कारणम् ॥ २१ ॥

(वी० मि०) गर्भस्रावे गर्भपाते सति नष्टभार्याया गर्भिण्याः स्त्रिया गर्भाधिकरणमाससमसंख्यान्यहोरात्राणि तदपगमरूपायास्तदपगमक्षणोत्पन्नाऽदृष्टादिरूपाया वा शुद्धिः कारणम् । अत्र निशा इति बहुवचनाद् यतःप्रभृति मासानां बहुत्वं तत्रेयं व्यवस्था । अनेन तृतीयमासमारभ्य षण्मासपर्यन्तं त्रिरात्रचतूरात्रादिकमाशौचं भवति । ब्रह्मपुराणे—

षण्मासाभ्यन्तरं यावद्गर्भस्रावो भवेद्यदि ।
तदा माससमैस्तासां दिवसैः शुद्धिरिष्यते ॥
अत ऊर्ध्वं स्वजात्युक्तमाशौचं तासु विद्यते ।
सद्यः शौचं सपिण्डानां गर्भस्य पतने सति ॥

तुशब्देन शुद्धावपि कर्माधिकारश्चतुर्थदिने व्यवच्छिन्नः ।

दैवकर्मणि पित्र्ये च पञ्चमेऽहनि शुद्ध्यति ।

इति वचनात् । इदं च वचनं ब्राह्मणीपरं, तृतीयमासे क्षत्रियादीनां गर्भस्रावे अशौचान्तरस्मरणात् । तदाह मरीचिः—

गर्भस्रुत्यां यथामासमचिरे तूत्तमे त्र्यहम् ।
राजन्ये तु चतूरात्रं वैश्ये पञ्चाहमेव च ॥
अष्टाहेन तु शूद्रस्य शुद्धिरेषा प्रकीर्तिता ।

मासत्रयादूर्ध्वं गर्भस्रुत्यां यथामाससंख्यान्यहानि ततोऽचिरे मासत्रयाभ्यन्तरे तु उत्तमे ब्राह्मण्यां त्रिरात्रम् । राजन्यादौ गर्भस्रुत्यां चतूरात्रादिकमित्यर्थः । कूर्मपुराणे—

गर्भच्युतावहोरात्रं सपिण्डेऽत्यन्तनिर्गुणे ।
यथेच्छाचरणे ज्ञातौ त्रिरात्रमिति निश्चयः ॥

अत्यन्तनिर्गुणे वेदैकदेशस्वक्रियाशून्ये । यथेच्छाचरणे सर्वाशित्वसर्वविक्रयित्वादिमति ॥ २१ ॥

(मिता०) पूर्णप्रसवकालजननाशौचमभिधायाधुना अप्राप्तकालगर्भनिःसरणनिमित्तमाशौचमाह—

गर्भस्राव इति । स्रवतिर्यद्यपि लोके द्रवद्रव्यकर्तृके परिस्पन्दे प्रयुज्यते तथाप्यत्र द्रवाद्रवद्रव्यसाधारणरूपेऽधःपतने वर्तते । कुतः, द्रवत्वस्य प्रथममास एव सम्भवात्तत्र च मासतुल्या निशा इति बहुवचनानुपपत्तेः । गर्भस्रावे यावन्तो गर्भग्रहणमासास्तत्समसंख्याका निशाः शुद्धेः कारणम् । एतच्च स्त्रिया एव । 'गर्भस्रावे मासतुल्या रात्रयः स्त्रीणां, स्नानमात्रमेव पुरुषस्य' इति वृद्धवसिष्ठस्मरणात् । यत्पुनर्गौतमेन 'त्र्यहं चे'ति त्रिरात्रमुक्तं तन्मासत्रयादर्वाग्वेदितव्यम् । 'गर्भस्रुत्यां यथामासमचिरे तूत्तमे त्रयः । राजन्ये तु चतूरात्रं वैश्ये पञ्चाहमेव तु ॥ अष्टाहेन तु शूद्रस्य शुद्धिरेषा प्रकीर्तिता' ॥ इति मरीचिस्मरणात् । अचिरे मासत्रयादर्वाक् गर्भस्रावे उत्तमे ब्राह्मणजातौ त्रिरात्रमित्यर्थः । एतच्च षण्मा(१)सपर्यन्तं द्रष्टव्यम् । सप्तमादिषु पुनः परिपूर्णमेव प्रसवाशौचं कार्यम् । तत्र परिपूर्णाङ्गस्य जीवतो निर्गमदर्शनात् । 'षण्मासाभ्यन्तरे यावद्गर्भस्रावो भवेद्यदा । तदा माससमैस्तासां दिवसैः शुद्धिरिष्यते ॥ अत ऊर्ध्वं स्वजात्युक्तं तासामाशौचमिष्यते । सद्यःशौचं सपिण्डानां गर्भस्य पतने सति' ॥ इति स्मरणात् । एतच्च सपिण्डानां सद्यः शौचविधानं द्रवभूतगर्भपतने वेदितव्यम् । यत्पुनर्वसिष्ठवचनम्—'ऊनद्विवार्षिके प्रेते गर्भपतने वा सपिण्डानां त्रिरात्रम्' इति तत्पञ्चमषष्ठयोः कठिनगर्भपतनविषयम् । 'आचतुर्थाद्भवेत्स्रावः पातः पञ्चमषष्ठयोः । अत (२)ऊर्ध्वं प्रसूतिः स्याद्दशाहं सूतकं भवेत् ॥ स्रावे मातुस्त्रिरात्रं स्यात्सपिण्डाशौचवर्जनम् । पाते मातुर्यथामासं पित्रादीनां दिनत्रयम्' ॥ इति मरीचिस्मरणात् । सप्तममासप्रभृतिमृतजनने जातमृते वा सपिण्डानां जननिमित्तं परिपूर्णमाशौचम् । 'जातमृते मृतजाते वा सपिण्डानां दशाहम्' इति हारीतस्मरणात् । 'अतः

---

(१) पर्यंतं ङ० । (२) अत ऊर्ध्वं प्रसवो दशाहं घ० ।

सूतके चेदोत्थानाशौचं सूतकवत्' इति पारस्करवचनाच्च । आ उत्थानादा सूतिकाया उत्थानाद्दशाहामिति यावत् । सूतकवदिति शिशुपरमनिमित्तोदकदानरहितमित्यर्थः । बृहन्मनुरपि–'दशाहाभ्यन्तरे वाले प्रमीते तस्य वान्धवैः । शावाशौचं न कर्तव्यं सूत्याशौचं विधीयते' ॥ इति । तथा च स्मृत्यन्तरमपि—'अन्तर्दशाहोपरतस्य सू(१)तिकाहोभिरेवाशौचम्' इति । एवमादिवचननिचयपर्यालोचनया सपिण्डानां जननिमित्ताशौचसंकोचो नास्तीति गम्यते । यत्पुनर्वृहद्विष्णुवचनम्—'जाते मृते मृतजाते वा कुलस्य सद्यः शौचम्' इति तच्छिशुपरमनिमित्तस्याशौचस्य स्नानाच्छुद्धिप्रतिपादनपरं न प्रसवनिमित्तस्य । तथा च पारस्करः–'गर्भे यदि विपत्तिः स्याद्दशाहं सूतकं भवेत्' इति, सपिण्डानां प्रसवनिमित्तस्य विद्यमानत्वात् । 'जीवञ्जातो यदि प्रेयात्सद्य एव विशुध्यति' इति प्रेताशौचाभिप्रायम् । तथा च शङ्खेनोक्तम्—'प्राङ् नामकरणात्सद्यः शौचम्' इति । यत्पुनः कात्यायनवचनम्—'अनिवृत्ते दशाहे तु पञ्चत्वं यदि गच्छति । सद्य एव विशुद्धिः स्यान्न प्रेतं नोदकक्रिया' ॥ इति, तदपि वैष्णवेन समानार्थम् । यदा तु न प्रेतं नैव सूतकमिति पाठस्तदा सूतकमस्पृश्यत्वं नैव पित्रादीनां भवतीत्यर्थः । अथवायमर्थः—अन्तर्दशाहे यदि शिशुपरमस्तदा न प्रेताशौचं, यदि तत्र सपिण्डजननं तदा सूतकमपि नैव कार्यं, किंतु पूर्वाशौचेनैव शुद्धिरिति । यत्तु बृहन्मनुवचनम्—'जीवञ्जातो यदि ततो मृतः सूतक एव तु । सूतकं सकलं मातुः पित्रादीनां त्रिरात्रकम्' ॥ इति । यच्च बृहत्प्रचेतोवचनम्—'मुहूर्तं जीवितो बालः पञ्चत्वं यदि गच्छति । मातुः शुद्धिर्दशाहेन (२)सद्यः शुद्धास्तु गोत्रिणः' ॥ इति तत्रेयं व्यवस्था—जननानन्तरं नाभिवर्धनात्प्राङ् मृतौ पित्रादीनां जननिमित्तमाशौचं दिनत्रयम् । सद्यः शौचं त्वग्निहोत्राद्यर्थम् । 'अग्निहोत्रार्थं स्नानोपस्पर्शनात्तत्कालं शौचम्' इति शङ्खस्मरणात् । नाभिवर्धनोत्तरकालं तु शिशुप्रायणेऽपि जननिमित्तं संपूर्णमाशौचं सपिण्डानाम् । 'यावन्न छिद्यते नालं तावन्नाप्नोति सूतकम् । छिन्ने नाले ततः पश्चात्सूतकं तु विधीयते' ॥ इति जैमिनिस्मरणात् ।

---

(१) सूतकाहोभिः ख० । (२) सद्यः शौचास्तु घ० ।

मनुनाप्ययमर्थो दर्शितः (५।६६)—'रात्रिभिर्मासतुल्याभिर्गर्भस्रावे विशुध्यति । रजस्युपरते साध्वी स्नानेन स्त्री रजस्वला' ॥ इति । पूर्वभागस्यार्थो दर्शितः । उत्तरस्य त्वयमर्थः—रजसि निःसरणादुपरते निवृत्ते रजस्वला स्त्री स्नानेन साध्वी दैवादिकर्मयोग्या भवति । स्पर्शादिविषये पुनरनुपरतेऽपि रजसि चतुर्थेऽहनि स्नानाच्छुद्धिर्भवति । तदुक्तं वृद्धमनुना—'चतुर्थेऽहनि संशुद्धा भवति व्यावहारिकी' इति । तथा स्मृत्यन्तरम्—'शुद्धा भर्तुश्चतुर्थेऽह्नि स्नानेन स्त्री रजस्वला । दैवे कर्मणि पित्र्ये च पञ्चमेऽहनि शुध्यति' ॥ पञ्चमेऽहनीति रजोनिवृत्तिकालोपलक्षणार्थम् । यदा रजोदर्शनादारभ्य पुनः सप्तदशदिनाभ्यन्तरे रजोदर्शनं तदा अशुचित्वं नास्त्येव । अष्टादशे त्वेकाहाच्छुद्धिः । एकोनविंशे द्व्यहात् । तत उत्तरेषु त्र्यहाच्छुद्धिः । यथाहात्रिः—'रजस्वला यदि स्नाता पुनरेव रजस्वला । अष्टादशदिनादर्वागशुचित्वं न विद्यते ॥ एकोनविंशतेरर्वागेकाहं स्यात्ततो द्व्यहम् । विंशत्प्रभृत्युत्तरेषु त्रिरात्रमशुचिर्भवेत्' ॥ इति । यत्तु 'चतुर्दशादिनादर्वागशुचित्वं न विद्यते' इति स्मृत्यन्तरं, तत्र स्नानप्रभृतित्वमभिप्रेतमतो न विरोधः । अयं चाशुचित्वप्रतिषेधो यस्या विंशतिदिनोत्तरकालमेव प्रायशो रजोदर्शनं तद्विषयः। यस्याः पुनरारूढयौवनायाः प्रागेवाष्टादशदिनात्प्राचुर्येण रजोनिर्गमस्तस्यास्त्रिरात्रमेवाशौचम् । तया च यावत्त्रिरात्रं स्नानादिरहितया स्थातव्यम् । 'रजस्वला त्रिरात्रमशुचिर्भवति सा च नाञ्जीत नाभ्यञ्जीत नाप्सु स्नायादधः शयीत न दिवा स्वप्यात् न ग्रहान्निरीक्षेत नाग्निं स्पृशेत् नाश्नीयान्न रज्जुं सृजेत् न च दन्तान् धावयेत् न हसेन्न च किञ्चिदाचरेत् अखर्वेण पात्रेण पिबेदञ्जलिना वा पात्रेण लोहितायसेन वेति विज्ञायते' इति वसिष्ठस्मरणात् ।

आङ्गिरसेऽपि विशेषः—'हस्तेऽश्नीयान्मृन्मये वा हविर्भुक् क्षितिशायिनी । रजस्वला चतुर्थेऽह्नि स्नात्वा शुद्धिमवाप्नुयात्' ॥ इति । पाराशरेऽपि विशेषः—'स्नाने नैमित्तिके प्राप्ते नारी यदि रजस्वला । पात्रान्तरिततोयेन स्नानं कृत्वा व्रतं चरेत् ॥ सिक्तगात्रा भवेदद्भिः साङ्गोपाङ्गा कथञ्चन । न वस्त्रपीडनं कुर्यान्नान्यद्वासश्च धारयेत्' ॥ इति। उशनसाप्यत्र विशेषो दर्शितः—'ज्वराभिभूता या नारी रजसा च परिप्लुता । कथं तस्या भवेच्छौचं शुद्धिः स्यात्केन कर्मणा ॥ चतुर्थे-

ऽहनि संप्राप्ते स्पृशेदन्या तु तां स्त्रियम् । सा सचेलावगाह्यापः स्नात्वा स्नात्वा पुनः स्पृशेत् ॥ दशद्वादशकृत्वो वा आचमेच्च पुनः पुनः । अन्ते च वाससां त्यागस्ततः शुद्धा भवेच्च सा ॥ दद्याच्छक्त्या ततो दानं पुण्याहेन विशुद्ध्यति' । इति । अयं चातुरमात्रे स्नानप्रकारोऽनुसरणीयः । 'आतुरे स्नान उत्पन्ने दशकृत्वो ह्यनातुरः । स्नात्वा स्नात्वा स्पृशेदेनं ततः शुद्ध्येत्स आतुरः' ॥ इति पराशरस्मरणात् ।

यदा तु रजस्वलायाः सूतिकाया वा मृतिर्भवति तदायं स्नानप्रकारः—'सूतिकायां मृतायां तु कथं कुर्वन्ति याज्ञिकाः । कुम्भे सलिलमादाय पञ्चगव्यं तथैव च ॥ पुण्यर्ग्भिरभिमन्त्र्यापो वाचा शुद्धिं लभेत्ततः । तेनैव स्नापयित्वा तु दाहं कुर्याद्यथाविधि' ॥ रजस्वलायास्तु—'पञ्चभिः स्नापयत्वा तु गव्यैः प्रेतां रजस्वलाम् । वस्त्रान्तरावृतां कृत्वा दाहयेद्विधिपूर्वकम्' ॥ इति । एतच्च रजोदर्शनपुत्रजन्मादि यद्युदयोत्तरकालमुत्पन्नं तदा तद्दिवसप्रभृत्याशौचाहोरात्रगणना कार्या । यदा तु रजन्यां रजोदर्शनपुत्रजन्मादि जातं तदार्धरात्रात्प्राक् जननाद्युत्पत्तौ पूर्वदिवसैकदेशव्यापित्वेऽपि आशौचस्य तत्पूर्वदिवसप्रभृत्येव गणना कार्येत्येकः कल्पः । रात्रिं त्रेधा विभज्याद्ये भागद्वये जननादौ जाते (१)पूर्वदिनं ग्राह्यमिति द्वितीयः । प्रागुदयादित्यपरः । यथाह कश्यपः—'उदिते तु यदा सूर्ये नारीणां दृश्यते रजः । जननं वा विपत्तिर्वा यस्याहस्तस्य शर्वरी ॥ अर्धरात्रावधिः कालः सूतकादौ विधीयते । रात्रिं कुर्यात्त्रिभागां तु द्वौ भागौ पूर्व एव तु ॥ उत्तरांशः प्रभातेन युज्यते ऋतुसूतके । रात्रावेव समुत्पन्ने मृते रजसि सूतके ॥ पूर्वमेव दिनं ग्राह्यं या(२)वन्नोदयते रविः' ॥ इति । एतेषां च कल्पानां देशाचारानुसारतो व्यवस्था विज्ञेया ।

इदं चाशौचमाहिताग्नेरुपरमे संस्कारदिवसप्रभृति कर्तव्यम् । अनाहिताग्नेस्तु मरणदिवसप्रभृति संचयनं तूभयोरिति संस्कारदिवसप्रभृतीति विवेचनीयम् । यथाहाङ्गिराः—'अनग्निमत उत्क्रान्तेः साग्नेः संस्कारकर्मणः । शुद्धिः संचयनं दाहान्मृताहस्तु (३)यथाविधि' ॥ इति । संस्कारकर्मण इति श्रवणादाहिताग्नौ पितरि देशा-

(१) अशौचपूर्वदिनं घ. । (२) यावन्नाभ्युदितो रविः घ. । (३) यथातिथीति ख. ।

न्तरमृते तत्पुत्रादीनामासंस्कारात्सन्ध्यादिकर्मलोपो नास्तीत्यनुसन्धेयम् । तथा च पैठीनसिः—'अनग्निमत उत्क्रान्तेराशौचं हि द्विजातिषु । दाहादग्निमतो विद्याद्विदेशस्थे मृते सति' ॥ इति ॥ २० ॥

विप्रगो(१)नृपहतानामन्वक्षं चात्मघातिनाम् ॥

(वी०मि०) विप्रादिना हतानां, मरणान्तिकप्रायश्चित्तार्थमथवा प्रयागमरणजन्यफलार्थमात्मघातिनां च मरणे तत्सपिण्डानामन्वक्षं चक्षुरुन्मीलनकालव्यापकमशौचं भवति, न तु दशाहादिकमित्यर्थः । चकारेण राजाज्ञादिना सद्यः शौचस्य समुच्चयः । तदाह यमः—

डिम्बाहवहतानां च विद्युता पार्थिवेन च ।
गोब्राह्मणस्य चैवार्थे यस्य चेच्छति पार्थिवः ॥

इत्यादि ।

व्यापादयेद्य आ(२)त्मानं स्वयं योऽग्न्युदकादिना ।
विहितं तस्य नाशौचं नाग्निर्नाप्युदकक्रिया ॥

इत्यङ्गिरोवचनं क्रोधादात्मघातिनमभिप्रेत्य ।

वृद्धः शौचस्मृतेर्लुप्तः प्रत्याख्यानभिषक्क्रियः ।
आत्मानं घातयेद्यस्तु भृग्वग्न्यनशनाम्बुभिः ॥
तस्य त्रिरात्रमाशौचं द्वितीये त्वस्थिसञ्चयः ।
तृतीये तूदकं कृत्वा चतुर्थे श्राद्धमाचरेत् ॥

इति वृद्धगार्ग्यवचनं मरणादिकप्रायश्चित्तादिव्यतिरेकेणेति दिक् ॥

(मिता०) सपिण्डत्वादिना दशाहादिप्राप्तौ कचिन्मृत्युविशेषेऽपवादमाह—

हतानामिति । नृपोऽभिषिक्तः क्षत्रियादिः । गोग्रहणं शृङ्गिदंष्ट्र्यादितिरश्चामुपलक्षणार्थम् । विप्रग्रहणम(३)न्त्यजोपलक्षणम् । एतैर्हतानां सम्बन्धिनो ये सपिण्डास्तेषाम् । विषोद्बन्धनादिभिः बुद्धिपूर्वमात्मानं ये व्यापादयन्ति ते आत्मघातिनः । आत्मघातिग्रहणं 'पाखण्ड्यनाश्रिता' इत्येकयोगोपात्तपतितमात्रोपलक्षणार्थम् । तत्सम्बन्धिनां चान्वक्षमनुगतमक्षमन्वक्षं सद्यः शौचमित्य(४)र्थः । तत्सम्बन्धिनां च

(१) हतानां नृपगोविप्रैरन्वक्षं–इति मु० पु० पाठः ।

(२) व्यापादयेदथात्मानं–इति क० पु० पाठः ।

(३) अन्त्यजोपलक्षणमित्यस्य अन्त्यजानामप्युपलक्षणमित्यर्थः । तद्धतानामपि सद्यः शुचित्वविधानात् । (४) शौचमित्यर्थः न पुनः ख. ।

सान्वक्षं यावद्दर्शनमाशौचं न पुनर्दशाहादिकम् । तथा च गौतमः—'गोब्राह्मणहतानामन्वक्षं राजक्रोधाच्चायुद्धे प्रायोऽनाशकशस्त्राग्निविषोदकोद्बन्धनप्रपतनैश्चेच्छताम्' इति । क्रोधग्रहणं प्रमादव्यापादितनिरासार्थम् । अयुद्धग्रहणं युद्धहतस्यैकाहमाशौचमस्तीति ज्ञापनार्थम् । 'ब्राह्मणार्थे विपन्नानां योषितां गोग्रहेऽपि च । आहवेऽपि हतानां च एकरात्रमशौचकम्' ॥ इति स्मरणात् । एतच्च युद्धकालक्षतेनैव कालान्तरविपन्नस्य । समरमूर्धनि हतस्य पुनः सद्यः शौचम् । यथाह मनुः (५।९८)—'उद्यतैराहवे शस्त्रैः क्षत्रधर्महतस्य च । सद्यः सन्तिष्ठते यज्ञस्तथा शौचमिति स्थितिः' ॥ इति ॥

प्रोषिते कालशेषः स्यात्पूर्णे दत्त्वोदकं शुचिः ॥ २२ ॥

(वी० मि०) प्रोषिते देशान्तरस्थे यत्रस्थेन प्रथमदिवस एव सपिण्डजननमरणेन तद्देशमृते सपिण्डसकुल्यादौ च त्रिरात्रेदशरात्रैर्यावानेव कालोऽवशिष्टस्तावदेवाऽऽशौचं भवतु न तु श्रवणानन्तरम् । दशरात्रादिपूर्णे च मरणानन्तरं दशरात्रादावशौचकाले स्नानपूर्वकमुदकं दत्त्वैव शुचिर्भवति । जननाशौचे तु न स्नानमपि दशरात्राद्यनन्तरमस्ति ।

नाऽशुच्यं प्रसवस्याऽस्ति व्यतीतेषु दिनेष्वपि ।

इति देवलसंवादात् । उदकं दत्त्वेति वत्सरानन्तरं पूर्णाशौचश्रवणपरमसम्पूर्णाशौचपरं च । पूर्णाशौचमधिकृत्यान्यत्र त्वाह देवलः—

अशौचाहःस्वतीतेषु बन्धुश्चेच्छ्रूयते मृतः ।
तत्र त्रिरात्रमाशुच्यं भवेत्संवत्सरान्तरे ॥
ऊर्ध्वं संवत्सरार्द्धात्तु श्रूयते चेन्मृतः स्वकैः ।
भवेदेकाहमेवाऽत्र तच्च संन्यासिनां न तु ॥

संवत्सरान्तरे षण्मासमध्ये एकाहं, नवममासादूर्ध्वं 'श्रुत्वा दशम्याः पक्षिणी'ति गौतमेन विहितायाः पक्षिण्याः 'समं स्या'दिति न्यायेन षण्मासोर्द्ध्वं वर्षमध्यकालस्यार्द्धे मासत्रये व्यवस्थितत्वादिति दिक् ॥ २२ ॥

(मिता०) ज्ञातस्यैव जननादेराशौचनिमित्तत्वाज्जन्मादिदिनादुत्तरकालेऽपि ज्ञाते दशाहादिप्राप्तावपवादमाह—

प्रोषित इति । प्रोषिते देशान्तरस्थे यत्रस्थेन प्रथमदिवस एव

सपिण्डजननादिकं न ज्ञायते तस्मिन्सपिण्डे कालस्य दशाहाद्यवच्छिन्नस्य यः शेषोऽवशिष्टकालः स एव शुद्धिहेतुर्भवति । पूर्णे पुनराशौचकाले दशाहादिके प्रेतायोदकं दत्वा शुद्धिर्भवति । उदकदानस्य स्नानपूर्वकत्वात्स्नात्वोदकं दत्वा शुचिर्भवति । तदुक्तं मनुना (५।७७)—'निर्दशं ज्ञातिमरणं श्रुत्वा पुत्रस्य जन्म च । सवासा जलमाप्लुत्य शुद्धो भवति मानवः' ॥ इति । 'पूर्णे दत्त्वोदकं शुचिः' इति प्रेतोदकदानसहचरितस्याशौचकालस्य शुद्धिहेतुत्वविधानात् जन्मन्यतिक्रान्ताशौचं सपिण्डानां नास्तीति गम्यते । पितुस्तु निर्दशेऽपि जनने स्नानमस्त्येव । 'श्रुत्वा पुत्रस्य जन्म च' इति वचनात् । एतच्च पुत्रग्रहणं जन्मनि सपिण्डानामतिक्रान्ताशौचं नास्तीति ज्ञापकम् । अन्यथा 'निर्दशं ज्ञातिमरणं श्रुत्वा जन्म च निर्दशम्' इत्येवावक्ष्यत् । न चोक्तम् । तथा च देवलः—'नाशुद्धिः प्रसवाशौचे व्यतीतेषु दिनेष्वपि' इति । तस्माद्विपत्तावेवातिक्रान्ताशौचमिति स्थि(१)तम् । केचिदन्यथेमं श्लोकं पठन्ति—'प्रोषिते कालशेषः स्यादशेषे त्र्यहमेव तु । सर्वेषां वत्सरे पूर्णे प्रेते दत्वोदकं शुचिः' ॥ इति । (२)प्रोषिते प्रेते सर्वेषां ब्राह्मणक्षत्रियादीनामविशेषेण कालशेषः शुद्धिहेतुः । अशेषे पुनरतिक्रान्ते दशाहादौ सर्वेषां त्र्यहमेवाशौचम् । संवत्सरे पूर्णे यदि प्रोषितप्रयाणमवगतं स्यात्तदा सर्वो ब्राह्मणादिः स्नात्वोदकं दत्वा शुचिः स्यात् । तथा च मनुः (५।७६)—'संवत्सरे व्यतीते तु स्पृष्ट्वैवापो विशुध्यति' इति । अयं च त्र्यहो दशाहादूर्ध्वं मासत्रयादर्वाग्द्रष्टव्यः । पूर्वोक्तं तु सद्यः शौचं नवममासादूर्ध्वमर्वाक्संवत्सराद् द्रष्टव्यम् । यत्पुनर्वासिष्ठं वचनम्—'ऊर्ध्वं दशाहाच्छ्रुत्वैकरात्रम्' इति, तदूर्ध्वं षण्मासेभ्यो यावन्नवमम् । यदपि गौतमवचनम्—'श्रुत्वा चोर्ध्वं दशम्याः पक्षिणी' इति, तन्मासत्रयादूर्ध्वमर्वाक्षष्ठात् । तथा च वृद्धवासिष्ठः—'मासत्रये त्रिरात्रं स्यात्षण्मासे पक्षिणी तथा । अहस्तु नवमादर्वागूर्ध्वं स्नानेन शुध्यति' ॥ इति । एतच्च मातापितृव्यतिरिक्तविषयम् । 'पितरौ चेन्मृतौ स्यातां दूरस्थोऽपि हि पुत्रकः । श्रुत्वा तद्दिनमारभ्य दशाहं सूतकी भवेत्' इति पैठीनसिस्मरणात् । तथा च स्मृत्यन्तरेऽपि—'महागुरुनिपाते तु आर्द्रवस्त्रोपवासिना । अतीतेऽब्देऽपि कर्तव्यं प्रेतकार्यं य-

[१] स्थिति· ख. । [२] प्रोषिते सर्वेषां ख. ।

थाविधि' ॥ इति । संवत्सरादूर्ध्वमपि प्रेतकार्यमाशौचोदकदानादिकं कार्यं न पुनः स्नानमात्राच्छुद्धिरित्यर्थः । पितृपत्न्यामपि मातृव्यतिरिक्तायां स्मृत्यन्तरे विशेषो दर्शितः--'पितृपत्न्यामपेतायां मातृवर्जं द्विजोत्तमः । संवत्सरे व्यतीतेऽपि त्रिरात्रमशुचिर्भवेत्' ॥ इति । यस्तु नद्यादिव्यवहिते देशान्तरे मृतस्तत्सपिण्डानां दशाहादूर्ध्वं मासत्रयादर्वागपि सद्यः शौचम् । 'देशान्तरमृतं श्रुत्वा क्लीबे वैखा(१)नसे यतौ । मृते स्नानेन शुध्यन्ति गर्भस्रावे च गोत्रिणः' ॥ इति । देशान्तरलक्षणं च बृहस्पतिनोक्तम्--'महानद्यन्तरं यत्र गिरिर्वा व्यवधायकः । वाचो यत्र विभिद्यन्ते तद्देशान्तरमुच्यते ॥ देशान्तरं वदन्त्येके षष्टियोजनमायतम् । चत्वारिंशद्वदन्त्यन्ये त्रिंशदन्ये तथैव च' ॥ इति । इदं चातिक्रान्ताशौचमुपनीतोपरमविषयम् । न पुनर्वयोवस्थाविशेषाशौचविषयमपि । तथा चोक्तं व्याघ्रपादेन--'तुल्यं वयसि सर्वेषामतिक्रान्ते तथैव च । उपनीते तु विषमं तस्मिन्नेवातिकालजम्' ॥ इति । अयमर्थः-वयसि त्रिवर्षादिरूपे यदाशौचमादन्तजन्मनः सद्य इत्यादिवाक्यविहितं तत्सर्वेषां ब्राह्मणादिवर्णानां तुल्यमविशिष्टम् । अतिक्रान्ते च दशाहादिके त्र्यहादि यदाशौचं तदपि सर्वेषामविशिष्टम् । उपनीते (२)पुनरुपरते दशद्वादशपञ्चदशत्रिंशद्दिनानीत्येवं विषममाशौचं ब्राह्मणादीनाम् । तस्मिन्नेवोपनीतोपरम एव अतिकालजमतिक्रान्ताशौचं भवति, न पुनर्वयोवस्थाशौचातिक्रम इति ॥ २२ ॥

(वी०मि०)'दशरात्रमतः पर'मिति ब्राह्मणमधिकृत्योक्तम् । क्षत्रियादीनां सर्वेषां तु सपिण्डमरणे तज्जन्मनि चाशौचमाह--

क्षत्रस्य(३) द्वादशाहानि विशः पञ्चदशैव तु ॥
त्रिंशद्दिनानि शूद्रस्य तदर्द्धं न्यायवर्तिनः ॥ २३ ॥

सपिण्डमरणे क्षत्रियस्य द्वादशाहानि व्याप्य, वैश्यस्य तु पञ्चदशाहानि व्याप्य, शूद्रस्य न्यायवर्तिभिन्नस्य त्रिंशद्दिनानि व्याप्य, न्यायवर्तिनस्तु शूद्रस्य तदर्द्धं त्रिंशद्दिनार्द्धमेव व्याप्याशौचमित्यर्थः २३

(१) वैखानसो वानप्रस्थः । (२) पुनरुपरमे ख. ।

(३) अत्रैतत्पद्यात्पूर्वं-प्रोषिते कालशेषः स्यादशेषे त्र्यहमेव तु । सर्वेषां वत्सरे पूर्णे प्रेते दत्त्वोदकं शुचि' ॥ इति पद्यमुपलभ्यते, परं पूर्वव्याख्यातपद्यस्यैव रूपान्तरमेतद्व्याख्याऽभावाच्च मूले निवेशितम्

(मिता०) क्षत्रियादिषु दशरात्रस्य सपिण्डाशौचस्यापवादमाह—

क्षत्रस्येति । क्षत्रियवैश्यशूद्राणां सपिण्डजनने तदुपरमे च यथाक्रमेण द्वादशपञ्चदशत्रिंशद्दिनान्याशौचं भवति । न्यायवर्तिनः पुनः शूद्रस्य पाकयज्ञद्विजशश्रूपादिरतस्य तदर्धं तस्य मासस्यार्धं पञ्चदशरात्रमाशौचम् । एवं च त्रि(१)रात्रं दशरात्रं वेत्येतद्दशरात्रमाशौचं पारिशेष्याद्ब्राह्मणविषये व्यवतिष्ठते । स्मृत्यन्तरेषु तु क्षत्रियादीनां दशाहादयोऽप्यशौचकल्पा दर्शिताः । यथाह पराशरः—'क्षत्रियस्तु दशाहेन स्वकर्मनिरतः शुचिः । तथैव द्वादशाहेन वैश्यः शुद्धिमवाप्नुयात्' ॥ तथा च शातातपः—'एकादशाहाद्राजन्यो वैश्यो द्वादशभिस्तथा । शूद्रो विंशतिरात्रेण शुध्यते मृतसूतके' ॥ वसिष्ठस्तु—'पञ्चदशरात्रेण राजन्यो विंशतिरात्रेण वैश्य' इति । अङ्गिरास्त्वाह—'सर्वेषामेव वर्णानां सूतके मृतके तथा । दशाहाच्छुद्धिरेतेषामिति शातातपोऽब्रवीत्'॥ इत्येवमनेकोच्चावचाशौचकल्पा दर्शिताः, तेषां लोके समाचाराभावान्नातीव व्यवस्थाप्रदर्शनमुपयोगीति नात्र व्यवस्था प्रदर्श्यते । यदा पुनर्ब्राह्मणादीनां क्षत्रियादयः सपिण्डा भवन्ति तदा हारीताद्युक्ताशौचकल्पोऽनुसरणीयः । 'दशाहाच्छुध्यते विप्रो जन्महानौ स्वयोनिषु । षड्भिस्त्रिभिरथैकेन क्षत्रविट्शूद्रयोनिषु' ॥ इति । विष्णुरप्याह—'क्षत्रियस्य विट्शूद्रेषु सपिण्डेषु षड्रात्रत्रिरात्राभ्यां वैश्यस्य शूद्रे सपिण्डे षड्रात्रेण शुद्धिर्हीनवर्णानां तूत्कृष्टेषु सपिण्डेषु जातेषु मृतेषु वा तदाशौचव्यपगमे शुद्धिः' इति । बौधायनेन त्वविशेषेण दशाह इत्युक्तम्—'क्षत्रविट्शूद्रजातीया ये स्युर्विप्रस्य बान्धवाः । तेषामशौचे विप्रस्य दशाहाच्छुद्धिरिष्यते' ॥ इति । अनयोश्च पक्षयोरापदनापद्विषयत्वेन व्यवस्था । दास्यादीनां तु (२)स्वामिशौचेन स्पृश्यत्वं, कर्मानधिका(३)रत्वं तु मासावधिरेव । तदाहाङ्गिराः—'दासी दासश्च सर्वो वै यस्य वर्णस्य यो भवेत् । तद्वर्णस्य भवेच्छौचं दास्या मासस्तु सूतकम्' ॥ इति । प्रतिलोमानां त्वाशौचाभाव एव । 'प्रातिलोमा धर्महीनाः' इति मनुस्मरणात् । केवलं मृतौ प्रसवे च मलापकर्षणार्थं मूत्रपुरीषोत्सर्गवत् शौचं भवत्येव ॥ २३ ॥

---

(१) त्रिरात्रं वेति ख. । (२) स्वाम्याशौचेन ख. । (३) नाधिकारस्तु क. ङ. ।

अहस्त्वदत्तकन्यासु बालेषु च विशोधनम् ॥
गुर्वन्तेवास्यनूचानमातुलश्रोत्रियेषु च ॥ २४ ॥
अनौरसेषु पुत्रेषु भार्यास्वन्यगतासु च ॥
निवासराजनि प्रेते तदहः शुद्धिकारणम् ॥ २५ ॥

(वी०मि०) वर्षद्व(१)योर्ध्वमर्वाग्वाग्दत्ताद(२)त्तासु कन्यासु मृतासु बालेषु चाऽजातदन्तेषु मृते(३)षु प्रमाद्दग्धेषु चाऽहोरात्रं विशोधनं स्वापगमेनाऽशौचापगमहेतुभूतं भवति । ब्रह्मपुराणे—

आजन्मनस्तु चूडान्तं यत्र कन्या विपद्यते ।
सद्यः शौचं भवेत्तस्य सर्ववर्णेषु नित्यशः ॥
ततो वाग्दानपर्यन्तं यावदेकाहमेव हि ।
अतः परं प्रवृद्धानां त्रिरात्रमिति निश्चयः ॥
वाक्प्रदाने कृते तत्र ज्ञेयं चोभयतस्त्र्यहम् ।
पितुर्वरस्य च ततो दत्तानां भर्तुरेव हि ॥
स्वजात्युक्तमशौचं स्यात्सूतके मृतकेऽपि वा ।

प्रवृद्धानामित्यस्य विवरणं वाक्प्रदाने कृत इति, उभयत इत्यस्य च विवरणं पितुर्वरस्य चेति । वाग्दानाभावे तु विवाहपर्य्यन्तमेकाहमेवाऽऽशौचं प्रकृतवचनादेव । कूर्मपुराणम्—

अजातदन्तमरणे पित्रोरेकाहमिष्यते ।
दन्तजाते त्रिरात्रं स्याद्यदि स्यातां तु निर्गुणौ ॥

इदं च प्रमादेन दाहपक्षे ब्राह्मणस्य ।

यद्यप्यकृतचूडो हि जातदन्तश्च संस्थितः ।
तथापि दाहयित्वैनमशौचं त्र्यहमाचरेत् ॥

इत्यङ्गिरोवचनात् । अनतीतद्विवर्षदाहमुपक्रम्य ब्रह्मपुराणे—

राज्ञामेकादशाहं तु वैश्यानां द्वादशाहिकम् ।
अपि विंशतिरात्रं तु शूद्राणां च भवेत्क्रमात् ॥

गुर्विति । गुरुर्यत्किञ्चिदध्यापकः, अन्तेवासी शिष्यः, अनूचानः वेदाङ्गाध्येता, मातुलो मातृवैमात्रेयः, श्रोत्रियः शाखाभिज्ञः, स्वग्राममृतः । एषु निमित्तभूतेषु अहो विशोधनम् । तुशब्देन बालपुरु-

(१) वर्षद्वयार्द्धेनाऽर्वा०-इति ख० पु० पाठः । (२) वाग्दत्तादत्तासु-इति क० पु० पाठः ।
(३) मृतेषु प्रमाद-इति नास्ति ख० पुस्तके ।

पमरणनिमित्तकत्र्यहाशौचव्यवच्छेदः । आद्यचकारेण जातदन्तस्य बालस्य प्रमादाद्दाहे त्र्यहाशौचं समुच्चिनोति । द्वितीयचकारेण स्वगृहमृताऽश्रोत्रियादिसमुच्चयः । अत्र मनुः—

त्रिरात्रमाहुराशौचमाचार्ये संस्थिते सति ।
तस्य पुत्रे च पत्न्यां च दिवारात्रमिति स्थितिः ॥

दिवारात्रमहोरात्रम्। विष्णुः-'मातुले मातृसोदरे मृते'। अनौरसेष्विति । क्षेत्रजादिषु पुत्रेषु, पराश्रितभार्यासु, स्वदेशराजनि च मृते जाते च तदहः शुद्धिकारणमित्यर्थः । चकारात्परपूर्वासङ्ग्रहः । (१)तदयमसपिण्डाशौचनिर्णयो नानास्मृत्यनुसारी सिद्धवांल्लिख्यते । सकुल्ये, वाग्दत्तकन्यायामाचार्ये सदायाज्ये यजमाने मातामहे च मृते त्रिरात्रमाशौचम् । आचार्यसंस्कारकर्तुः शिष्यस्य त्रिरात्रम् । स्वगृहस्थितस्य च शिष्यस्य तयोर्मरणे एकरात्रम् । आचार्यगृहस्थिते शिष्ये मृते आचार्यस्य उपनीय साङ्गवेदाध्यापकस्य त्रिरात्रम् । उपनीय वेदैकदेशमध्यापितुश्च गुरोस्तत्र पक्षिणी । तादृशि गुरौ मृते तत्पत्न्यां च मृतायां शिष्यस्य पक्षिणी । श्वश्रूश्वशुरसन्निधिवासिमित्रमातुलमातृष्वसृगुर्वृत्विक्श्रोत्रियेषु गृहमृतेषु त्रिरात्रम् । क्षेत्रजादिष्वेकादशसु पुत्रेषु मातापित्रोस्त्रिरात्रम् । क्षेत्रजादीनामपि तयोर्मरणे त्रिरात्रम् । परपूर्वास्वन्यगतासु च भार्यासु मृतासु पत्युस्त्रिरात्रम् । हीनवर्णगामिनीषु अशौचाभाव एव । एकमातृकयोर्भिन्नपितृकयोः परस्परं स्वमातृजात्युक्तं पूर्णाशौचम् । परपत्न्यां जनिते च पुत्रे मृते पितुस्त्रिरात्रम् । तादृशे पितरि च पुत्रस्य त्रिरात्रम् । दशपुरुषोर्द्ध्वं ज्ञायमानजन्मनामपरम्पराज्ञातौ मृते भगिनीमातुलानीमातामहीपितृष्वसृमातुलमातृष्वसृवेदसहाध्यायिमातृष्वस्त्रेयपितृष्वस्त्रेयमातुलपुत्रभागिनेयदौहित्रश्वश्रूश्वशुरमरणे च पक्षिणी । मित्रे स्वगृहमृते पक्षिणी । अन्यत्र मृते मित्रे उपाध्यायतत्पत्नीयत्किञ्चित्पाठसहाध्यायिषु समानब्रह्मचर्येण एकस्मादधीयाने स्वकर्मस्थस्वतन्त्रराजनि अवाग्दत्ताकन्यायां ग्रन्थकृदुक्तबाले यत्किञ्चिदध्यापिते शिष्ये श्यालके च मृतेष्वहोरात्रमशौचम् । उपाध्यायपुत्रे समानब्रह्मचर्ये भिन्नाद्गुरोरधीयाने मृते दिनमात्रं त्रिरात्रं वा । एक-

(१) तदाह यमः सापिण्डाशौचनिर्णये—नानास्मृत्यनुसारी च सिद्धवानिह दृश्यते—इति ख० पुस्तके पाठः ।

ग्रामे मृते श्रोत्रिये चाऽहोरात्रम् । ऋत्विग्जामातृवैमात्रेयमातृबान्धवेषु चाऽहोरात्रम् । अस्वकर्मस्थराजनि प्रेते दिनमात्रं रात्रिमात्रं वा । अज्ञायमानजन्मपरम्पराकेऽस्मद्गोत्रज इत्येवमाकारमात्रज्ञानगोचरे गोत्रजे विप्रहतादौ ग्रन्थकृदुक्ते च सद्यः शौच इति दिक् ॥२४-२५॥

(मिता०) इदानीं स्त्रीषु च वयोवस्थाविशेषेणापवादमाह—

अहरिति । अदत्ता अपरिणीता याः कन्यास्तासु कृतचूडासु वाग्दानात्प्रागहोरात्रं विशेषेण शुद्धिकारणम् । सपिण्डानां सापिण्ड्यं च कन्यानां त्रिपुरुषपर्यन्तमेव । 'अप्रत्तानां तु स्त्रीणां त्रिपुरुषी विज्ञायते' इति वसिष्ठस्मरणात् । बालेषु चानुत्पन्नदन्तेषु अग्निसंस्कारे सत्येकाहो विशोधनम् । अकृतचूडायां तु कन्यायां सद्यः शौचम् । 'अ(१)चूडायां तु कन्यायां सद्यः शौचं विधीयते' इ(२)त्यापस्तम्बस्मरणात् । वाग्दानादूर्ध्वं तु संस्कारात्प्राक्पतिपक्षे पितृपक्षे च त्र्यहमेव । यथाह मनुः (५।७२)—'स्त्रीणामसंस्कृतानां तु त्र्यहाच्छुध्यन्ति बान्धवाः । यथोक्तेनैव कल्पेन शुध्यन्ति तु सनाभयः' ॥ इति । बान्धवाः पतिपक्ष्यास्त्रिरात्रेण शुध्यन्ति । सनाभयस्तु पितृपक्ष्याः सपिण्डा यथोक्तेनैव कल्पेन निर्वृत्तचूडकानामित्यादिनोक्तेन त्रिरात्ररूपेण न पुनर्दशरात्ररूपेण । विवाहात्प्राक् तस्यायुक्तत्वात् । अत एव मरीचिः—'वारिपूर्वं प्रदत्ता तु या नैव प्रतिपादिता । असंस्कृता तु सा ज्ञेया त्रिरात्रमुभयोः स्मृतम्' ॥ इति । उभयोः पतिपितृपक्षयोः । विवाहादूर्ध्वं तु विष्णुना विशेषो दर्शितः—'संस्कृतासु स्त्रीषु नाशौचं पितृपक्षे, तत्प्रसवमरणे चेत्पितृगृहे स्यातां तदैकरात्रं त्रिरात्रं वा' इति । तत्र प्रसवे एकाहः प्रयाणे त्रिरात्रमिति व्यवस्था । इदं च वयोवस्थाशौचं सर्ववर्णसाधारणम् । क्षत्रस्य द्वादशाहानीति तद्वर्णविशेषोपादानेनाभिधानात् । अत एव मनुना अनुपात्तवर्णविशेषाशौचविधेः साधारण्यप्रतिपादनार्थं चातुर्वर्ण्याधिकारे सत्यपि पुनः 'चतुर्णामपि वर्णानां यथावदनुपूर्वशः' इत्युक्तम् । तथाङ्गिरसाप्युक्तम्—'अविशेषेण वर्णानामर्वाक्संस्कारकर्मणः । त्रिरात्रात्तु भवेच्छुद्धिः कन्यास्वन्हा विधीयते' ॥ इति । व्याघ्रपादवचनं च 'तुल्यं वयसि सर्वेषा'मिति प्राक् प्रदर्शितम् । अतो यथा पिण्डयज्ञावृता देयमित्यादिः पिण्डोदकदानविधिः सर्ववर्णसाधारणः, यथा

(१) अकृतचूडायां ख. । (२) इति वासिष्ठस्मरणात् घ. ।

वा समानोदकाशौचविधिः, 'अन्तरा जन्ममरणे' इति संनिपाताशौचविधिश्च य(१)श्च 'गर्भस्रावे मासतुल्या निशा' इति स्रावाशौचविधिः, 'प्रोषिते कालशेषः स्यादशेषे त्र्यहमेव तु' इति विदेशस्थाशौचविधिश्च, यथा गुर्वाद्याशौचविधिः सर्ववर्णसाधारणस्तथा वयोवस्थानिमित्तमप्याशौचं सर्ववर्णसाधारणमेव भवितुमर्हति। अत एव 'क्षत्रे षड्भिः कृते चौले वैश्ये नवभिरुच्यते। ऊर्ध्वं त्रिवर्षाच्छूद्रे तु द्वादशाहो विधीयते'॥ तथा—'यत्र त्रिरात्रं विप्राणामाशौचं संप्रदृश्यते। तत्र शूद्रे द्वादशाहः षण्नव क्षत्रवैश्ययोः'॥ इत्यादीनि ऋष्यशृङ्गादिवचनानि विगीतत्वबुद्ध्याऽनाद्रियमाणैर्धारेश्वरविश्वरूपमेधातिथिप्रभृतिभिराचार्यैरयमेव साधारणः पक्षोऽङ्गीकृतः। अविगीतानि चार्तानार्तक्षत्रियादिविषयतया व्याख्येयानि॥

(मिता०) गुर्वादिष्वातिदेशमाह—

गुर्विति। गुरुरुपाध्यायः, अन्तेवासी शिष्यः, अनूचानोऽङ्गानां प्रवक्ता, मातुलग्रहणेनात्मबन्धवो मातृबन्धवः पितृबन्धवश्च योनि(२)सम्बद्धा उपलक्ष्यन्ते। ते च 'पत्नीदुहितरः' इत्यत्र दर्शिताः। श्रोत्रिय एकशाखाध्यायी। 'एकां शाखामधीत्य श्रोत्रियः' इति बौधायनस्मरणात्। एतेषूपरतेष्वहोरात्रमाशौचम्। यस्तु मुख्यो गुरुः पिता तदुपरमे सपिण्डत्वाद्दशाहमेव। यस्तु पिता पुत्रानुत्पाद्य संस्कृत्य वेदानध्याप्य वेदार्थं ग्राहयित्वा वृत्तिं च विदधाति तस्य महागुरुत्वात्तदुपरमे द्वादशरात्रं वा। 'महागुरुषु दानाध्ययने वर्जयेरन्' इति आश्वलायनेनोक्तं द्रष्टव्यम्। आचार्योपरमे तु त्रिरात्रमेव। यथाह मनुः (५।८०)—'त्रिरात्रमाहुराशौचमाचार्ये संस्थिते सति। तस्य पुत्रे च पत्न्यां च दिवारात्रमिति स्थितिः'॥ इति। यदा त्वाचार्यादेरन्त्येष्टिं करोति तदा दशरात्रमाशौचम्। (५।६५)—'गुरोः प्रेतस्य शिष्यस्तु पितृमेधं (३)समारभेत्। प्रेताहारैः समं तत्र दशाहेन विशुध्यति'॥ इति तेनैवोक्तत्वात्। श्रोत्रियस्य तु समानग्रामीणस्यैतदाशौचम्। 'एकाहं सब्रह्मचारिणि समानग्रामीणे च श्रोत्रिये' इत्याश्वलायनस्मरणात्। एकाचार्योपनीतः सब्रह्मचारी। एतच्चासंनिधाने द्रष्टव्यम्। संनिहिते तु शिष्यादौ त्रिरात्रादि। यथाह मनुः (५।८१)—'श्रोत्रिये तूपसम्पन्ने त्रिरात्रमशुचिर्भवेत्। मातु-

(१) यदूर्ध्वं ख। (२) सम्बन्धा उप ख.। (३) समाचरन् घ.।

ले पक्षिणीं रात्रिं शिष्यर्त्विग्बान्धवेषु च' ॥ इति। उपसम्पन्ने मैत्री-प्रातिवेश्यत्वादिना(१) सम्बद्धे शीलयुक्ते वा। मातुलग्रहणं मातृष्वस्रादेरुपलक्षणार्थम्। बान्धवा इत्यात्मबन्धवो मातृबन्धवः पितृबन्धवश्चोच्यन्ते। तथा च बृहस्पतिः—'त्र्यहं मातामहाचार्यश्रोत्रियेष्वशुचिर्भवेत्' इति। तथा प्रचेताः—'मृते चर्त्विजि याज्ये च त्रिरात्रेण विशुद्ध्यति' इति। तथा च वृद्धवसिष्ठः—संस्थिते पक्षिणीं रात्रिं दौहित्रे भगिनीसुते। संस्कृते तु त्रिरात्रं स्यादिति धर्मो व्यवस्थितः॥ पित्रोरुपरमे स्त्रीणामूढानां तु कथं भवेत्। त्रिरात्रेणैव शुद्धिः स्यादित्याह भगवान्यमः॥ श्वशुरयोर्भगिन्यां च मातुलान्यां च मातुले। पित्रोः स्वसरि तद्वच्च पक्षिणीं क्षपयेन्निशाम्' ॥ तथा-'मातुले श्वशुरे मित्रे गुरौ गुर्वङ्गनासु च। आशौचं पक्षिणीं रात्रिं मृता मातामही यदि' ॥ तथा च गौतमः—'पक्षिणीमसपिण्डे योनिसम्बद्धे सहाध्यायिनि च' इति। योनिसम्बद्धा मातुलमातृष्वस्रीयपितृष्वस्रीयादयः। तथा जाबालः—'एकोदकानां तु त्र्यहो गोत्रजानामहः स्मृतम्। मातृबन्धौ गुरौ मित्रे मण्डलाधिपतौ तथा' ॥ इति। विष्णुः—'असपिण्डे स्ववेश्मनि मृत एकरात्रम्' इति। तथा वृद्धः—'भगिन्यां संस्कृतायां तु भ्रातर्यपि च संस्कृते। मित्रे जामातरि प्रेते दौहित्रे भगिनीसुते॥ शालके तत्सुते चैव सद्यः स्नानेन शुध्यति॥ ग्रामेश्वरे कुलपतौ श्रोत्रिये वा तपस्विनि। शिष्ये पञ्चत्वमापन्ने शुचिर्नक्षत्रदर्शनात्॥ ग्राममध्यगतो यावच्छवस्तिष्ठति कस्यचित्। ग्रामस्य तावदाशौचं निर्गते शुचितामियात्'॥ इत्यादीन्याशौचविशेषप्रतिपादकानि स्मृतिवचनान्यन्वेषणीयानि। ग्रन्थगौरवभयादत्र न लिख्यन्ते। एषु चैकविषयगुरुलघ्वाशौचप्रतिपादकतया परस्परविरुद्धेषु संनिधिविदेशस्थापेक्षया व्यवस्थाऽनुसन्धातव्या॥ २४॥

(मिता०) किञ्च—

अनौरसेष्विति। अहरित्यनुवर्तते। अनौरसाः क्षेत्रजदत्तकादयः तेषु जातेषूपरतेषु वाहोरात्रमाशौचम्। तथा स्वभार्यास्वन्यगतास्वन्यं प्रतिलोमव्यतिरिक्तं आश्रितासु अतीतासु चाहोरात्रमेव न पुनः सत्यपि सापिण्ड्ये दशरात्रम्। प्रतिलोमाश्रितासु चाशौचाभाव

(१) त्वादिसम्बन्धे ग.।

एव । 'पाखण्ड्यनाश्रिताः स्तेना' इत्यनेन प्रतिषेधात् । एतच्च भार्यापुत्रत्वशब्दयोः सम्बन्धिशब्दत्वात् यत्प्रातियौगिकं भार्यात्वं पुत्रत्वं च तस्यैवेदमाशौचम् । सपिण्डानां त्वाशौचाभाव एव । अत एव प्रजापतिः—'अन्याश्रितेषु दारेषु परपत्नीसुतेषु च । गोत्रिणः स्नानशुद्धाः स्युस्त्रिरात्रेणैव तत्पिता' ॥ इति । स्वैरिण्याद्यास्तु यमाश्रितास्तस्य तु त्रिरात्रमेव । यथाह विष्णुः—'अनौरसेषु पुत्रेषु जातेषु च मृतेषु च । परपूर्वासु भार्यासु प्रसूतासु मृतासु च'॥ इति त्रिरात्रमेव प्रकृतम् । अनयोश्च त्रिरात्रैकरात्रयोः संनिधिविदेशस्थापेक्षया व्यवस्था । यदा तु पितुस्त्रिरात्रं तदा सपिण्डानामेकरात्रम् । यथाह मरीचिः—'सूतके मृतके चैव त्रिरात्रं परपूर्वयोः । एकाहस्तु सपिण्डानां त्रिरात्रं यत्र वै पितुः' ॥ इति । किञ्च—निवसत्यस्मिन्निति निवासः स्वदेश उच्यते तस्य यो राजा स्वामी विषयाधिपतिः स यस्मिन्नहनि अतीतस्तदहर्मात्रं शुद्धिकारणम् । रात्रौ चेदतीतस्तदा रात्रिमात्रम् । अत एव मनुः (५।८२)—'प्रेते राजनि सज्योतिर्यस्य स्याद्विषये स्थितः' इति । ज्योतिषा सह वर्तते इति सज्योतिराशौचम् । अह्नि चेद्यावत्सूर्यदर्शनं रात्रौ चेद्यावन्नक्षत्रदर्शनमित्यर्थः ॥ २५ ॥

(वी०मि०) अनुगमनाशौचमाह—

ब्राह्मणेनाऽनुगन्तव्यो न(१) तु शूद्रः कथञ्चन ॥
अनुगम्याऽम्भसि स्नात्वा स्पृष्ट्वाऽग्निं घृतभुक् शुचिः ॥२६॥

शूद्रः शूद्रशवः कथञ्चन अनुग्रहादिनापि अनु(२)त्पन्नकार्यान्तरवशेनावर्जनीयं तदनुगमनं कृत्वा । शेषं सुबोधम् । तुशब्देनेच्छया शूद्रानुगमने उक्तशुद्धिव्यवच्छेदः ।

प्रेतीभूतं तु यः शूद्रं ब्राह्मणो ज्ञानदुर्बलः ।
अनुगच्छेन्नीयमानं त्रिरात्रमशुचिर्भवेत् ॥

इति पराशरेण कामाच्छूद्रशवानुगमने त्रिरात्रबोधनात् । मनुः—

अनुगम्येच्छया प्रेतं ज्ञातिमज्ञातिमेव वा ।
स्नात्वा सचैलः स्पृष्ट्वाऽग्निं घृतं प्राश्य विशुध्यति ॥

इदं तु ब्राह्मणसवर्णपरम् । ब्रह्मपुराणे—

सर्वेषां स्यादहोरात्रं सर्वानुगमनादपि ।

---

(१) न शूद्रो न द्विजः क्वचित्-इति मु० पु० पाठः । (२) अनुगम्यकार्या०—इति ख. पु. पाठः ।

इदं च क्षत्रियादीनां चातुर्वर्ण्याभिगमने ब्राह्मणस्य क्षत्रियावैश्यानुगमने च। सजातीयशववहनदहनयोस्तु स्नेहादिना कृतयोस्तदा स्वजात्युक्तमशौचं ब्रह्मचारिणः। पित्रादिदाहकर्तृत्वे चैकरात्रम्। शिष्यगुरूपाध्यायाचार्यदाहं मूल्येन परद्वारा कारयतो दशरात्रमिति ग्रन्थान्तरप्रसिद्धत्वान्मुनिना नोक्तम् ॥ २६ ॥

(मिता०) अनुगमनाशौचमाह—

ब्राह्मणेनेति। ब्राह्मणेन असपिण्डेन द्विजो विप्रादिः शूद्रो वा प्रेतो नानुगन्तव्यः। यदि स्नेहादिनानुगच्छति तदाम्भसि तडागादिस्थे स्नात्वाग्निं स्पृष्ट्वा घृतं प्राश्य शुचिर्भवेत्। अस्य च घृतप्राशनस्य भोजनकार्यविधाने प्रमाणाभावान्न भोजनप्रतिषेधः। इदं समानोत्कृष्टजातिविषयम्। यथाह मनुः (५।१०३)—'अनुगम्येच्छया प्रेतं ज्ञातिमज्ञातिमेव च। स्नात्वा सचेलः स्पृष्ट्वाग्निं घृतं प्राश्य विशुध्यति' ॥ इति ज्ञातयो मातृसपिण्डाः। इतरेषां तु विहितत्वान्न दोषः। निकृष्टजात्यनुगमने तु स्मृत्यन्तरोक्तं द्रष्टव्यम्। तत्र शूद्रानुगमने—'प्रेतीभूतं तु यः शूद्रं ब्राह्मणो ज्ञानदुर्बलः। अनुगच्छेन्नीयमानं स त्रिरात्रेण शुध्यति ॥ त्रिरात्रे तु ततस्तीर्णे नदीं गत्वा समुद्रगाम्। प्राणायामशतं कृत्वा घृतं प्राश्य विशुध्यति' ॥ इति पराशरोक्तम्। क्षत्रियानुगमने त्वहोरात्रम्। 'मानुषास्थि स्निग्धं स्पृष्ट्वा त्रिरात्रमाशौचम्, अस्निग्धे त्वहोरात्रं शवानुगमने चैकम्' इति वसिष्ठोक्तम्। वैश्यानुगमने पुनः पक्षिणी। तथा क्षत्रियस्यानन्तरं वैश्यानुगमने अहोरात्रमेकान्तरशूद्रानुगमने पक्षिणी, वैश्यस्य शूद्रानुगमने एकाह इत्यूहनीयम्। तथा रोदनेऽपि पारस्करेणोक्तम्—'मृतस्य बान्धवैः सार्धं कृत्वा तु परिदेवनम्। वर्जयेत्तदहोरात्रं दानं श्राद्धादिकर्म च'॥ इति। तथालङ्करणमपि न कार्यम्। 'कृच्छ्रपादोऽसपिण्डस्य प्रेतालङ्करणे कृते। अज्ञानादुपवासः स्यादशक्तौ स्नानमिष्यते'॥ इति शङ्खेन प्रायश्चित्तस्याम्नातत्वात् ॥ २६ ॥

(वी०मि०) क्वचित्पूर्णाशौचादीनामपवादमाह—

महीपतीनां नाशौचं हतानां विद्युता तथा ॥
गोब्राह्मणा(१)र्थे सङ्ग्रामे यस्य चेच्छति पार्थिवः ॥ २७ ॥

(१) गोब्राह्मणार्थे—इति मु० पु० पाठः।

काशीसंस्कृतसीरीज़-ग्रन्थमाला।

इयं काशी-संस्कृतग्रन्थमाला विभागशः प्रकाशिता भवति। एतस्यां प्राचीनाः नवीनाश्च दुर्लभाः सुलभाश्च अत्युपयुक्ताः संस्कृतग्रन्थाः काशिकराजकीयसंस्कृतपाठशालीयैः पण्डितैरन्यैरपि विद्वद्भिः संशोधिताः क्रमेण संमुद्रिता भवन्ति। अस्यां प्रकाश्यमाणानां ग्रन्थानां मूल्यं सूचीपत्रे प्रकाशितं वर्तते।

तत्र मुद्रितग्रन्थनामानि। मूल्यम्।

१ नलपाकः नलविरचितः। संपूर्णः (पाकशास्त्रम् १) रु० १—८
२ संक्षेपशारीरकम्। रामतीर्थस्वामिकृतान्वयार्थबोधिनीटीकासहितम्। (वेदान्तं १) रु० ८—०
३ वैशेषिकदर्शनम्। पं० श्रीढुण्ढिराजशास्त्रिकृतविवरणोपेताभ्यां प्रशस्तपादभाष्योपस्काराभ्यांसमन्वितम् (वैशेषिकं१)रु०२—०
४ श्रीसूक्तम्। विद्यारण्यपृथ्वीधरश्रीकण्ठाचार्यकृतभाष्यत्रयेण टिप्पण्या च समलङ्कृतम्। (वैदिकं १) रु० ०—६
५ लघुशब्देन्दुशेखरः (भैरवी.) चन्द्रकलाटीकासहितः-प्रथम भाग अव्ययीभावान्तः। (व्याकरणं १) रु० ५—०
५ लघुशब्देन्दुशेखरः (भैरवी) चन्द्रकलाटीकासहितः तत्पुरुषादिसमाप्तिपर्यन्तः। द्वितीय भाग (व्याकरणं १) रु० ८—०
६ कारिकावली मुक्ता० दिन० राम० शब्दखण्डसहिता तथा "गुण निरूपणदिनकरीय" महामहोपाध्याय पं० श्रीलक्ष्मणशास्त्रिकृतव्याख्यासहिता। (न्यायं १) रु० ६—०
७ पञ्चीकरणम्। वार्तिकाभरणालङ्कृतवार्तिकटीकया-तत्त्वचन्द्रिकासमवेतविवरणेन च समन्वितम्। (वेदान्तं २) रु० ०—८
८ अलङ्कारप्रदीपः। श्रीविश्वेश्वरपाण्डेयनिर्मितः। (काव्यं १) रु० ०—८
९ अनङ्गरङ्गः। महाकविकल्याणमल्लविरचितः। (कामशास्त्रं१) रु० ०—१२
१० जातकपारिजातः। श्रीवैद्यनाथशर्मणा विरचितः। (ज्यो० १) रु० २—०
११ पारस्करगृह्यसूत्रम्। कात्यायनसूत्रीयश्राद्ध-शौच-स्नान-भोजन-कल्पसहितम्। (कर्मकाण्डम् १) रु० ०—८
१२ पुरुषसूक्तम्। सायणभाष्य-महीधरभाष्य-मंगलभाष्य-निम्बार्कमतभाष्यचतुष्टयसहितम्। (वैदिकं २) रु० १—४
१३ श्रीमत्सनत्सुजातीयम्—श्रीमच्छङ्करभगवत्पादविरचितभाष्येण नीलकण्ठीव्याख्यया च संवलितम्। (वेदान्तं ३) रु० १—४
१४ कुमारसंभवं महाकाव्यम्। महाकवि श्रीकालिदासवि०। सञ्जीवनी शिशुहितैषिणी-टीकाद्वयोपेतम् सम्पूर्णम्। (काव्यं२) रु० १—८
१५ श्रुतबोधश्छन्दोग्रन्थः। आनन्दवर्द्धिनीतात्पर्यप्रकाशाख्यसंस्कृत-भाषाटीकासहितः। (छंदः १) रु० ०—६
१६ कारिकावली। मुक्तावली-न्यायचन्द्रिकाटीकाद्वयसहिता सटिप्पणा। (न्यायं २) रु० १—०
१७ पारस्करगृह्यसूत्रम्। काण्डद्वये हरिहर-गदाधर० तृतीयकाण्डे हरिहर-जयराम-प्रणीतभाष्येण समलङ्कृतम्। हरिहरभाष्यस·

हितस्नानत्रिकण्डिकासूत्र—गदाधरभाष्यसहितश्राद्धनवकण्डिकासूत्रैः यमलजननशान्ति-पृष्टोदिवि-शौच-भोजन—कामदेवकृतभाष्यसहितोत्सर्गपरिशिष्टसूत्रैः परिष्कृतं-टिप्पण्यादिभिः सहितं च । (कर्मकाण्डं २) रु० ३—०

१८ संक्षेपशारीरकम् । मधूसूदनीटीकासहितम् संपूर्णं (वेदान्तं४) रु० ८—०

१९ लघुजूटिका-अर्थात् अभिनवा परिभापेन्दुशेखरपरिष्कृतिनिर्मितिः । (व्याकरणं २) रु० ०—८

२० कातीयेष्टिदीपकः । (दर्शपौर्णमासपद्धतिः) महामहोपाध्याय-पं० श्रीनित्यानन्दपन्तपर्वतीयविरचितः । (कर्मकाण्डं) रु० १—०

२१ सप्तपाठि श्रीशिवमहिम्नस्तोत्रम् । श्रीगन्धर्वराज पुष्पदन्ताचार्यविरचितम् । हरिहरपक्षीय-मधुसूदनीटीकया (संस्कृतटीका-संस्कृतपद्यानुवाद-भापाटीका-भापापद्यानुवाद-भापाबिम्ब) पञ्चमुखीनाम्न्या टीकया-शक्तिमहिम्नस्तोत्रेण च समन्वितम् । (स्तोत्रवि० १) रु० १—०

२२ बौद्धाऽऽचार्यश्रीधर्मकीर्तिप्रणीतः सटीकन्यायबिन्दुः । भापाटीकासहितः । (बौद्धन्याय वि० १) रु० १—८

२३ सपरिष्कृत-दर्पणसहितवैयाकरणभूपणसारः । (व्याकरणं ३) रु० ४—०

२४ न्यायवार्त्तिकतात्पर्य्यटीका । श्रीवाचस्पतिमिश्रविरचिता । सम्पूर्ण (न्यायविभाग ३) रु० ६—०

२५ मीमांसान्यायप्रकाशः । (आपदेवीयः) श्रीचिन्नस्वामिशास्त्रिकृतया सारविवेचिन्या व्याख्यया सहितः । (मीमांसा १) रु० २—०

२६ पौरोहित्यकर्मसारः । (टिप्पणीसमलंकृतः) प्रथमो भागः श्रीरमाकान्तशर्मणा संगृहीतः । (कर्मकाण्डवि० ३) रु० ०—४

२७ लघुशब्देन्दुशेखरः । म० म० श्रीनागेशभट्टविरचितः अव्ययीभावान्तो भागः, म०म० पण्डित श्रीनित्यानन्दपन्त-पर्वतीयकृतशेखरदीपकाख्येन टिप्पणेन समुज्ज्वलितः । (व्या०४) रु० ४— ८

२८ रघुवंशमहाकाव्यम् । महाकविश्रीकालिदासविरचितम् पञ्चसर्गात्मकम् । म० म० श्रीमल्लिनाथसूरिकृतसञ्जीविनीटीकया पं० श्रीकनकलालठक्कुरकृताऽर्थप्रकाशिकाटीकया च समलङ्कृतम् । (काव्यवि० ३) रु० ०—१२

२९ कामसूत्रम् । श्रीवात्स्यायनमुनिप्रणीतं बहुयत्नरासादितया पूर्णया-जयमङ्गलरचितया टीकया समेतम् । बहुखण्डितपाठान् परिपूर्य,सूत्राङ्कांश्च संयोज्य, परिष्कृत्य संशोधितम् । (काम०२) रु० ८—०

३० न्यायकुसुमाञ्जलीः । न्यायाचार्यपदाङ्कितश्रीमदुदयनाचार्यविरचितः । म० म० रुचिदत्तकृतमकरन्दोद्भासित म० म० वर्द्धमानोपाध्यायप्रणीतप्रकाशसहितः । (न्यायं ४) रु० ६—०

३१ परिभापेन्दुशेखरः । म० म० श्रीनागेशभट्टरचितः । म० म० भैरवमिश्रविरचितया भैरवीत्यपराख्यया परिभापाविवृत्या-तत्त्वप्रकाशिकया टीकया च सहितः । (व्याकरणं ५) रु० ३—०

५० अधिकरणकौमुदी । श्रीदेवनाथठक्कुरकृता । (मीमां० ४)

५१ रघुवंशमहाकाव्यम् । महाकविश्रीकालिदासविरचितम् म.म. मल्लिनाथकृतसञ्जीविनीटीकयोपेतम् पं० श्रीकनकलाल... रेण विरचितया भावबोधिनी टिप्पण्या समलङ्कृतः संपू... (काव्य ५)

५२ काथबोधः । सज्जनीकृत टीकोपेतः । दत्तात्रेय सम्प्रदायाऽनुगत

५३ रसचन्द्रिका । पर्वतीय-पण्डितप्रवर-श्रीविश्वेश्वरप... निर्मिता । (काव्य० ६)

५४ अलङ्कारमुक्तावली । पर्वतीय-विद्वद्वर-श्रीविश्वेश्वर पाण्डेय निर्मिता । (काव्य० वि० ७)

५५ वृत्तरत्नाकरः-भट्टकेदारप्रणीतः । नारायणभट्टीयव्याख्यासहि... त्सम्पादकनिर्मितविषमस्थलटिप्पणोपेतः । श्रुतबोधच्छन्... मञ्जरीसुवृत्ततिलकैश्च समेतः । (छंद वि० १)

५६ अलङ्कारशेखरः । केशवमिश्रकृतः । साहित्योपाध्याय श्री अनन्... महाशास्त्रि ... प्रभृतिभिः संभूय संशोधितः । (अल०वि...

५७ शक्तिवादः । श्रीगदाधरभट्टाचार्यप्रणीतः । टीकात्रयोपेतः । कृ... भट्टकृतया मञ्जूषया-माधवभट्टाचार्यनिर्मितया विवृ... श्रीमन्माध्वसंप्रदायाचार्य्यदार्शनिकसार्वभौमसाहित्यदर्शन... द्याचार्यतर्करत्नन्यायरत्न गोस्वामिदामोदरशास्त्रिरचितय... विनोदिन्या च समेतः । (न्या० वि० ७)

५८ प्रौढमनोरमा । म. म. श्रीभट्टोजीदीक्षितविरचिता तत्पौत्र म. श्रीहरिदीक्षितविरचितलघुशब्दरत्नाख्यव्याख्ययासमेता । म. पण्डितश्रीभैरवमिश्रविरचितशब्दरत्नव्याख्य... ...कृ... श्रीसुतभाण्डारीत्युपाह्वमाधवशास्त्रिविरचित प्रभा... ...ण्या समलङ्कृता । श्रीयतजगन्नाथशास्त्रिविरचितयोग्य... भावस्य शब्दरत्नप्रदीपकनामकटीप्पण्याऽलङ्कृता (अव्यय... भावान्तः प्रथमो भागः) (व्याकरण वि० ९) रु० ५-

५९ आपस्तम्बगृह्यसूत्रम् । श्रीहरदत्तप्रणीतयाऽनाकुलाख्यया व्याख्यय... श्रीसुदर्शनाचार्यप्रणीतया तात्पर्यदर्शनाख्यया व्याख्यया समलङ्कृतम्, पृथक् सूत्रपाठेन, पाठभेदेन, मीमांसापदार्थवि... रणेन च संयोजितम् (कर्म० वि० ५) मूल्यम् रु० ३—०

६० नाट्यशास्त्रम् । भरतमुनिप्रणीतम् (सम्पूर्णम्) साहित्योपाध्याय एम.ए. इत्यादिपदवीभाजा पण्डित बटुकनाथ शर्म्मणा तथा साहित्यशास्त्रि एम.ए. पदवीभृता पण्डित बलदेवोपाध्यायेन ...संपादितम् । (नाट्यशास्त्र वि० १) मूल्यम् रु० ५-०

जयकृष्णदास—हरिदासगुप्तः

पत्रादिप्रेषणस्थानम्

चौखम्बा संस्कृत सीरीज आफि... विद्याविलास प्रेस, गोपालमन्दिर के ... बनारस सिटी ।